अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकपत्रम्)

दशमवर्षे प्रथमोऽङ्कः

१५ जनवरी १९८८

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली-११० ०५९

अर्वाचीनसंस्कृतम् (१०/१)

(R. N. 34554/79)

(१५ जनवरी १९८८ ई०)

विषय-सूचिः

विषयः		लेखकः	पृष्ठांकः
१.	सम्पादकीयम्		(क)
२.	नववर्ष-शुभकामना	डा० उमारमण झा, जम्मूतवी	(ख)
३.	ऋतम्	डा० केशवचन्द्र दाशः, पुरी	१—६१
४.	शोषः-पौषश्च	कविरत्नम् अमीरचन्द्र शास्त्री, दिल्ली	६२
५.	कथंकथा	डा० बच्चूलाल अवस्थी, उज्जयिनी	६३
६	देववाणी-परिषद्वार्ता	रमा शुक्ला	६४
७.	संस्कृत-जगद्वार्ता	,, ,,	६६

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली ।

२. प्रकाशनकालावधिः—त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वाणी विहारः, नयी दिल्ली-११००५९ ।

डा०रमाकान्त शुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतो सत्यमस्ति ।

१५-१-१९८८

—डा० रमाकान्त शुक्लः

प्रकाशकः, सम्पादकः

सम्पादकीयम्

अथ प्रस्तूयते अर्वाचीनसंस्कृतस्य दशमवर्षीयः प्रथमोऽङ्कः।

अस्मिन्नङ्के सर्वप्रथमं डा० उमारमणझामहाभागस्य शब्देषु नववर्षशुभकामनाः प्रकाश्यन्ते।

तदनन्तरं उत्कलराज्ये पुरीनगर्यां श्रीजगन्नाथसंस्कृतविश्वविद्यालये दर्शनशास्त्रविभागाध्यक्षपदमलंकुर्वाणस्य डा० केशवचन्द्रदाशमहाभागस्य 'ऋतम्'—इति लघूपन्यासोऽविकलरूपेण प्रकाश्यते। अलेख-अनन्त-उपार्क-अभिधा-कुलभद्र-शन्नोदेवी-अवनी-गुरुदेव-प्रभृतिपात्रावलम्बितेयं कथा 'अन्तर्निहितम् सत्यं गुरुः भविष्यति'—इति विचारबिन्दुं विस्तारयति।

इतः पूर्वमस्मिन् पत्रे डा० दाशमहाभागस्य 'निकषा' इति लघूपन्यासः प्रकाशितो बभूव। आशासे, पाठकाः इदानीमनेन द्वितीयेनोपन्यासेन काव्यानन्दं लप्स्यन्ते।

'शोषः पोषश्च' इतीयं रचना कविरत्नश्रीअमीरचन्द्रशास्त्रिभिः १३-१२-१९८७ तारिकायां देववाणी-परिषदो नवम-दशम-संयुक्तवार्षिकाधिवेशनावसरे समायोजिते दशमेऽखिलभारतीयसंस्कृतकविसम्मेलने श्राविता। १२-१२-१९८७ तारिकायां दिल्ल्यां 'संस्कृत अकादमी' उद्घाटिता जाता। तस्मिन्नेव दिने प्रातःकाले भीषणशोषानन्तरं वृष्टिः सञ्जाता। अकादमी-समुत्सवानन्तरं मया श्रीशास्त्रिणः शोषं वृष्टिञ्चावलम्ब्य काव्यं कर्तुं प्रार्थिता। तैर्ममानुरोधो रक्षितः। इयं रचना चाग्रिमे दिने श्राविता। अयमस्या इतिहासः।

अन्ते च देववाणी-परिषद्वार्ता संस्कृत-जगद्वार्ता च दीयेते।
स्वपाठकेभ्यो नूतनवर्षाभिनन्दनं व्याहरामि।

विदुषामाश्रवः
(डा० रमाकान्त शुक्लः)
प्रधानसम्पादकः

१५-१-१९८८
आर-६, वाणी-विहारः
नयी दिल्ली-११००५९

नववर्ष-शुभकामना

(विद्यावाचस्पतिः डा० उमारमण झा, न्यायाचार्यः, एम० ए०, पी-एच०डी०, डी० लिट्०, दर्शनविभागाध्यक्षः, श्रीरणवीर केन्द्रीयसंस्कृतविद्यापीठम्, शास्त्रिनगरम्, जम्मूतवी, १८०००४)

(१)

भूयाद्भव्यमिदं सुकीर्तिजनकं नूत्नं समोदं ध्रुवं
वर्षं हर्षमयं प्रकर्षरुचिरं सौभाग्यसंवर्द्धकम् ।
वर्द्धन्तां सुखभोगयोगमतयो विद्यावतां श्रीमतां
कुर्वेऽहं शुभकामनां प्रतिपलं वन्दे च शक्तिं पराम् ।।

(२)

शुभे नूत्ने वर्षे प्रसरतु यशो वः प्रतिदिनं
धनं धान्यं पूर्णं भवतु सदने शान्तिरतुला ।
सुधाधारासारा सततमनुकूला च गृहिणी
ध्रुवा भक्तिर्देशे भवतु चिरमायुश्च भवताम् ।।

(३)

सदाऽस्तु नूनं यशसः प्रतिष्ठा
वर्षे नवीने प्रभुता च वृद्धिः ।
श्रीश्चापि गेहे भवतोऽस्तु नित्या
शिवः प्रसन्नः सुखदा च दुर्गा ।।

(४)

किरतु किरणपुञ्जं कामदं कृष्णदेवः
भवतु भुवि भवो वो भव्यभावस्य हेतुः ।
लसतु ललितलीलालोललास्यैश्च लक्ष्मी-
दिशि दिशि शुभदं स्यान्नूतनं हर्षवर्षम् ।।

(५)

गेहे ते प्रसरीसरीतु कमला सौभाग्यकल्पद्रुमा
वाग्देवी रसना स्थलेऽस्तु सततं वैदुष्यसंवर्द्धिका ।
दुर्गा दुर्गतिहारिणी प्रभवताद् गर्वापहा वैरिणां
नित्यं धान्य-धनर्द्धिसिद्धिसखदं वर्षं सहर्षं भवेत् ।।

ऋतम्

(रचयिता—डा० केशवचन्द्र दाशः, पुरी)

कपटप्रच्छदपटे मोहमयो प्रकृतिः ······

चरणद्वयम्······गमनं तु एकम्। करद्वयम्······करतालं तु एकम्। कर्णद्वयम्······श्रव्यं तु एकम्। नयनद्वयम्······दृश्यं तु एकम्। ओष्ठद्वयम्······स्मितं च एकम्। अतः समकरो हिमकरः। समयश्च समरसः। आकर्षणे सृष्टिः। विकर्षणे संहारः। सहस्रारे प्रणवलीला ······ऋतरसा······ ।

जीवो निमीलिताक्षः।

इतिहासो विशदः। उत्पत्तिः औपनिषदिकी। प्रवाहो जीवनवहः। व्यवस्थापन्नस्तु मध्यमपथः। अभिगमः अभिरामोऽपि अनिर्वचनीयः। स्मृतिराशिः व्यवधानमयः। नियमप्रचय एव अनुभवः। विरामो ध्रुवः। अन्त्यं तु अचिन्त्यम्।

अलेखः निजदेहमपश्यत्। कौपीनं शीतलायते। कटिवलये स्थूल-सूत्रं पीडादायकम्। शीतस्पर्शे देहोऽपि कम्पनरङ्कः। अलेखः कौशेय-स्यूतं स्थण्डिले स्थापितवान्। पेटिकातो भस्म बहिष्कृत्य प्रत्यङ्गं विलेपितवान्। ततो दिग्वलयमपश्यत्। पौषचन्द्रिका उपक्रमे सुन्दरी। संध्या मन्दारशोणा। उषरप्रसरो निजश्मश्रुरिव निष्क्रमः······ निष्क्रमणीयश्च। जीवनचर्यायां तथापि उपचारायते निष्ठुर-भिक्षामुष्टिः······ ।

अविकलः कालशकलः।

अपरपूर्वाह्णे निर्गतः अलेखः। सुन्दरग्रामे अद्य भिक्षा। मुष्टिमेय-शिष्यगृहे आतिथ्यम्। ततः प्रतिश्रुतिपालनाय उपदेशः। सत्यरक्षार्थं शपथपाठः। पुनर्दर्शनाय च प्रस्थानम्। प्रथमतः कुन्नभद्रस्य द्वारमुपगतः अलेखः।

कुलभद्रः अभिजातः। वयोभारेण मध्यमवयस्कः। दरपलितः केशराशिः। चिन्तापन्नो मुखबन्धः। प्रतिज्ञापिता उच्चदृष्टिः। पृथुलकायो गौरवर्णः। दुकूलवलये श्रोवलः शोभनीयः। उत्तरीयम् औचित्यपाटवम्। पादसंचार उदात्तमन्थरः।

"भिक्षां देहि"—ध्वनिनिवहेन रुद्धद्वारं मुखरीकृतवान् अलेखः। रक्षी अनुमतचञ्चलः संजातः। निजपथं पाथेयीकुर्वन् स सन्न्यासिनं पुरोऽकरोत्।

शरणसौजन्ये कुलभद्रो विनीतः।

रक्षी च स्थानापन्नः।

अलेखो मङ्गलगिरा आशिष्यं व्यतरत्।

उपचारमुपायनीकृत्य कुलभद्रः कुशलमपृच्छत्। तथैव वचनविनिमये शुभं व्याहरन् अलेखः। प्रसङ्गक्रमेण च स स्मारितवान्।

—अद्य प्रतिज्ञापिता दिवसः।

किंचित् गम्भीरोऽभूत् कुलभद्रः।

--जाने··गुरुदेव !

कुलभद्रस्य मुखे द्विधाभावमालक्ष्य अहसत् अलेखः।

—तर्हि, किं चिन्तयति भवान् ?

अनुरोधमुखेन कुलभद्रः अयाचत।

—अन्यूनं हायनपरिमितं समयं ददातु।

—किमेतावति अभिलाषपूर्तिः स्यात् ?

—आशासे······।

—तथास्तु।

अहसत् अलेखः। निर्विकारमनोभावे तस्य एकीभूतः प्राणिप्रपञ्चः। अहो, व्यामोहः ? कियान्न प्रतिज्ञाशिथिलोऽयं जीवः ? कियान्न सत्यभीरुः ? कियान्न आसक्तिजडोऽद्य कुलभद्रः ? सत्यरक्षार्थं कियान्न कुण्ठाकुलः ? तद्दिने अतिकातरभावेन पुत्रस्य जीवनं संप्रार्थ्य स विह्वल आसीत्। श्मशानवैराग्ये उद्बुद्धो भूत्वा सत्यबद्धः संजातः—

"महात्मन् ! यद्ययं जीवनं प्राप्नुयात् तर्हि तस्य समग्रमपि जीवनं भवत्सेवायां नियोजयिष्यते। भवान् तस्मिन् जीवनं संचारयतु। तमपि शिष्यत्वेन अङ्गीकरोतु……दीक्षयतु। इयं मे भिक्षा भवदीयचरण-कमले……।"

परमिदानीं सत्यशिथिलः कुलभद्रः……

अलेखः प्रस्थातुमुत्थितः।

शरणसहृदयोऽभूत् कुलभद्रः।

निजपथे पुनश्च पथिकः अलेखः। शपथप्रेरणामूले स सत्यप्रतिमः। विच्युतिमीमांसायां संसारी स निरुपमः। वास-निर्वासनयोः निरर्थ-भूमिकायां आत्मना स दुरवगमः। सत्यस्य प्रयोगसाहस्री तस्य शान्तेरनुगमः। पाथेये अप्रतिमः कश्चित् तस्य प्रियतमः।

कुलभद्रः पश्चाद् विवर्त्तितः। एकपार्श्वे दण्डायमाना अवनी। नयने तीव्रदृष्टिः। नासिकाग्रे कोपपुलकम्। ओष्ठे पिहिता वाक्स्फुरणा। चिबुके क्षीणतरङ्गः। कपोले स्फीतरक्तिमा। मुखे विरक्तिभावः। किंचिद् विलोक्य अन्तः प्राविशत् कुलभद्रः।

सम्मुखे पूजापात्रहस्ता शन्नोदेवी। पूर्वरीत्या सा पतिदेवम् अर्चितवती। मस्तके सिन्दूररेखाम् अङ्कितवती। चरणे पुष्पाणि निक्षिप्य प्रणतवती। ततो निजमार्गं प्रस्थिता। पूजागृहं च प्रविष्टा। उदास-धूपस्य विततधूमकुण्डलीं क्षणाय विरुज्य सा यथस्थानम् उपविष्टा। मौनविलासे कुलभद्रः भावक्लिन्नः।

उपनिषण्णा शन्नोदेवी।

कुलभद्रः अतीतं मनस्यति—

संकल्पमुखरो विवाहसमयः। प्रतिश्रुतिसम्पन्नो मनोभावः। स्वयमा-वेगपुङ्गवः कुलभद्रः। मधुयामिनी विनयपुण्या। अवगुण्ठनतले तरल-नयना शन्नोदेवी। पुलकप्लावने कुलभद्रो दहनदुर्बलः।

—कस्ते अभिलाषः……?

शन्नोदेवी क्षीणमहसत्।

कुलभद्रः प्रगल्भः संजातः ।
—सर्वमपि ते अभिलाषं पूरयिष्यामि ।
—प्रतिजानातु ।
—विवाहमण्डपे शपथरूपेण तु संकल्पितम् ।
—सत्यम्……?
—यावज्जीवं ते कामनां पूरयिष्यामि ।
—किमेतत्……?
—सत्यम्……सत्यम्……सत्यम्……।

तत उपनिषद्य पुलकेन समं स्मितममेलयत् कुलभद्रः। शनैश्च अवदत् ।

—जीवने न कदापि त्वत्तो वियुक्तो भविष्यामि। न वा कश्चिन् मध्यस्थ आवयोः संपर्कं प्रतिबध्नीयात् ।

तदनु समयक्रमः सौमनस्ये व्यतीतः । सीमन्तोन्नयने हुतवहाऽभूत् शन्नोदेवी । रसो निष्पन्नः । प्रथमपुत्रो भूमिष्ठोऽभवत्। भूमिदर्शनात् पूर्वं स तु पूर्वस्थानं प्रत्यागच्छत् । मर्माहताऽभूत् शन्नोदेवी । सान्त्वना- सरोवरे कुलभद्रः शन्नोदेवीं भृशं स्नापितवान्। विलक्षणक्षणनिबद्धा शन्नोदेवी पुनरपि सन्ततिसम्भवा संजाता। मरणमुखात् प्रत्यावर्त्य सा रुग्णा अभूत्। किंतु पुत्रस्य जननी अभवत्। उत्सवविधाने कुलभद्रः अभिजातानाम् उदात्तदृष्टिं नीचीकृतवान्। परं न पुत्रः न वा शन्नोदेवी उत्सवसुखम् अलभत। पुत्रः पूर्ववत् अल्पदिनानाम् अतिथिरभूत्। शन्नोदेवी चिराय पीडिता ।

सेवाविभवे कुलभद्रः अभिभूतः ।

शन्नोदेवी तु ज्वालागलिता । कुलभद्रमनसि सा क्रमशः दुष्कृतिपांसुला अभूत्। तथा च मथ्यमानोऽपि स विवाहसंकल्पं परिपालितवान् । तस्य सेवया शन्नोदेवी तरलहृदया,अभूत् । किंतु उभयस्य नैराश्ये पुनर्मिलन- विषयो निरर्थकः संजातः। जीवनधारणं केवलं संकल्पनिमित्तम् ……सान्त्वनानिमित्तम्……द्विधाभावस्य विनाशनिमित्तम् । कालक्रमे दुर्बला अभूत् शन्नोदेवी। तस्या आकृतिः वार्धक्यस्य चित्रलेखा

यथा पूजनीया अभवत् । चिन्ताकुलः कुलभद्रः कुलपांसुलदोषेण आत्मानमभियुज्य व्यथितोऽभूत् ।

प्रहरो नीरवधर्मा ।

शय्याशायिनी शन्नोदेवी । निकटे उपविश्य कुलभद्रः खिन्नभावेन शनैरभिलपितवान् ।

—देवि ! इयमस्माकं दशा । कुलरक्षा कथं भवेत् ?

क्षणं विलोकितवती शन्नोदेवी । रुग्णनयने तस्याः कुलभद्रस्य शब्दराशिः निरर्थक आसीत् । निरुत्तरा सा नेत्रं निमीलितवती । पुनरपि कुलभद्रः तदेव स्फुटतरमावर्तितवान् । शन्नोदेवी अस्वास्थ्यम् अन्वभवत् । नेत्रकोणद्वये अश्रुविन्दु कर्णमूलमगलत् । कुलभद्रः तर्जन्यग्रेण लोतकमपसार्य आश्वासनामुखेन अवदत् ।

—न किमपि चिन्तय । भवितव्यं भवतु नाम…… ।

शन्नादेवी कुलभद्रस्य मनोभावं सम्यक् आकलितवली । …… सुखे दुःखे च समभागो नाम किम् ? शरीरचर्यायां क्व वा एकात्मभावभूमिः ? इन्द्रियार्थसन्निकर्षे किं वा पर्याप्यते ? कर्मप्रवाहे ज्ञानार्जनं मुक्तये भुक्तये वा ? जीवने साफल्यं नाम कर्मपूर्णता अथवा फलभागित्वम् ? अन्ततः साफल्यं किम् ? भुक्तिर्वा मुक्तिर्वा ? किमत्र तथ्यम् ? किं वा सत्यम् ? एवं नानाविधप्रश्नान् मनसि कृत्वा अलेखस्य स्वरूपं ध्यायते स्म शन्नादेवी ।

उपगतः कुलभद्रः ।

भाराक्रान्तं मुखमण्डलम् । केशपाशः शीतार्तवदरीपादपो यथा गोधूलिसुन्दरः । अकर्तितश्मश्रुस्तरं यथा हेमन्तप्रान्तरम् । वसनवेशः कौलीन्यविवशः । विकलभावेन सः अवदत् ।

—देवि ….. ! अद्य एका मे प्रार्थना अस्ति ।

शन्नोदेवो औदासीन्यं प्राकटयत् ।

—कथयतु ।

कुलभद्रस्य स एव प्रश्नः ।

—कुलरक्षा कथं भवेत् ?

—भवान् उपायं चिन्तयतु ।

— चिन्तितवान् ।

—किम् अनुमोदनमपेक्ष्यते ?

—तदेव ।

— तथास्तु ।

प्रस्तावे सहमताऽभवत् रुग्णोदारा शन्नोदेवी । कुलभद्रस्य तु साहसो नासीत् । तथापि तस्या वचने विश्वास आसीत् । तदेव शिरसि कृत्वा कुलभद्रो द्विपत्नीकोऽभवत् ।

अवनी कुलभद्रस्य द्वितीयपत्नी । सत्यनिर्बन्धे सा अनुयायिनी। सौभाग्याय समभागिनी । सौख्याय सहचरी । शुभाय कुलेश्वरी। शान्तये सीमन्तिनी । सेवार्थं गृहिणी ।

मधुयामिनी विसर्जनवातुला ।

मधुप्रहर उपसंहारे म्लानः । आलाप इतिरतः । प्रथममिलने प्रीति-शिथिला अवनी । किन्तु अभिज्ञरतिप्रत्यये कुलभद्रः चतुरः । स्नेह-योजनाच्छलेन सः अभिलाषमुपस्थापितवान् ।

—अवनि ! तव सौभाग्याय मया संकल्पितम् । सुखाय च प्रतिश्रुतम्। सत्यमुखेन शान्तिवासाय शपथः कृतः । किन्तु ममैका प्रार्थना वर्तते ।

उत्साहमुग्धा अवनी अहसत् ।

—नूनं पूरयिष्यामि ।

—वचनं मे नान्यथा करिष्यसीति मे विश्वास आसीत् ।

—इदानीं कथयतु ।

—त्वं तु जानासि, 'शन्नोदेवी मम'······।

—प्रथमपत्नी······। तज्जाने······। कथयतु······।

—इदानीं सा······

—रुग्णा······असमर्था······। एतदपि जाने ।

—तर्हि, वचनं देहि······

—सत्यम्······सत्यम्······सत्यम्······।

—इदानीं तस्याः तत्त्वावधाननिमित्तं त्वं नियुक्ता । तस्याः सेवा त्वयि

न्यस्ता ।

—सर्वं ज्ञात्वा आगताऽहम् ।

—त्वं तस्या भगिनीरूपा । तवागमनस्य गुरुत्वं यथा सा नानुभवेत् तथा यत्नः कर्त्तव्यः ।

—यदि······?

—नहि । त्वज्जनितदुःखेन यथा सा पीडिता न भवेत् तथा यत्नः कर्त्तव्यः ।

—यदि कदाचित्······?

—नहि । तस्या मनसि कदाचित् दुःखं न भवतु । न वा सा अनुतपतु । इयं मे इच्छा प्रार्थना च ।

—श्रृणोतु किंचित् ।

—नहि, त्वं वचनबद्धा । आशासे अवश्यं सत्यं पालयिष्यसि ।

आलापः अवसितः । शय्या पर्युषिता । मधुदीपे तैलिनी निःशेषिता । अवलीढचिबुकतटे अलक्ष्यश्यामिका अभिषेकस्य स्मृतिमाहवत् । अहोरात्रस्य नाभिमण्डले अरुणप्रभा मिमीलिषिता । अवगाहने आत्मानं नवीनीकृतवती अवनी ।

अतीतं ग्रन्थीकृत्य कुलभद्रः शन्नोदेवीपार्श्वत उत्थितवान् ।

अवनी प्रतीक्षमाणा आसीत् ।

कुलभद्रः नम्रवाचा अपृच्छत् ।

— शुभाङ्को न प्रत्यागतः ।

विकृतमुखभंग्या अवनी दृढा अभूत् ।

— किमर्थं सदा शुभाङ्कः······? शुभाङ्कः······?

— तस्य जन्मदिनं निकटायते । अवश्यं तदा आगन्तव्यम् ।

— तदहं जाने ।

— काचिद् व्यवस्था विहिता वा ?

— नहि ।

— कथम् ।

— ज्येष्ठदेवी पालनमिदं निषेधयति ।

— किमर्थम् ?

— ऐषमः तस्य विवाहो भवेत् । कन्यामन्वेषयतु ।

अवनी अन्तःपुरं प्रविष्टा ।

कुलभद्रः अवनीलपनं स्मारं स्मारम् उपविष्टः । अद्यापि अवनी कोपस्वभावा ? कपालपुटे कति केशा धवलिताः । मुखमण्डले मसृणभावो म्लानः । चर्मणि पलिताङ्कः अङ्कुरितः । तथापि सा आत्मानं न परिचिनोति ?

कुलभद्रो भावाविष्टः ।

अवनीसेवया शन्नोदेवी पुनर्जन्म अलभत । गलिताङ्गे तस्याः पुनस्तारुण्यं शोभावहमभूत् । सीमन्तसिन्दूरे तस्याः नवदीप्तिः आकर्षणं व्यतरत् । दुकूलतरङ्गे शन्नादेवी महीयसी अभूत् । सौभाग्योदये कुलभद्रः मान्यः संजातः । अवनी तु प्रभुत्वविभवे पट्टमहिषी आसीत् । तथापि ग्लानिचयेन मनस्तस्या अभिभूतम् ।

मासान्तरं मनोहरम् ।

शन्नोदेव्याः नव्यसंपर्के कुलभद्रः प्रार्थनामयः संजातः । इच्छाप्राबल्ये समयः रतिसार्थकोऽभूत् । अनेकमानसिकीप्रच्छदे शन्नोदेवी गर्भधारिणी अभवत् । त्रिपाकमासे तृतीय गर्भः पुत्रदायकः संजातः । अलेखप्रसादात् पुत्रोऽयं शुभाङ्कः । एक एव सः सर्वेषाम् आदरपदार्थः । नाना समर्पणेषु, बहुशपथेषु, पुष्कलसंकल्पेषु च शुभाङ्कजीवनं परिपूर्णम् । अवनीमनसि तु घनिष्ठग्लानिः । तथापि सा गृहपत्नी ।

शन्नोदेवी अपि ईर्ष्यापरायणा । पुत्रप्राप्तेः गौरवमनुभूय सा नीचदृष्ट्या अवनीं द्रष्टुमारभत । क्रमशः अवनीलोतके कुलभद्रस्य संसारः सन्तुलनविहीनोऽभवत् । मनोमालिन्यं कलहे परिणतम् । तदनु अवनी सदा विरक्ता…कुपिता… ।

कुलभद्रो विपन्नः ।

पूर्वसंकल्पे स आत्मानं विमथ्य सत्यभ्रष्टो भवितुमुपक्रान्तः । मानसिक भारसाम्यं च हारितवान् । अशान्तेः वलये नितरां दग्धः । उभयं बोध-

यितुं स बहु चेष्टितवान् । किन्तु सफलो नाभूत् । एकदा निजप्रकोष्ठे स शन्नोदेवीमाहूय अभाषत् ।

—किं सर्वं विस्मृतम् ? केयम् अवनी ? किमर्थम् आगता ? कथं तव सेवायां नियुक्ता ? केन प्रकारेण सा अस्यैव गृहस्य सकलकार्याणि निभालयति ? किमेतत् सर्वं जानासि ?

शन्नोदेवी सरलभावेन कुलभद्रस्य मुखं विलोक्य चिन्तया जडीभूता । कुलभद्रः विचलितभावेन भाषते स्म ।

—अवनीसेवया त्वं पुनर्जन्म लब्धवती । पुत्रं च प्रसूतवती । पुत्रं प्राप्य सर्वं विस्मृतं किमु ? किमर्थं ते ईर्ष्या ? कथं च असूया ? को वा मत्सरस्ते ?

शन्नोदेवी विषण्णा ।

कुलभद्रः कुपितः ।

—किमिच्छसि ? किं मम अशान्तिः ते कामना ? किं मे जीवनस्य विपर्ययस्ते काम्यः ? किमस्य गृहस्य ध्वंसः तव अभिलाषः ?

—नहि……नहि …… । मैवं वदतु । नेयं मे कामना…… । भवान् सुखी भवतु । अन्यथा पुत्रो मे…पुत्रो मे…… ।

सहसा शन्नोदेवी मूर्च्छिता । पूर्वरोगस्य आविर्भावमनुभूय कुलभद्रः शङ्कितः । ततो विश्रामनिवासे शन्नोदेवी उपचारार्थं सन्निवेशिता । अवनी आत्मनः संकल्पं नवीकृत्य सेवातत्परा अभूत् । शन्नोदेवी तु चिराय पीडिता ।

तद्दिने अवनी व्याकुला आसीत् । समीपे कुलभद्रं प्राप्य कोपशोकविह्वला सा अवदत् ।

—कथं भवता ज्येष्ठदेवी भर्त्सिता ? किमर्थं सा उत्क्षिप्ता ? मदर्थं …नु ? किमिदं भवत्समीपे मया निवेदितम् ? अथवा स्वाधिकाराय प्रतिवाद उत्थापितः ? तर्हि, किमर्थमिदं भवान् कृतवान् ? किमर्थं सा मूर्च्छिता ? तस्या पीडार्थं कथं मां निमित्तीकृतवान् ?

—नहि, अवनि ! नैतत् तथा । आश्वस्ता भव । सर्वमहं बोधयिष्यामि ।

—नहि,··· भवान् निजवचनं प्रथमतः प्रत्याहरतु। सा मे ज्येष्ठा भगिनी। शुभाङ्को मे पुत्रः। कदाचिदपि शुभाङ्कोपरि मे स्नेह-न्यूनता दृष्टा वा ?

—जाने···अवनि··· ! जाने सर्वम्। शुभाङ्कस्य ममता त्वयि अधिक-तरा इत्यपि अवहितोऽस्मि। आश्वस्ता भव।

अवनी अबाध्यभावेन विलपितुं प्रवृत्ता। कुलभद्रो व्यस्तोऽभवत्। सर्वमपि तस्य सान्त्वनावचनं बधिरितम्। समयेऽस्मिन् अपर प्रकोष्ठतः शन्नोदेवी शनैरागतवती। अनुच्चस्वरेण अवोचत्।

—अवनि···! अवनि···।

सहसा अवनी विलापतो विरता।

शन्नोदेवी सम्मुखमागता।

—भगिनि···! किमर्थं विलपसि ? नाऽहं दुःखिता। पीडिता तु भाग्यदोषादेव।

अवनी तस्या वक्षःस्थले मस्तकं निधाय उच्चैः रोदनं कृतवती। शन्नोदेवी अपि लोतकबिन्दुभिः तस्याः सीमन्तं आर्द्रीकृतवती। उभ-यस्य आलिङ्गने कुलभद्रो विस्मित आसीत्।

चतुर्विंशति वर्षाणि व्यतीतानि।

शुभाङ्कोऽद्य पूर्णयुवा। इदानीं स गुरुकुले निवसति। आगामिवर्षे समावर्त्तनं समाप्य प्रत्यागमिष्यति। किंतु ज्येष्ठदेवी इच्छति अस्मिन् वर्षे तस्य विवाहो भवतु। अतः सा जन्मदिनपालनं निषिद्धवती। इतः प्रभृति विवाहदिनस्य गुरुत्वम्। एवं चिन्तयन् कुलभद्रः अवसन्नः।

अतीते नैकाः प्रतिश्रुतयः। वर्त्तमाने संकल्पो विकल्पमध्यस्थः। भविष्यन्तु अभिलाषमयम्। मथ्यमानः कुलभद्रो दुर्बलः। अग्रे तस्य पूरणमपेक्षमाणा कतिपये इच्छानां समष्टिः···। कियन्तः प्रायोवादाः ···केचन प्रतिवादाश्च अभ्यासविमुखाः।

संप्रति अवनी दृढा।

सा गृहपत्नी। अधिकारस्य मुख्यरज्जुः तस्या हस्ते। सा यदिच्छति तदेव भवति। सर्वेऽपि कर्मकराः तस्या आदेशं प्रतीक्षन्ते। तदनुसारि च कर्म प्रासादे प्रचलति। सदा तस्या मुखे एकैव वाणी।
—अनन्तः अस्य गृहस्य प्रभुः। ······न शुभाङ्कः।
कुलभद्रः खिन्नः।
तदानीं सा आसीत् सहनरूपा अवनी। किन्तु सा जननी नाभूदिति मुखे तस्या ग्लानिलेशो मार्मिक आसीत्। सा बहुविबोधिता। नाना रीत्या च आश्वासिता। प्रतिकार्यं च पत्युः समीपे सम्पादयितुं निर्देशिता। सा अपि तथा कृतवती। अन्ततः तस्याः कामना पूर्णा। सा जननी अभवत्। अङ्के अनन्तं प्राप्य सा गृहवत्सला संजाता। गृहस्य सर्वाऽपि सामग्री तदधीनं नूतनरूपं प्राप्तवती। परमिदानीं सा अनभिप्रेतम् अभिलषति। किमनेन अनन्तः सुखी स्यात्!

अनन्तः किशोरः। बालकीया तस्य मतिः। एतदृशाऽभिलाषस्य सन्निवेशः तस्मिन् न कदाचित् मङ्गलाय भवेत्। अधिकारभारो यदि कस्योपरि बलात् समर्प्येत न तदा स योग्यो भवेत्। अपितु अकर्मण्यः संजायते। भारार्थं स समर्थो वा? उपयुक्तो वा अयं भारो न्यासाय? सर्वमेतत् किमर्थं न विचारयति अवनी? इच्छापोषणमात्रेण वा किमस्ति? किमनेन गौरवं वर्धते? पितुरङ्के तु सर्वाऽपि सन्ततिः वात्सल्यस्निग्धा। कनिष्ठोऽपि अनन्तः पुत्र एव। तदर्थं व्यवस्था तदनुरूपा। कथमद्य अवनी अनर्थं द्रढयति? अधिकारस्य उच्छेदस्तु अयोग्यतः··· ·। तर्हि, किं शुभाङ्कः अयोग्यः? असमर्थः सः?
कालो विलयवधिरः।

शुभाङ्कः प्रवासी। गृहस्य विषयराशिः तदर्थं क्षीणप्रभः। जनकः तन्निकटे सत्यस्य अवतारः। जननी च वात्सल्यमूर्त्तिः। तयोः निर्देशः मङ्गलस्य मार्गः। संप्रति तु आश्रमस्य परिवेशः तस्य संसारः। तत्रत्य जनाः परिबारः। केचन आत्मीयाः। केचन परिजनाः। केचन गुरुजनाः। नाना अत्र अतिथयः। श्रमोऽत्र प्राणिनां कृते। शिक्षा च जीवनस्य कृते।

समूहचर्चा इह अभिवृद्धये। आहरणीयं नाम ज्ञानमेव। ज्ञानं च आनन्दाय केवलम्।

शुभाङ्कोऽत्र प्रियः। पुनश्च बन्धुवत्सलः। उपार्कः तस्य बन्धुः। उभयस्य मनोभावः संकल्पमूलः। उभयस्य अभिलाषे मौलिकपरीक्षा एव विषयः। यथार्थनिरूपणं तत्त्वम्। सत्यकामतर्कणायां संस्कारस्य कर्कशप्रसरः उभयोरभिप्राये भूरिभारः। उपार्कस्तु चञ्चलः। आश्रमस्य आभोगः तस्य प्रेरणास्रोतः। अत्रत्यकर्मसमूहः तस्य उत्साहस्य सामग्री। अत्रैव स वृक्षं रोपयति······वर्धयति······ कुसुमोद्गमस्य प्रहरं च प्रतिपालयति। शून्यमन्दिरं परिष्करोति। पुनश्च सज्जीकरोति। सन्न्यासिनां कृते अग्निचयनं करोति। भस्मानि वितरति। अभ्यागतान् च सत्करोति।

सायंकाले शुभाङ्कः पूजनमायोजयति। प्रवचनस्य प्रारूपं निरूपयति। सन्न्यासिनां शुभाशुभं जिज्ञासते। गुरून् शुश्रूषते। सन्देहं च परिपृच्छति अन्ततो मुक्तभावेन हृदयं निवेदयति। ततः शय्यायां नेत्रं निमीलति।

ततो भासते······धूमराशिः······आश्रमस्य प्रतिकोणम् अग्नि-संचयनस्य प्रचलितव्यवहारः······कमण्डलुजलस्य आबद्धतरङ्गः······ दण्डायितसन्दंशस्य साङ्केतिकसाक्षिस्वभावः······भस्मविलेपितदेहे कौपीनसर्वस्वो मौनी······पुनश्च पर्यटकीया क्लान्तिः···।
निशा मौनपीयूषा।
जागरणे प्रीतिधर आश्रमः। उपरि तारका शून्यरसिका। परितो विजनता अभिसारिका। प्रतीक्षास्वभावे तमसा स्वयं विभीषिका। होमसंस्कृतिः वैराग्य-वैष्णवी। जपक्रमः रुचिशीलः। विजातीयध्वनि-स्तोमः अनन्तरभावे परिवर्तनस्य सामग्रीं संचिनोति।

शुभाङ्कमनसि अतीतस्य स्मृतिलिपिः। स प्रथमतया पितृभ्यां सह अत्र आगतः। यदा आश्रमस्य आभोगं प्रविष्टः तदा मुग्धः संजातः। आकुलतया स कुसुमवनं प्रति अधावत्। अतीव प्रसन्नोऽभूत्।

मुक्तभावेन इतस्ततः समचरत्। तदानीं न कोऽपि तं वारितवान्। किन्तु सहसा पिता विरक्तिभावं सूचयन् दमयितुमारभत।

— शुभाङ्क! किमेतद् भवति? किमिदं गृहम्?

ततः कश्चन कौपीनधारी सरलगिरा अवदत्।

— नान्यथा चिन्तयन्तु। बाला हि कुसुमसमप्रकृतिकाः।

कुलभद्रो नम्रः संजातः।

— नहि···। न तेन एतत् कर्त्तव्यम्। आश्रमपदमिदम्।

—भवतु···। अतिथीनां स्वागताय एव एतत्।

कुलभद्रस्य दृष्टिः शुभाङ्कोपरि आसीत्। पुनः स आदिष्टवान्।

—शुभाङ्क! न तत् चेतव्यम्।

तदानीं शुभाङ्कः कति पुष्पाणि अव- चितवान्।

कुलभद्र व्यस्तः संजातः।

—पश्यतु···पश्यतु···, इदानीं स उपवनं नाशयिष्यति। कृपया कियन्ति पुष्पाणि दत्त्वा तं निवारयतु।

रहस्यमयहास्ये कौपीनधारी उदासीनः संजातः।

—कियन्ति वा स चेष्यति? कियद् वा नाशयिष्यति? नूनं वितृष्णो भूत्वा प्रत्यागमिस्यति।

वचनमुखेन कौपीनधारी शुभाङ्कमुपगतः। तेन सह च कानिचन जरत्पुष्पाणि अवाचिनोत्। तत् सर्वं तस्मै दातुमुपक्रान्तः। किंतु शुभाङ्कस्य हस्ते स्थानं रिक्तं नासीत्। तथापि एतद्रष्ट्वा स प्रमुदितः। हर्षेण च अवदत्।

— सर्वम् आनयतु। आगच्छतु······आगच्छतु मत्पश्चात्।

शुभाङ्कः क्रमशः मन्दिरसमीपं गतः। तत्र च चत्वरे सर्वं संस्थापितवान्। जरत्पुष्पाणि पृथक् कृत्य तस्मै पुनरर्पितवान्।

— गृह्णातु···। देवोपरि भवान् तत् समर्पियष्यति। अहं च एतत् समर्पयिष्यामि।

कौपीनधारी अहसत्।

— अत्र देवो नास्ति ।

— किमस्ति…?

— शून्यमन्दिरम् ।

— शून्यमस्ति ? भवतु… । तदुपरि…।

शुभाङ्कः हासमुखेन तत्र अधावत् । कुलभद्रः विस्मितः । शन्नोदेवी मनोमग्ना । मनो विभु । मनः अणु । यदा तत् आत्मनि निमज्जति तदा सुषुप्तिः । यदा च ततो निःसरति तदा विज्ञानोत्पत्तिः । यदा तस्मिन् लीयते तदा उपलब्धिः । उपलब्धिर्नाम साक्षात्कारः । साक्षात्कारः…आस्थानस्य…संस्थानस्य …‥अधिष्ठानस्य……।

इदानीमपि शुभाङ्कः अनुभवति—उद्यानेऽस्मिन् नाना पुष्पाणि विकसन्ति । सौन्दर्यं वितन्वन्ति । एषु न गुरुलघुग्लानिः, न वा अल्प-वृहदभिमानम् । न वा ते परस्परमार्गरोधे स्पर्धालवः । एषु संघर्षो वर्त्तते । किन्तु प्रतिपक्षता नास्ति । तथैवाऽत्र निर्झराणां प्रवाहः । ते सदा पुरः सरन्ति । परं न कोऽपि कस्य मार्गं प्रतिरुणद्धि । अपरं तु सम्मील्य प्रवहन्ति…तावत् यावत् समुद्रो नाधिगतः । स्पर्धाऽत्र कीदृशी ? इह वटद्रुमो महान् । नाना दिग्देशात् आगत्य पक्षिणोऽत्र निवसन्ति । नानाकाराः नानावर्णास्ते । सौमनस्ये क्रीडन्ति । वैमनस्ये कलहायन्ते । किन्तु न कश्चित् वृक्षं छिनत्ति भिनत्ति वा । कीदृशीयं जीवनधारा ? मनुष्यस्तु यत्र गच्छति तत्र प्रथमतो निजवसतिं दूषयति । प्रभुत्वं न्यस्यति । अधिकारं द्रढयति । यत् रुचिरं पश्यति तत् निजसात्कर्त्तुं सीमाङ्कनं करोति । अन्ततः अहंकारे निमज्ज्य वास-स्थानमपि अवधूय यायावरायते । ततश्च मनोविकारे अनुभवः शून्य-गर्भः । संस्कारो विपरीतक्रमः । त्रैकालिकसंसर्गो निष्प्रतियोगिकः । उपार्कः स्फूर्तिमान् ।

तदर्थं ऋतोदरा उपवनस्य रचनाचर्चा । कुसुमलीला च मौलिकी कला । रूपरहस्ये रमणीयता पुनः सनातनगीतिः । तस्य च व्याप्तिं बहुवर्णयति नीलनगस्य विशालसुषमा । पुलकं च पिञ्जयति स्मृति-पुञ्जस्य क्रमच्युतप्रभा—

एकदा आश्रममुपगतः कश्चित् कुलीनः । नाम्ना उपकण्ठः । प्रभावशाली स उत्तरवयस्कः । सपरिवारः सः अवसरविनोदने व्रती आसीत् । आश्रमपरिदर्शने तस्य आभिजात्यं वर्धयति स्म कन्या अभिधा । साक्षादेका निरुपमवाक्यशिखा···अभिषेकस्य तिलकलेखा ·· तर्पणस्य विशुद्धमालिका···चन्द्रशालायां वलयकलिता एका अविमृष्ट-पारावतपालिका······ । सेयं रूपयति उपवनम् उपार्कसम्मुखे ।

उपार्कस्य निविष्टनयने संप्रति अभिधा एका श्लेषकथा । दीर्घ-केशे तस्या लहरीमाहरति आश्रमसरः । आज्यपात्रस्य होमसंपर्कं सूचयति नयनधारः । पल्लवविधाने अधरं प्रथते सहकारः । चरण-चिह्नम् अवचिनोति आश्रमस्य रजःप्रसरः । निजनिमज्जनं विजनयति तस्या वेशप्रकारः ।

तदानीं शुभाङ्कोऽपि निकटे उपस्थित आसीत् । किन्तु अभिधा उपार्कमुपगम्य अपृच्छत् ।

—भवान् अत्र कियत्कालं स्थास्यति ?

उपार्कः सरलभावेन अवदत् ।

—न चिरम् ।

अभिधा अस्फुटमहसत् ।

उपार्कः अपृच्छत् ।

— किंतु भवती ?

— न चिरम् । तथापि उपवनमिदम् उपभोक्तव्यं खलु ?

— नूनम्······।

— तर्हि,······तावत् पर्यन्तम् ।

ततः सा शुभाङ्कमुपगता । मन्दं च अहसत् ।

— भवान् अत्र······?

— कर्मसमाप्तिपर्यन्तं निवस्तुं मे योजना ।

— कदा समाप्तिः भवेत् ?

— यदा भवत्या उपभोगसमाप्तिः ।

अभिधा चकिता ।

— अहो, चतुरो भवान् !

— नहि, आतुरः ।

अभिधा मनाक् विस्मिता ।

— किम्भूतः······?

— यथेच्छं चिन्त्यताम् ।

— दुःखातुरः सुखातुरो वा ?

— उभयथा······।

— तर्हि, व्यथातुरः······?

— नहि, कथातुरः ।

अभिधा विरक्ता अभूत् । उपेक्षया अन्यत्र प्रस्थिता । शुभाङ्कः भृशमहसत् । उपार्कः हास्यमुपसंहृत्य तामन्वसरत् । तस्याः पितरं मातरं च आश्रमविषये बोधयितुमारभत । इतस्ततश्च अदर्शयत् । यथारुचि वस्तूनां गुरुत्वं प्रत्यपादयत् । आश्रमस्य इतिहासं व्याहरत् । गुरूणां महत्त्वं व्यवृणोत् । अन्ततः विसर्जनवेलायां स एव आतिथेय आसीत् । तदा विसर्जनवचनच्छलेन अभिधा अपृच्छत् ।

— किं स भवदीयोबन्धुः ।

— सहाध्यायी······नाम्ना शुभाङ्कः ।

— भवान्······।

— उपार्कः ।

— शोभनम्······।

अभिधा अहसत् ।

सामान्यपरिपृच्छातले इदानीमपि अभिधा उभयोः विवादीया तरुणी । शुभाङ्कस्य मनस्तन्त्रे सैव प्रथमा तंत्री । सैव अनुभव-विश्लेषणस्य आधारशिला । सकलप्रतिभाने सैव वीजारण्ययोः स्नेहसमाहारः । आरम्भलिपिरचनायां सैव संसारस्य दायभारः ।

शुभाङ्कतर्कणायां विदग्धबोधः ।

एकत्र अभिधा। अन्यत्र मन्दिरस्य शून्यभावः। अनुभवसमन्वये तु पदार्थायते अभावः। नायं भावविरोधी। न वा भावप्रतिलिपिः। न तु वा परकीयस्वभावः। न पुनः सत्ताबोधविधुरः। न कदाचिदयं भावभिन्नः। परम् अतिरिक्तः। विरहसादृश्ये अभूतपरिकल्पः। विभुभावे ऋतरूप.।

अद्य पुनः कुलभद्र आश्रमस्य अतिथिः।

पार्श्वे तस्य प्रियतमा अवनी। तस्या एव मनः परिवर्त्तयितुं कुलभद्रः तामिह आनीतवान्। तस्य आभिमुख्ये तु कार्यद्वयम्—पुत्रस्य दर्शनं भवेत्। पत्न्या अपि मनःपरिवर्त्तनं भवेत्। अतः प्रथमतः स विद्यार्थि-निवासे उपस्थितः। उभयमेकत्र विलोक्य शुभाङ्कः हर्षमुपगतः। गृहाचारं पुरस्कृत्य स प्रणतवान्। अवनीनयने आनन्दस्य अश्रु उच्छलितम्। कुलभद्रो गद्गदः संजातः।

शुभाङ्कः अपृच्छत्।

— गृहे सर्वे कुशलिनः? ज्येष्ठमाता कीदृशी अस्ति? अनन्तः कथं वर्त्तते?

अवनी स्मितमुखेन अवदत्।

— सर्वे कुशलिनः। त्वमिह तु शुष्कः प्रतीयसे। किमभूत्…? स्वास्थ्यं समीचीनमस्ति वा?

— हम्…। समीचीनम्।

— अध्ययनभारः अधिको भवति वा?

— नहि।

— तर्हि, उदासीनः कथम्?

— नाऽहमुदासीनः। तव नयने दिनव्यवधानमस्ति खलु! तदर्थमित्थं प्रतीतिः भवति।

— किमत्र भोजनादीनां व्यवस्था…?

शुभाङ्कः वचनमिदं प्रतिरुध्य अवदत्।

— नहि, सर्वमत्र शोभनम्।

कुलभद्रः किंचित् चिन्तित आसीत्।

— अपि सन्निहिता अत्र गुरुचरणाः ?

— हम्… । सन्त्येव ।

— दर्शनं मिलिष्यति वा ?

— अहं पश्यामि, कस्तत्र वर्तते ?

— माऽस्तु । मिलित्वा गमिष्यामः ।

कुलभद्रः पुरः सृतः । पुत्रेण सह अवनो तमनुसृतवती । शून्यमन्दिरस्य अपरपार्श्वे गुरुनिवासः गुहायते । द्वारपार्श्वे गैरिककौपीनं परिशुष्यति। मुक्तकौपीनः अलेखः प्राकृतिकः । योगमुद्रायां च आसीनः । सहसा कश्चित् सन्न्यासी कौपीनं समर्प्य अभ्यागतस्य आगमनं सूचितवान्। अलेखः शनै अतिथिभवनम् आगतवान् । प्रणामपुरःसरं दम्पती विनीतौ । शुभाङ्क बहिः प्रतीक्षार्थं पित्रोरादेशं प्रार्थितवान् । कुलभद्रः अलेखस्य मुखं पश्यन् स्थिरः ।

अलेखः अनुमतवान् ।

— अस्तु ।

शुभाङ्कः प्रस्थितः ।

अलेखः कुशलमभ्यलषत् ।

— कुशलिनः सन्तु ।

कुलभद्रः अनुनयो ।

— किंचित् वक्तव्यं प्रार्थयामि ।

अलेखः प्रसन्नः ।

— कथयतु ।

अवनी निवेदितवती ।

— ज्येष्ठदेवी अत्यन्तमुन्मादिनी । सा इच्छति ऐषम. पुत्रस्य विवाहो भवतु । निकटग्रामे अस्ति कश्चित् श्रेष्ठी । कुलीनः सः । उपकण्ठ इति नाम । तस्य च एकैव कन्या…अभिधा इति । तामेव ज्येष्ठदेवी इच्छति । उपकण्ठोऽपि एतदर्थं बहुवारमागच्छति । ज्येष्ठदेवीं च प्रचोदयति ।

— ततः… ?

— उत्कण्ठो वदति, 'अनेनैव विवाहेन तस्य कुलरक्षा भवेत्' । पुनश्च अनुमोदयति, शुभाङ्कः यत्र इच्छेत् कत्र निवस्तुं प्रभवेत् । अयमधिकारः शुभाङ्कस्य एव ।

अलेखः अहसत् ।

— तर्हि···, भवती इच्छति, 'उभयस्य कुलरक्षा भवतु' ।

— तदेव ।

— किमिच्छति कुलभद्रः ?

कुलभद्रो नम्रः ।

— भवान् सर्वं जानाति । ज्येष्ठदेव्या इच्छा तु मम इच्छैव ।

अलेखः पुनरहसत् ।

— शुभाङ्कस्य बन्धनं वा विमोचनमिच्छति भवान् ?

— यथाज्ञा भवेत् ।

अलेखः किंचित् चिन्तितः । पर्यटकमनसि तस्य संलग्नः अद्यतन सन्दर्भः ।······विवाहो नाम कतिपयसामग्रीणां स्थानान्तरीकरणम् । गृहतः अपरगृहम्···देशतो देशान्तरम् । तदनु न्यूनीभावः । पुनस्तदर्थं विक्लववोधः । ततः संपर्कः कलहमलिनः ।

अलेखस्य नीरवभावमालक्ष्य अवनी प्राथितवती ।

— पुत्रः वहिः प्रतीक्षते । तेन सह आश्रमदर्शनाय······

— गच्छतु भवती । यथेच्छं परिपश्यतु ।

अवनी शनैः उत्थाय वहिरागतवती । शुभाङ्कः सहर्षमपृच्छ ।

— पिता······?

— चर्चते । अहं तु परिदर्शनाभिलाषेण आगतवती । किमत्र विशिष्टम् ? परिदर्शय माम्······

मात्रा सह संप्रति दूरविरहं परिपूरयति शुभाङ्कः । अपि समीपे पुत्रमासाद्य गौरवान्विता । मधुरमनोरथे उभावपि प्रसन्नौ । शुभाङ्कः इतिहासमुदाहृत्य प्रतिपदम् आश्रमस्य वैशिष्ट्यं प्रतिपादयति । पुत्रस्य ज्ञानगुरुत्वं समुपलभ्य अवनी उत्फुल्ला भवति ।

कुलभद्रस्तु अलेखनिकटे मुग्धवाक् ।

— महात्मन् ! शुभाङ्को मे प्रियतमः । स एव शन्नोदेव्या द्वितीय-जीवनम् । तस्य मुखं दृष्ट्वा वयहिम सुखिनः । यदि विवाहनिमित्तं भवतः अनुमोदनं न स्यात् तर्हि शन्नोदेवी जीवनं न धारयिष्यति ।

कुलभद्रः विह्वलः संजातः ।

अलेख आश्वासितवान् ।

— अनुरोधम् अनुमोदयामि ।

वाष्पगद्गदः कुलभद्रः अलेखस्य चरणोपरि मस्तकं निधाय भृशं व्यलपत् ।

अलेखः सान्त्वनामुखेन अवोधयत् ।

— शान्तो भवतु भवान् । सन्मार्गगामी भवतु । पश्यतु, सर्वस्य विच्युतिः सम्भवेत् । सत्यस्य तु च्युतिर्नास्ति । सत्यं हि जीवने एकैव नीतिः । तामेव परिपालयतु । सर्वं समञ्जसं भूयात् ।

कुलभद्रः प्रकृतिस्थः संजातः । सामान्यसन्दर्भे उज्जीवितः प्रतिज्ञापितो दिवसः । तद्दिने स शुभाङ्कनिमित्तं कियान्न प्रार्थनाकातर आसीत् ? तस्य च जीवनरक्षार्थं तमपि समर्पितवान् । असहायमुहूर्ते तस्मिन् संकल्पो द्रढीयान् आसीत् । प्रवृतिप्रकारः सत्यकाम आसीत् । अभिप्राय उत्सर्गप्रिय आसीत्……पुत्रो मे नारकीयः कश्चित् नरो न भवतु । स भवतु महात्मा……उदारचरितः कश्चित् समदर्शी । त्रितापस्य ऊर्ध्वे स्थित्वा स कालजयी भवतु । सनातनस्य करुणाधारा तस्य पथप्रदर्शिका भवतु ।

अद्य तु वात्सल्यनिविडहृदये तस्य प्रलिप्तटिप्पणी - पुत्रोऽयं मम । मम सेवां करिष्यति । मम गौरवं प्रथयिष्यति । ममादर्शेन कुलोज्ज्वलं करिष्यति । मम च आभिजात्यं वर्धयिष्यति ।

कुलभद्रः प्रस्थानानुमतः ।

किन्तु अवनीशुभाङ्कयोः व्यवहारे स चमत्कृतः वात्सल्यगौरवा अवनी नदीमुखे साक्षादेका ऊर्मियूथिका । शुभाङ्कस्तु सन्तरणस्नेही मीननायकः । उभयोश्च जलीयान् कश्चित् संपर्कः अनन्तप्रेमी । किम्

अवनी परिवर्त्तिता ? नूनम् । सा जननी । स्वयं क्षीरलोतकयोः अविनामूर्तिः । अनुगमसंगमयोः मुग्धसमाहुतिः । प्रभुविभुमध्यस्था काचित् प्रणयप्रकृतिः ।

विसर्जनं निवेद्य शुभाङ्को निवर्त्तितः ।

प्रस्थानसरणिमुपगतः कुलभद्रः । अवनी प्रसन्ना आसीत् । कुलभद्रः किंचित् विचिन्त्य अवदत् ।

— तर्हि किं करिष्यामः ?

अवनी न्यरूपयत् ।

— ज्येष्ठदेवीचिन्तानुरूपं कार्यं भवतु ।

— विवाहदिवसः अवधारणीयः खलु ?

-- तत्र का चिन्ता ? उपकण्ठेन सह वार्तालापः कर्त्तव्यः ।

— तदर्थं प्रथमतः सन्देशः प्रेषणीयः ।

— भवतु……।

— किन्तु विवाहानन्तरम्… ..

— शुभाङ्कः तत्र स्थास्यति ।

— कुत्र……?

— उपकण्ठस्य गृहे……।

— अवनी ?

— उपकण्ठ एकाकी । पुनश्च तस्य अपरिमिता सम्पत्तिः । तत्र स्थित्वा शुभाङ्कः दायित्वं निभालयतु ।

— अवनि…!

— अत्र द्विधा कथम् ? वर्षद्वयानन्तरम् अनन्तोऽपि समर्थः स्यात् । सर्वमत्र स सम्यक् चालयिष्यति ।

— अनन्तः……?

— नूनमेव ।

— किन्तु शुभाङ्को मे ज्येष्ठपुत्रः……।

— भवतु नाम । न तत् संपर्कं प्रतिरुणध्मि ।

— नैतन्मे रोचते ।

— किं तर्हि, उपकण्ठस्य गृहे स्थित्वा सः कनिष्ठः स्यात् ?
— नैव । नैतन्मे तात्पर्यम् ।
— ज्येष्ठ इति किं स सर्वस्य प्रभुः स्यात् ?
— न तद् वच्मि ।
— तर्हि, किं कथयति ?
— अनन्तस्य चिन्ता तु पश्चात् करिष्यते ।
— किमर्थम् ? स पश्चाज्जात इति हेतोः ?
— नहि……। ज्येष्ठस्य सम्मानं तु अस्माकं परम्परा ।
— तर्हि… …, कनिष्ठो हेयः ?
— नैतेन तस्य अवमानम् । न वा अपमानम् । किन्तु कनिष्ठस्य मर्यादा भिन्ना ।
— नाऽहं किंचित् श्रोतुमिच्छामि । अहं गृहिणी । यन्मे रुचिः तदेव भविष्यति ।
— कथमेतत् स्यात् ?
— तदर्थमुपाय उपस्थापयिष्यते ।
— नैव ··नैव···। भाविनि काले भ्रातृविवादनिमित्तं त्वमेव कारणं भविष्यसि ।
— तर्हि, अनन्तः किं दासीपुत्रः ?
— मैवं वद, अवनि……।
— पश्यतु, अनन्तो यदि हेयो भवेत् तर्हि विवादाय भवान् एव कारणं स्यात् ।
— अवनि……। कथं सदा अनर्थमुपस्थापसि ? नैतत् शोभनम् । सम्यक् चिन्तय……। सम्यक् विचारय……।

कुलभद्रस्य विकृतमुखं विलोक्य अवनी अवनता । कोपमवदम्य कुलभद्रः किंचित् पराङ्मुखः संजातः । दीर्घश्वासे तस्य तालममेलयत् शन्नोदेवी । तस्याश्च गोपनभाषितं संप्रति पुनर्जीवति—पश्यतु, इत्थं पीडिताऽहं भवन्नयनतः अपैष्यामि । भवानेव शुभाङ्कस्य पिता, माता अपि । बालो मे मदीयस्नेहं न प्राप्तवान् । तथापि, तदर्थं भवतः

स्नेहाभावो न भवतु। अन्यथा पुत्रो मे कुलस्य कलङ्को भवेत्।

कुलभद्रः तदा उदासीन आसीत्। सजलनयना शन्नोदेवी सतृष्णमवदत्—'मम देहं संस्पृश्य प्रतिश्रृणोतु। वचनमिदं रक्षिष्यति नु ?' कुलभद्रः तदा सत्यबद्धः संजातः—'न कदाचित् शुभाङ्क उपेक्ष्यो भवेत्। सत्यं मे वचनम्। नेदम् अन्यथा भवेत्।

कुलभद्रो विमर्शविलीनः।

किम् अवनी छलनया शुभाङ्केन सह व्यवहरति ? विषकुम्भपयोमुखेन वात्सल्यं वितरति ? हास्यमुखेन प्रभुत्वं विशदयति ? अथवा अभिनयेन प्रौढिं प्रख्यापयति ? अहो, व्यवहारवृत्तिः। मुखमनसोः कियन्न व्यवधानम् ? हृदयं च कियन्न संकीर्णम् ? उदात्तचरिते कियती न विच्युतिः ?

चिन्ताकान्तारे प्रस्थानसरणिः ह्रस्वापन्नः। दाम्पत्यमौनम् अङ्गीकृतवती दिवसस्य विश्लथरतिः। छायां तमीकृतवती दूरपर्वतस्य कटितटी। सायन्तनसामञ्जस्यं व्यभिचरितवती नैशस्पृहा।

अवनी वेगं पर्यवर्त्तयत्।

इदानीं भारो लघुः। कुलीनता प्राकृतिकी। सुप्तिरेव मुक्तिः। विस्मृतिश्च शान्तिः। अञ्चलपरिमले रङ्गविभवः सङ्गशून्यः। पातिव्रत्यप्रकरणे अङ्गतरङ्गः पङ्गुः। वयो हि तारुण्यावरोहे कण्ठलग्नम्।

समयस्फुरणायाम् अभिधा कादम्बिनी।

प्राचुर्यस्य अन्तःकरणे सा अभावमेव आविष्करोति। परितः परिचारिकाः। पार्श्वे विश्वस्ता धात्री। परामर्शस्थाने वृद्धपिता उपकण्ठः। माता तु सद्यो दिवंगता। तदीया स्मृतिः पिताकन्ययाः पुण्यचर्चा। मन्नातुरभिलाषपूरणाय पिता वरचयने पर्यटकः। सा स्वयमपि स्वप्नराज्ये परिव्राजिका।

विपयं विना सत्यं तु अप्रकाशमेव। तथापि अभिधा प्रकाशस्य सौख्यमनुभवति। स्पन्दनम् आस्वादयति। आत्मनि पुलकं पिञ्जयति।

किमपि निराकारं साकारीकरोति। ततः प्रतीक्षते। प्रतीक्षापरिभवेऽपि परिवेशः तस्या मातृत्वम् उद्रेचयति। श्रवण च अन्वर्थतामिच्छति शिशुव्याकरणस्य प्रथमव्याहृतिः 'मा···ता···'।

परिचारिका विज्ञापितवती।

—कश्चित् दर्शनमिच्छति।

अभिधा चञ्चला अभूत्।

—पितुः दर्शनम्··· ?

—न जाने···।

—भवतु। तं प्रवेशय। सभाजनगृहे च उपवेशय। अभिधा दर्पणसम्मुखे अङ्गरागं निरीक्ष्य वेशवसनं च सज्जीकृत्य सभाजनगृहं प्रविष्टा। किंचित् गम्भीरभावेन अपृच्छत्।

—कमन्वेषयति भवान् ?

—पितृपादाः सन्ति गृहे ?

—न सन्ति···।

—तर्हि, कदा साक्षात्कारः सम्भवेत् ?

– श्वः आगच्छतु।

—कः समयः ?

—अपराह्णे आगच्छतु। किंचित् निवेदनीयमासीत् ?

—अस्त्येव।

— तर्हि, कथयतु। अहं निवेदयिष्यामि।

—उपार्कः चिन्तामग्नः।

अभिधा अपृच्छत्

—भवतः परिचयः ?

—अहम् उपार्कः।

—अरे···, भवान्···वनवासी···?

—नहि, आश्रमवासी।

—हम्···, सम्यक् स्मरामि। तस्यैव उपवनस्य अन्तिमाश्रमे खलु ?

—नहि, प्रथमाश्रमे।

—मन्ये, उपवनस्य अन्त्याश्रमः सः ।

—नहि, अन्तिकाश्रमः ।

—भवेत्··· । सर्वं तु विस्मृतं मया । इदानीं स्मारितम् । अस्तु··· । कथं वर्त्तते भवतः सुहृत् ?

—सम्यक् ।

—अतीव चतुरः सः ।

—सत्यम् ।

—भवानपि तथा ।

अभिधा अहसत् ।

—अस्तु··· । तमानीय कदाचित् आगच्छतु ।

—नूनम्···आगमिष्यामः ।

समयेऽस्मिन् उपाहारमानीय धात्री उपस्थिता । चत्वरिकायां सज्जीकृत्य सविनयं प्रसारितवती । अभिधा आतिथेयीवचनेन न्यवेदयत् ।

—गृह्णातु ।

कुलीनपरिचर्यायां नितराम् अभिभूत उपार्कः । स मनाक् उपहारं मनाक् च अभिधां विलोक्य तटस्थः । विलोकने तस्य विलिम्पिता किंचित् सौन्दर्यतृष्णा···स्तोकम् अनुरक्तिः । पुनश्च प्रहेलिका अभूत् अभिधाया मुखाकृतिः । तस्याः स्मिते संलग्नं मनः । नग्नं च हृदयम् ।

पर्वतचरणे विहरति शुभाङ्कः । स्थावरजङ्गमयोः सङ्गमं चिन्तयन् स विभुप्राणः । विशालविग्रहे पर्वतोऽयं स्थावरः । सत्यप्रख्यापनाय किम् अभिशप्तोऽयं नटवरः ? अथवा न्यायप्रतीक्षायाम् अभियुक्तः कश्चित् दण्डितकलेवरः ? किंवा वैशाल्यवितरणाय साक्षी कश्चित् मुमुक्षुप्रवरः ? अथवा कालान्तरप्रणयी कश्चित् कामनाजर्जरः ?

स्मितमुखेन उपगत उपार्कः । अनुमितिमुपन्यस्य शुभाङ्कः तरलितः । उभयस्य मिश्रहास्ये अभिधाऽभूत् अर्थप्रकृतिः । शुभाङ्कः सस्नेहमपृच्छत् ।

—का वार्त्ता··· ?

—निमन्त्रणमस्ति ।

—कस्य··· ? कदा··· ?

—तस्याः··· । यदा कदाऽपि ।

—भवतु एकदा ।

—दिनं निश्चिनुहि ।

—पश्चात्··· ।

—कथं पश्चात् ? इदानीम्···

—नायं कालः ।

उपार्कः विरतः । अभिधायाः स्मृतिनेपथ्ये पुनरङ्कुरिता एका विजनस्मृतिः । अस्मिन्नेव गिरिचरणे उपार्कशुभाङ्कयोः प्रथममैत्री अन्तरङ्गा अभूत् । उभयहृदये अत्रैव वासन्तिकमिलनं सामीप्यमाहरत् । इहैव उभयोः मिश्रभावः बन्धनविन्दुं दृढीकृतवान् । तदानीं सत्यपा उभयोरात्मा ऐक्यापन्नः ।

शुभाङ्कः अवदत् ।

—बन्धो ! भावोऽयं चिराय जीवतु ।

उपार्कः भावगद्गद आसीत् ।

—नहि । एतावति न समापय । मनुष्यो विकृतवाक् । मनश्च विस्मृतिशीलम् । वचनं स्खलनप्रियम् ।

—तर्हि, किं करिष्यामः ?

—सत्यमेव साक्षीकुरु ।

—सत्यं नाम वचनमेव ।

—तदेव भवतु ।

—तर्हि, कथय ।

—अहं सत्यमुखेन शपथं करोमि ।

—किम्··· ?

—त्वं यदा यच्च कामयिष्यसे तदहं पूरयिष्यामि ।

—अहमपि तव कामनां पूरयिष्यामि । सत्यमिदं मे वचनम् । सत्यम् ···सत्यम्···सत्यम् ।

सत्यवचनस्य अन्तराले उभयोरीप्सितम् अद्य निरभिधेयम् । तथापि सौहृदं सहोदरीयम् । सौमनस्यं च निसर्गमधुरम् ।

समयः सन्दर्भगर्भः ।

प्रव्रज्यातः प्रत्यागतः अलेखः । संप्रति ग्रीष्मकालः पर्यटनार्थं नानुकूलः । अतः कियत्कालमत्र स्थित्वा स आश्रमस्य कार्यक्रमविषये चर्चां करिष्यति । आश्रमस्य विविधप्रकल्पमवलम्ब्य विचारविनिमयं करिष्यति । जनपदतः कुलीनान्, अभिजातानान् बुधान् च आहूय सम्मेलनं कारयिष्यति । विद्यार्थिनामुपकाराय विदुषामपि गोष्ठीमायोजयिष्यति । वार्षिकसमावर्त्तनस्य अनुष्ठानं कृत्वा उत्तीर्णान् संसाराय अनुमोदयिष्यति । वानप्रस्थानां स्वागतं करिष्यति । सन्न्यासिनां सम्मानं करिष्यति ।

गृहस्थानां दानेन अयम् आश्रमः प्रतिष्ठितः । ते एव वानप्रस्थमङ्गीकृत्य अत्र निवसन्ति । सन्न्यासिनो भवन्ति । आश्रमस्य विभिन्नकर्मणि आत्मानं नियोजयन्ति । ते अत्र विद्यार्थिन आसन् । चरमे वयसि अत्रैव ते शान्तेरनुसन्धानं कुर्वन्ति । शान्तिरेव चरमत्त्वम् मनुष्यसमाजकृते शारीरिकदैन्यं न तथा हनिकारकं यथा मानसिकदैन्यम् । दैहिकदारिद्र्यस्य उन्मूलनं न सर्वथा सम्भवेत् । उपशमस्तु भवेदेव । परं सति च मानसिकदैन्ये समग्रमपि जगत् ध्वंसमुखमभ्युपैति । तदर्थमत्र ज्ञानस्य प्राधान्यम् । ज्ञानमिह तु सदसद्विवेकः । स एव विमर्शविषयः । तदर्थं न केवलं चरमं वयः अपेक्ष्यते, अपितु मूलतो मनः तयैव दिशा प्रेरणीयं भवति । तदेव सुखम् । तदेव शान्तेः निदानम् ।

प्रज्ञा ऋतायते ।

अलेखो निविष्टः । अनुचिन्तने तस्य अभिज्ञानमेव वीजायते । इदमिह निजाभिज्ञानम् । आन्तरैक्यमस्मिन् ऋतम् । ऋतापन्नो हि

सर्वो भावः। अयम् अशेषः। अयम् अनेकः। अयम् आदिकल्पः। अयमपि इतिकल्पः। यावत्त्वमत्र तत्त्वम्। इदं भूतानां मधु। इदं प्रत्येकम् इदम् अमृतम्। इदं च सर्वीभवने विज्ञानम्।

मनः संयुनक्ति शुभाङ्कः।

— गुरुदेव !

श्रद्धान्वितः अलेखः व्यलोकयत्।

शुभाङ्कः वचनसमवेतः।

— आकारितोऽहम्……?

— हम्……।

— कुत्रचित् प्रव्रजनीयम्……?

— नहि……।

— आदिशतु।

— नास्ति नियोगः।

— तर्हि अनुगृह्णातु।

— माता ते अस्वस्था। पिता न स्वस्थहृदयः। अवसरेऽस्मिन् कदाचित् गृहं गत्वा उभयं प्रसादय।

— प्रतिश्रृणोमि।

— उपार्कः कुत्र ?

उपार्क उपगतः।

— अयमस्मि।

— सम्मेलनविषयो ज्ञातः खलु ?

— तदर्थम्……

— उपनिषद्य उच्यताम्।

— तदर्थमस्माभिः चिन्त्यते।

— समयो नास्ति। त्वरया कर्त्तव्यम्।

— तदर्थं केचन उपगन्तव्याः।

— भवतु नाम। कुलभद्रः……उपकण्ठः……अन्ये च अभिजाता आमन्त्रणीयाः तैः साकमपि विमर्शो विधेयः।

— अहं तु उपकण्ठमुपसृतवान् । परमप्राप्य प्रत्यागतः ।
— पुनः गम्यताम् । शुभाङ्कस्तु गृहं गमिष्यति । त्वम् एकाकी……
— चिन्ता माऽस्तु । मया सह शुभाङ्कः तत्र आगच्छतु । विमर्शानन्तरं स गृहं गमिष्यति । तेन सह अहं गत्वा तस्य पित्रा सह विमर्शं संपाद्य प्रत्यागमिष्यामि ।
— तथास्तु ।

अवनमनेन अनुग्रहं शिरसीकृतवान् उपार्कः । नेत्रसंकेतेन शुभाङ्कमिङ्गितवान् । तत उभौ शनैरपसृतौ ।

निष्पत्तिशरणम् अपराह्णम् ।

उपकण्ठः कर्मकुण्ठः । क्लान्तिबोधे जृम्भते सद्यो विमर्शः । एकाकी उपविश्य तत् सर्वं स स्मृतिपथमानयति । कुलभद्रस्य गृहं वारत्रयं गत्वा स प्रतिनिवृत्तः । न काऽपि निष्पत्तिः मनोऽनुकूला । कुलीनस्य परम्परामुररीकृत्य अवनी नाना विषयान् उपस्थापयति । कुलभद्रोऽपि निश्चित्य किमपि वक्तुं न प्रभवति । केवलं वदति, 'पुनः आगच्छतु'। एवं तु वारत्रयं संपन्नम् । तथापि विवाहदिननिश्चयो नाभूत् । पुनः कियद्वारं वा उपगन्तव्यम् ? सर्वमेतत् श्रुत्वा अभिधा किं चिन्तयिष्यति ? अन्यस्मै कस्मै वा निवेदनीयम् ? पुत्राधिकारिणस्तु स्वैरिणः । कन्यार्थी च कामनावशः । को वा समुदाचारः कन्याजनकानाम् ।

कालान्तररतितले अभिधामाता संप्रति केवलस्मृतिः । स्वप्ने सा अस्पृष्टप्रतीतिः । मनोबोधाय तस्याः तैलचित्रमपि रङ्गविहीनम्…… इङ्गितविहीनम्… । तथापि दृश्ये सैका आत्मीयरेखा । सौभाग्यशपथस्य अग्रपथे इदानीमपि सा प्रतिवचनं व्यवहितसाक्षिणी । निःसङ्गनिवेदने सैव अवलम्बनाय अग्रशिला ।

उपकण्ठो भावमग्नः ।

धात्री निवेदितवती ।

—केचन दर्शनार्थमागताः ।

उपकण्ठः किंचिदुत्सुकः ।

— को वा स्यात् ? नूनं कुलभद्रः । अथवा तदीया जनाः । भवतु··· । प्रवेशय···।

अभिवादनं निवेदितवान् उपार्कः ।

— अहम् उपार्कः । महात्मनः अलेखस्य आश्रमत आगतः । अय मम बन्धुः शुभाङ्कः ।

शुभाङ्कः प्रणतवान् ।

— अहमपि आश्रमतः ।

— अस्तु । आसनमलंकुर्वन्तु ।

उभौ उपविष्टौ । धात्री सविनयं निवेदितवती ।

— आदिशतु ।

— हम्··· । अभिधां वद···, 'अतिथयः समागताः' ।

धात्री प्रस्थिता । उपकण्ठः प्रसन्नचेतसा अपृच्छत् ।

— कथं सन्ति गुरवः ?

— कुशलाः··· ।

शुभाङ्कः नम्रवाक् संजातः ।

उपकण्ठः किंचित् परिचिन्वान इव अपृच्छत् ।

— मन्ये, कुत्र दृष्टपूर्वो भवान् ।

— आश्रमे··· ।

— कुत्रत्यो भवान् ?

— सुन्दरग्रामवास्तव्यः ।

उपकण्ठ उत्सुकः ।

— कस्य पुत्रः ?

— अभिजातकुलभद्रस्य··· ।

सहसा चकित उपकण्ठः । किन्तु हास्यरीत्या आलापं परिवर्त्तयितुम् आरब्धः ।

— ओ··· ! स मे परिचितपूर्वः । अस्तु··· । महान् सन्तोषः ।

ततः स उपार्कमपश्यत् ।

— को वाऽस्ति नियोगः गुरुपादानाम् ?

— पूर्ववत् ऐषमोऽपि स्नेहसम्मेलनं भवेत्

— तदर्थमागता भवन्तः। सम्यक्··· । कः कार्यक्रमः ?

उपार्कः कार्यक्रमस्य विवरणं विशदयितुम् आरब्धः। शुभाङ्क मध्ये मध्ये तदुपरि टिप्पणीमकरोत्।

इतो धात्री अभिधानिकटे अतिथिसमागमं निवेद्य निजकर्मणि व्यापृता। अभिधामनसि तु भाविश्वशुरकुलभद्रस्य प्रसङ्गः। तदेव विभाव्य सा विनीतवेशेन आत्मानं सज्जीकर्तुमारब्धा। विकीर्णमनस्तत्त्वे इदानीं सा विह्वला। कल्पनायां तस्या नानार्थसत्ता। कामनया साक्षात् सा मधुप्रिया। उद्वेगसंकलने पुनः पुनः निजविम्बं दर्पणे विलोक्य पितुरादेशमात्रं सा प्रतीक्षते।

धात्री शनैः सम्बोधितवती।

— कनीयसि··· !

— उँ··· !!

— पितृचरणा आकारयन्ति।

अभिधाहृदये स्पन्दनं प्रगुणितम्। सा तया सह शनैरागम्य सभाजनगृहं प्रविष्टा। अधोमुखी च दण्डायमाना अभूत्। कन्यायाः कातरभावमालक्ष्य उपकण्ठः तदीयमनोवृत्तं ज्ञातवान्। ततः तस्या उद्वेगमुपशमयन्निव अवदत्।

— अरे······! इमे अस्माकं जनाः।

अभिधा अपश्यत्।

उपार्कमुखे स्मितस्य लघुतरङ्गः। चतुररीत्या गम्भीरः। अभिधा आत्मनि लज्जिता। किन्तु लज्जां संयम्य प्रसन्नभङ्ग्या अवदत्।

— जाने······।

कन्यायाः संकोचं पुनरुपशमयन् उपकण्ठः व्यवृणोत्।

— किं जानासि ? यज्जानासि तन्न सम्यक्। अयं शुभाङ्कः······ कुलभद्रस्य पुत्रः। अयम् उपार्कः······।

— तमहं जाने। कियद्दिनेभ्यः पूर्वं सोऽत्र आगतवान्। भवन्तं च

अन्वेषयति स्म ।

— तर्हि अयं स जनः ?

— अयमेव । अपरोऽयं तस्य सुहृत् ।

— कथं ज्ञातवती ?

— तदानीम् आश्रमे अनेन सहाऽपि साक्षात्कारः संजातः ।

— भवतु……, सत्कारार्थं किमपि……

— धात्रीमाता भोजनगृहे सर्वं सज्जीकृतवती ।

— अस्तु……। गुरुचरणानां निमन्त्रणमस्ति । सम्मेलने उपस्थातव्यम् अस्माभिः ।

— अवश्यम् । इदानीं सर्वमगवतम् । एते आयोजकाः खलु ?

उपार्कः उत्सुकभावेन अवदत् ।

— भवादृशीनां पितृचरणा अस्माकं मार्गदर्शका एव ।

उपकण्ठः प्रशंसावचनस्य तात्पर्यम् अवगम्य अवदत् ।

— भवतु । किमपि न चिन्तयन्तु भवन्तः । निमन्त्रणमङ्गीकृतमिति गुरुभ्यो निवेदनीयम् । आगच्छतु……

उपकण्ठ उत्थाय भोजनगृहं प्रविष्टः । तमनुसरत् शुभाङ्कः उपार्कस्तु मन्थर आसीत् । अभिधाहृदये इदानीं शुभाङ्कस्य सरलदृष्टिः तीक्ष्णायते । पुनश्च उपार्कस्य उन्मुक्तविवृतिः मनसि लहरीयति । एकत्र समर्पणार्थम् आवेदनम् । अन्यत्र आयत्तीकरणाय आकर्षणम् । एकत्र उत्सर्गस्य आवाहनम् । अन्यत्र ग्रासस्य सम्मोहनम् । उभयमध्ये अभिधा नारीत्वसन्धानं करोति । सा एका नारी—सरलपेशल भावग्रन्थिः । न केवलं सा समर्पयति अपितु ग्रसते । ग्राससमर्पणयोः संज्ञा तत्कृते एव प्राकृतिकी ।

वन्धुद्वयस्य सौप्रस्थानिकं व्याहृतम् ।

आकाशे नक्षत्रराजिः । रात्रिः यथैका भयंकरी मूर्च्छा । संभोगस्य नानाशैली अस्या इतिकथा । उपभोगप्रकारे स्वादविधा अस्या नैमित्तिकी प्रथा । उपकण्ठमनसि इदानीं तु युगरङ्गो जीर्णः ।

तस्य अनुभवे 'अहम्' केवलान्वयी । अत्र कदाचित् लक्षणं न

व्याप्नोति चेत् क्वचित् अतिव्याप्नोति । विश्लेषणे 'अहम्' इति स्वाधीनतत्त्वम् । स्वतन्त्रता अस्य भूमिः । यदा अन्वेति तदा व्यापारः । तदा च कर्तृत्वम्……भोक्तृत्वम्……। यदा नान्वेति तदा ममकारः । ममकारो नाम संबन्धः । अत्राऽपि यतो नान्वेति तस्मात् 'अहम्' पृथक् तिष्ठति । परमिह पृथग्भावः तिरोभवति । ममकार इमम् अभिभवति । अभिभवो नाम न पराभवः । न वा पराधीनवृत्ति । केवलो नीचीभावः । अयं भावः क्षणिकः । तदनु निमज्जनपरिभवः । पुनरुन्मज्जनस्य अनुभवः । उन्मज्जने 'अहम्' स्वाधीनः । यदा स्वाधीनः तदा सुखम् । यदा च पराधीनः तदा दुःखम् । पराधीनोऽत्र ममकाराधीनः । ममकारश्च संसारः ।

मुक्तोदरा रजनी ।

निःसङ्गवलये उपकण्ठः शय्यालुण्ठितः । वातायने निम्ननभसो नक्षत्रप्रभा…उपवनस्य रुचिरुचिरसुरभिः…वातावरणस्य अनुष्ण आरोहः…। कालेऽस्मिन् जीवनधारा स्फुटतरा । जीवनं नाम इदानीं वितरणम् । भावाभावयोः विनिमय एव अस्मिन् उत्तरणसरणिः ।

को वा सन्देशः प्रेषणीयः ? इति विमृश्य कुलभद्र क्लान्तः । किं वा समाधानम् ? इति बहुवारं पृष्टाऽपि शन्नोदेवी सम्यक् वक्तुं न प्रभवति । तस्या एकैव कथा—'अवनी यद् वदति तदेव परिपालयतु' । कथमेतत् सम्भवेत् ? "शुभाङ्को मे भवतो गृहे तिष्ठतु" इति वा केन प्रकारेण उपकण्ठो बोधयितव्यः ? कथं वा स विषयेऽस्मिन् अनुरोधनीयो भवेत् ? अभिजातस्य मर्यादा किं धनाय एव ? उपकण्ठस्तु स्वयमेतन्न वदति । किन्तु कथं वा स साहसं कुर्यात् ? सोऽपि कुलीनः । तस्याऽपि सन्ततिरस्ति । तस्यां च स नितरामनुरक्तः । तस्या एव नाम्ना स सकलसम्पत्तिं समर्पयिष्यति । न तु शुभाङ्कनाम्ना । शुभाङ्कः तस्य पुत्रकल्पो भवेत् । न तु पुत्रः । 'शुभाङ्कः मम पुत्रः' इति तदर्थं मया किं करिष्यते ? अन्ततो विवाहनाम्ना दासवृत्तिनिमित्तं तमहं प्रेषयिष्यामि ? "पुत्रो दासो भवतु" इति किं पितुरभिलाषः स्यात् ? निजमर्यादां परित्यज्य पुत्रस्य किंकरीकरणं

किं पितृत्वस्य उत्कर्षं प्रतिपादयेत् ? धिगेतत् पितृत्वम् । नहि……, नैतत् सम्भवेत् । एवं मथ्यमानः कुलभद्रः उच्चैराकारितवान् ।

—को वर्त्तते ?

अवनी शनैरुदतरत् ।

—किमुच्यते ?

—अद्य सन्देशं प्रेषय ।

—कुत्र……?

—उपकण्ठस्य समीपम ।

—कः सन्देशः ?

—विवाहो नैव भविष्यति ।

—किमर्थम् ?

—नाधुना शुभकालः ।

—क एतद् वदति ? सर्वं सम्पन्नम् । दूत इदानीं यास्यति ।

—नहि । तं निवारय ।

—विषयेऽस्मिन् शुभाङ्कः अवश्यं प्रष्टव्यः ।

—कथं नोक्तं प्रागेतत् ? स तु सद्य एव आश्रमं प्रत्यागतः ।

—पुनस्तस्य आगमनं भवेत् ।

—इदानीं दूतः कुत्र यास्यति ? आश्रमम् अथवा उपकण्ठस्य गृहम्…

—दूत उपकण्ठस्य गृहं गच्छतु । निवेदयतु च, 'यावत् कालं पुत्रस्य नानुमोदनं तावन्न विवाहः ।'

—कथमेतद् भवेत् ? किं सः चिन्तयेत् ? पुत्रः किमस्माकं गृहे प्रभुः तस्येच्छया किमत्र सर्वं प्रचलति ?

—विवाहविषये तस्यानुमोदनं नूनमपेक्ष्यते ।

—पित्रोरनुमोदनमेव पुत्रस्य……।

—नैवं भवेत् । निष्पत्तिः हितकारिणी भवतु ।

—को वा अहितं वाञ्छति ? रुच्यनुसारं तु वयं न कुर्मः । अधिकारे यदस्माकं वर्त्तते तदेव कुर्मः ।

—विवाहे तु रुचिः तेषाम् । अधिकारस्य प्रसङ्गः कियान् अत्र ?

उपेक्षया अवनी निजप्रकोष्ठं प्रविष्टा । कुलभद्रः हतप्रभः । किंचित् च खिन्नः । निजविमर्शे स विप्रतिपन्नः । हताशमुहूर्ते हि जनः दर्शनं स्पृशति । जीवनं च विमृशति । ततः सैव स्थितावस्था । स्वयं स तदवस्थः ।

शन्नोदेवी शन्नैरुपस्थिता ।

— किं स्थिरीकृतम् ?

कुलभद्रो नीरवः ।

शन्नोदेवी वोधयति

—यद् भवतु नाम, कर्त्तव्यं यथाशीघ्रं निश्चिनोतु । अन्यथा उभयतो हानिः । सम्यक् विचारयतु ।

—सर्वं विचारितं देवि……। किन्तु विवाह इदादीं न सम्भवति ।

—तर्हि, अन्यदा चेत् तदपि निर्णयत् ।

कुलभद्रो विमनस्कः ।

शन्नोदेवी उदासीना । मनसि तस्याः पूर्व-संकल्पः—'जीवेमः शरदः शतम्' । अद्य तु रुग्णजीवने संकल्पो निष्फलः । शरत्कल्पना च वृथा । सौभाग्योदयस्य प्रतिश्रुतिरपि अस्तमेति । तथापि पुत्रस्य भाग्योदयकामनया इदानीं सा अवशेषायते । पुत्रार्थमेव तस्या अनेक-कामना आषाढनभसि यथा वलाकामालिका । किन्तु सम्मुखे अतथ्या-वली । पतिः विमुखः । सपत्नी बोधविक्लवा । पुत्रो दूरस्थः । वचन-विनिमये मर्यादा पारम्परिकी । कौलीन्यरीतिः न सांप्रतिकी । व्यवहारश्च पूर्वजानामेव क्रमरक्षी ।

अनन्त आकारितवान् ।

— मातः ! किं तत्र करोषि ?

शन्नोदेवी प्राकृतिस्था अभूत् ।

— अनुपदं गच्छामि ।

अनन्तसम्मुखे जननी शन्नोदेवी एका अपूर्वप्रतिमा । इदानीमपि दरपलितकपोलोपरि अवगुण्ठनस्य चित्रितधारः शोभामाहरति । अञ्चले स्नेहलाञ्छनम् । वचनं लालनपरिपाट्या पारिभाषिकम् । अनन्तः शनैरपृच्छत् ।

— मातः ! किमर्थं पिता विमनस्क ?

— अरे……, अनन्……! पिता इदानीं उत्तरवयस्कः । तथापि नाना कर्मसु व्यापृतः । विश्रामनिमित्तं समयः कुतः ?

— अग्रजस्तु संप्रति समर्थः । कथं तदुपरि भारो न न्यस्यते ?

— पिता तदेव चिन्तयति । किन्तु सोऽपि……

— अहमस्मि । प्रतिकार्यम् अग्रजस्य सहायो भविष्यामि ।

— सम्यक् । तदेव पितृसमीपे निवेदनीयम् ।

शन्नोदेवी अहसत् ।

अनन्त उत्साहितः । त्वरया च गृहान्तरमुपगतः । देहलीनिकटे दण्डायमानः सन् अपश्यत् माता अवनी कर्मणि व्यापृता । तस्या भ्रूकुञ्चने चिन्ताया दिग्वलयः । दृष्टिरीतिः गम्भीरा । कपाले विचारस्य कुटिलरेखा । नासाग्रे निष्पत्तिः द्रढीयसी ।

अनन्तः प्रकोष्ठं प्रविष्टः ।

— मातः ! किं चिन्तयसि ?

— न काऽपि चिन्ता ।

— व्यग्रा प्रतीयसे कथम् ?

— कर्म समापनीयं खलु ?

— किं कर्म……?

— गृहकर्म……वहिःकर्म……

— पिता सर्वं निभालयति । त्वं पुनः किं करोषि ?

— पिता तु अद्यत्वे न स्वस्थः ।

— कथम्……?

— इदानीं भारः अधिकः। तदर्थं चिन्ताऽपि अधिका। कर्म च अधिकम्। कियद् वा कर्तुं शक्यते ?

— अग्रजं कथं न नियोजयसि ?

— इदानीं तु स दूरस्थः।

— तर्हि, कथं न मां नियोजयसि ?

— तव सामर्थ्यं कुतः ?

— यावद् वर्त्तते तावत् करिष्यामि।

— नहि··· ··। तत् कथं भवेत् ? अग्रजोऽस्ति। स निभालयिष्यति विषयेऽस्मिन् तव चिन्ता माऽस्तु।

— कथं न ? इदानीं सर्वेऽपि गृहे चिन्ताकुला दृश्यन्ते। तदर्थं मम चिन्ता भवति।

— त्वं बालः। संप्रति कथं व्यापारेऽस्मिन् निमज्जसि ? याहि ·····, निजविषये मतिं कुरु।

कोपेन अनन्तः प्रकोष्ठान्निर्गतः। इतस्ततो जल्पन् पूजाप्रकोष्ठं गन्तुमुद्यतः। पश्चाद् अवनी आकारितवती।

— अनन्······! अनन्······!

विरक्तभावेन अनन्त उक्तवान्।

— किमर्थं शब्दापयसि ?

— अरे······! शृणु······।

— किम्······?

— आचिरमेव अग्रजस्य विवाहो भविता। तदर्थमस्माकम् आयोजनं भवति। अतः सर्वे वयं व्यापृताः।

सानन्दम् अनन्तः अपृच्छत्।

— एवं चेत् कथं न पूर्वम् उक्तवती ?

अवनी लालयन्तीव अवदत्।

— याहि·····। अनन्तरं सर्वं ज्ञास्यसि।

अनन्तः प्रत्यावृत्तः।

किन्तु मनसि तस्य शङ्का। शङ्कायां च काचित् पारिवारिक-गोपनीयता जालं प्रसारयितुमुद्यता। सः सन्देही संजातः। अनुसन्धाने च मतिं न्यस्तवान्। पुनश्च अन्वभवत्—परिवारे समेषाम् आलाप-सन्दर्भः पृथक् चेतनां जनयति। तदनु यत्नतः सत्यमाकलयितुं चिन्तितवान्।

प्रतीक्षा पक्षघातिनी।

उपार्कः व्याकुलः। प्रतिमुहूर्त्तम् अभिधा तस्य कार्यप्रसरं प्रतिरुणद्धि। मनसि सैव स्वप्नं जनयति। शरीरे च पुलकं सृजति। उपवनस्य कुसुमेषु, पल्लवेषु, प्ररोहेष्वपि सैव शोभामातनुते। उपवने मलयस्य लहरी तस्या एव अञ्चलतरङ्गं स्मारयति। उद्यानस्य लघु-मार्गाः नमद्गुल्मेषु तदर्थमेव निह्नुतिकेलिं सृजन्ति। सा यथाऽत्र उदेति तथा च अस्तमेति। किमत्र तत्त्वम्? स्मृतिम,त्रं वा? परिकल्पो वा?

उपार्कः चिन्तामग्नः।

सहभाव इह सत्यम्। सहभावोऽयं मिलनस्वभावः। अन्तर्भावः अत्र आदिपर्व। पराभवः अत्र महाभावः। आत्मनि अयं मार्दवः। वहिश्च नीरवविभवः। विषयोऽत्र कुसुमप्रभवः। हृद्योऽस्मिन् अनुभवः।

कौतूहलं जनयति सत्यम्। अतः सर्वेषां तत्र दृष्टिः। इदम् अर्धपिहितम्। अतः सुन्दरम्। इदं मेयम्। अतो वाच्यम्। इदम् अनन्तम्। अतः आनन्दमयम्। इदं बाधरहितम्। अतः त्रैकालिकम्। इदमानुभविकम्। अतः अव्यक्तम्।

उपार्को विशृंखलः।

निजपथे नेदानीं स एकाकी। तत्राऽपि प्रतिस्पर्धी कामयते शुभाङ्कः। स आत्मीयः। किन्तु स्पर्धालुः। तथापि सहृद्भाव उभयोः बन्धनम्। परमन्तरा अन्तरायः अभिधाविमर्शः।

कामनायाः पृष्ठभूमौ उपार्कः संकीर्णः। सम्मुखे संसारः सारायते। अभिधा च उपहारायते। परायते शुभाङ्कः। चिरायते गृहस्थस्य पदाङ्कः। वरायते कालः प्रीतिरङ्कः। नेतिकारे तु उपार्कः सशङ्कः।

विशङ्कते शुभाङ्कः।

कथं तोषणीया माता अवनीं ? केन प्रकारेण च पिता बोधनीयः ? शीर्णा जननी निरुपाया। अनुजोऽपि पर्याकुलः। परिवारे कलहवह्निः। सर्वे उद्विग्नाः। कुलमर्यादा विपन्ना। किं वा करणीयम् ? विपर्यस्तशुभाङ्कः व्याकुलभावेन उपार्कम् आकारितवान्।

— उपार्क……! उपार्क……!

शुभाङ्कस्य व्यग्रतामालक्ष्य उपार्कः अब्रवीत्।

— किम्……? किमभूत्……? किं चिन्तयसि ?

— कार्यमेकं करिष्यसि ?

— कि कार्यम् ?

— गृहं मे गन्तुं शक्नोषि ?

— किमर्थम्……?

— किंचन्निवेदनीयमस्ति।

— कथय……। नूनं गमिष्यामि।

— जनकं मे वद……

— किम्……?

— यथा कनिष्ठा माता वदति तथा मे मतिः।

— अरे……! स्पष्टं वद।

— यत् कनिष्ठा माता इच्छति तदेव भवतु।

— अरे ! किं सा इच्छति ? किं वा त्वमिच्छसि ? कथमहं जानीयाम्……?

— स्पष्टतायाः का आवश्यकता। एतावन् मात्रं वद……।

— एवं कथं भवेत् ? आवयोर्मध्ये अविश्वासः कथम् ?

— नहि……। एतावद् वद……।

— नैवं भवेत्। एतावति इयान् श्रमः ? स्पष्टं कथय। अन्यथा……

— अन्यथा किं भवेत् ?

— हानिः……, ग्लानिः……

— तर्हि, एवं वद, 'विवाहानन्तरं शुभाङ्क उपकण्ठस्य गृहे एव स्थास्यति। एतत् तस्य अभिमतम्'।

— किम्……? किमुक्तम्……? विवाहः…? अभिधया सह…?

— किमभूत् ?

— विवाहो निश्चितः ?

सहसा उपार्कः ग्लानिग्रस्तः। नेत्रं तस्य हर्षशून्यम्। लपनं च विषण्णम्। अवसन्नं च वचनम्। ततः स वातुलभावेन अवदत्।

— नूनम्……नूनं त्वदुक्तं निवेदयिष्यामि। नूनम्……नूनम्……

इत्थं जल्पन् उपार्कः त्वरया प्रस्थितः। तस्य मनोभावं ज्ञात्वा शुभाङ्कः चकितः। तथापि व्यस्ततया आकारितवान्।

— उपार्क……! उपार्क……! न गन्तव्यम्……।

किन्तु उपार्कः किमपि न श्रुत्वा अन्तर्हितः। शुभाङ्को नितरां व्यथितः। विषयस्तु अप्रथितः। दिवसो दिवंगतः। आशाविशेषः अस्तमितः। बन्धुः दूरस्थः। शुभाङ्कः दुःस्थः। निजविमर्शे स अस्वस्थः।

वासरो दीर्घतरः।

मनोमालिन्यस्य उपक्रमे बन्धुत्वं क्रमशो दूरतरम्। उपार्कः पुरो गच्छति। लक्ष्ये तस्य नेदानीं शुभाङ्कय सन्देशः निर्देशो वा, अपितु अभिधा। सैव साक्षात्करणीया। सैव वरणीया……निजीकरणीया।

अपराह्णसूर्यस्य तिर्यग्रश्मिः दुर्बलः। छाया मनस्विनी। विहगो विशदचित्तः। रावः पुनर्नवः। मार्गो विजनस्वभावः। स तत्र एकाकी। ग्लानिः तस्मिन् नैमित्तिकी। आशा च वराकी।

उपकण्ठस्य निवासपरिसरं सरसीकरोति अर्ध-छाया। विजनं प्रतिभाति गृहोद्यानम्। देहलीं स्पृशति उत्तापः। पवनस्य हतवेगं सूचयति द्वारसज्जा। पिहितकपाटे चित्रकला कुलीना। कापट्यं प्रकटयति प्रासादस्य मुखशाला।

उपार्कः टङ्कितवान्।

परिचारिका द्वारमुन्मुक्तवती।

— उपविशतु।

— महाभागाः सन्ति ?

— नहि, तेषां कन्या अस्ति। उपविशतु……, तामहम् आकारयामि।

सोद्वेगम् उपार्क उपविष्टः ।

शनैरुपगता अभिधा ।

— अरे……! भवान् ?

— सोऽहम्……।

— का वार्त्ता ?

— पितृपादाः न सन्ति ?

— को विशेषः तेषां निकटे ?

— अस्ति कश्चित्……

— मां कथयतु……। ……निवेदयिष्यामि ।

— माऽस्तु । अन्यदा आगमिष्यामि ।

— किं मयि अविश्वासः ।

— नहि……नहि……तन्न……।

— तर्हि कथं न कथयति ?

उपार्कः केवलं तामपश्यत् । नयने तृष्णा द्राघीयसी । अभिधा मुखम् अवानमयत् । उपार्कः संयतः ।

— न किमपि चिन्तयतु भवती । यथाकालं पुनरागमिष्यामि ।

उपार्क उत्थितः गन्तुं च उद्यतः ।

अभिधा भावपूर्णा आसीत् ।

— भवतु……।

उपार्कः किंचिद् विहस्य प्रस्थितः । अभिधा गम्भीरा आसीत् ।

पूजागुञ्जने अञ्जनशीलः सांयकालः ।

प्रत्यागत उपकण्ठः । अतीव क्लान्तः । पुनश्च भाराक्रान्तः । आत्मना सः अशान्तः । मनसि संलग्नः स एव विवाहवृत्तान्तः । गमनागमनं बहुगुणितम् । तथापि निष्पत्तिः नाभूत् । इदानीं उपकण्ठो विरक्तः । न पुनस्तत्र कश्चित् संपर्क उचितः ।

किन्तु पिता सः……कथं वा निष्करुणो भवेत् ? कन्या अभिधा आत्मनः सत्क्रिया । पुनश्च मातृविहोना । यदि तस्या जननी अजीविष्यत् नूनं सा तदीयमनोव्यथाम् अज्ञास्यात् । विवाहविषये

कन्याजनकयोः दूरता तु अनिर्वचनीया। एवं विचिन्त्य उपकण्ठः कारुणिकः। मनसि तस्य नादमुदहरन् मृता पत्नी।

— कन्याया अभिलाषो यथाशक्ति पूरणीयः। अन्यथा ममात्मा शान्ति न प्राप्नुयात्। अयं मे अन्तिमाभिलाषः······भवदीयचरण-तले प्रार्थनारूपेण उपस्थापितः। वचनं ददातु······।

— देवि ! कदा ते वचनमन्यथाकृतं वा ?

— नहि······।

— तर्हि, इदानीं कथमविश्वासः ?

— नाऽयम् अविश्वासः······अपितु संकल्पः······अनुरोधः······ प्रार्थना······।

— पश्य, देवि ! अयमस्तंगमसूर्यः मे साक्षी। नूनं ते वचनंपरि-पूरयिष्यामि।

प्रकृतिस्थोऽभूत् उपकण्ठः।

— अरे······! को वर्त्तते ?

परिचारिका उपस्थिता।

— आज्ञापयतु।

— अभिधा किं करोति ? तामाकारय······।

अभिधा समागता।

— पितः ! किमपि······

— हम्······। आलोचनीयमस्ति।

— किम्······।

— कदाचित् वयं आश्रमं प्रति भ्रमणाय गमिष्यामः। दिनं निश्चिनुहि।

— नूनं गमिष्यामः। भृशं रोचते तत् स्थानं मे।

— मन्ये, केचन विद्यार्थिनः आगता आसन्।

— अद्यापि आगतवान्।

— कः सः ?

— उपार्कः······। स नितरामुत्साही।

— अन्यः कश्चित् ?

— हम्······। शुभाङ्कः······। स तु नागतः।

— मन्ये, शुभाङ्कः······

— नहि, उपार्क उत्तमः।

— भवतु······। नूनं सप्ताहेऽस्मिन् गमिष्यामः।

— नूनमेव। गच्छतु······। करचरणं प्रक्षालयतु।

— तत्तु संपादनीयम्······।

— अहं भोजनाय सर्वमायोजयामि······

अभिधा परिचारिकामाकारयन्ती निजप्रकोष्ठं प्रविष्टा। नयने अभासत्, मातुरन्तःपुरस्य सांकेतिकी चित्रशैली···पद्मोपरि प्रणवस्य अखण्डप्रणयः··· पारावतयुगलस्य चञ्चूश्रृङ्गारः······ पुनश्च अस्ताचलस्य शाश्वतमदिरा···गलत्केशरा कुमुदिनी···तदुपरि ग्लानचन्द्रस्य मन्दरश्मिः। परमन्तःपुरमिदं वहुदिनेभ्यः पिहितम्। अभिधा नेत्रं न्यमीलत्।

श्वासो दीर्घायते।

उपार्कः संशयात्मा। मनसि तस्य अविश्वासः। पूर्वभावे शुभाङ्कः इदानीं न आत्मीयः। उभयस्य व्यवधानं क्रमशो दीर्घायते। आलापे उभयस्य मनोभावः सामञ्जस्यं न वहति। नेत्रमिलनमपि प्रतिबध्नाति काऽपि अलक्ष्या अनुरक्तिः। आकुलदृक्पथे उभयस्य आश्रुतिः अतीतविषया। प्रतिश्रुतिः पिहितकाया। निजमाया उभयस्य जाया। व्यवधाने सैव दुरत्यया।

अलेखो निजैकलक्ष्यः।

अवधाने तस्य—जीवनस्य संकीर्ण आत्मविन्यासः···गाढगूढो जडात्मा ······तस्य च विविक्त उच्छ्वासः···उपरि प्लवमानो जलदः··· परितः परकीयभेदः······तले मृन्मार्गो विशदः······अन्तःकरणे महाशून्यस्य निनादः······। पुनश्च कादम्बिनीरतिधारे नक्षत्रस्य अलंकृतिः तस्य मानसं द्रवयति। हृदयं भावयति सार्वजनीनममत्वनीतिः। स्वस्तिचेतनां विकलयति अवधिमती काचित् नियमसम्पत्तिः।

नियमा ध्रुवः। आविर्भाव आकस्मिकः। तिरोभावः स्वाभाविकः। संसारः शारीरिकः। विषयः सावधिकः। भोगः क्षणिकः। प्रवृत्ति-प्रवाह आपेक्षिकः। विनिमयो भौगोलिकः। दायो नूनंभाविकः। निक्षेपो गतानुगतिकः। नियमोऽत्र मौलिकः। अयमिह नूनंभावे पारिभाषिकः···विशोधने एककः···ऋताख्यः कश्चित् ओंकारप्रकारकः।

शुभाङ्कः अधोमुखः।

प्रार्थनां पुरस्कृत्य स गुरुसम्मुखे आसीनः। मनसा निमग्नः। अद्य गृहं प्रत्यागमिष्यति। पितुरभिलाषं पूरयिष्यति। मातुर्वचनं पाथेयीकृत्य जीवनं नेष्यति। विवाहसंस्कारेण स द्वैतो भविष्यति। ततः सम्पत्ति-सुरक्षार्थं च अभिषिक्तो भविष्यति। ततः अभिषिक्त एव अधिकारी···

इदानीमपि शुभाङ्कः मातुर्लोतकस्य उष्णतामनुभवति। अनुग्रह-वात्सल्ययोः प्रतिस्तरं मातृत्वं तस्य विश्लेषणविषयः। तत्र आवृत्ता भवति निजसत्ता। स्त्रीप्रत्यये आत्मप्रत्ययो निमज्जितो भवति। शुभाङ्कः आत्मानं विस्मरति।

सम्मुखे दण्डायमाना भवति जननी···तद्दिने सा सौप्रस्थानिकं निवेद्य कुशलम् अकामयत्। अहो, विसर्जनवेलेयं कियती न विषाद-वन्धुरा? तदानीं सोपानमवरुह्य सा अवदत्।

— पुत्र! तद् अर्जय येन सुखी भविष्यसि। स्थावरसंपत्तिः न वर्धते···न वा वर्धिष्यते। वर्धते तु मोहस्य परिसरः। अधिकार-नाम्ना अहंकार एव प्रसारितो भवति।

शुभाङ्कः सिक्तहृदयः।

शन्नोदेवी निर्देशकठोरा।

— याहि···। अग्रे सर···। न कदाचित् पश्चात् पश्य। पश्चाद्भागः तमोभाग एव।

शुभाङ्कः पश्चादपश्यत्।

शन्नोदेवी वारितवती।

— नहि···, मार्गः अग्रे। पुरः सर···। इयमन्धा जननी त्वत्पदाङ्कम्

अनुसरिष्यति । त्वमेव हि मे प्रकाशः ।

शुभाङ्कनयने अश्रु ।

शन्नोदेवी सान्त्वयति ।

— विलम्बो वृथा । गुरुमनुसर…। स एव प्रदीपः । याहि…। अग्रिमो भव । सत्यम् उद्धर । मा प्रमदः ।

प्रणामं निवेद्य शुभाङ्कः तदानीं लोतकम् अपमृष्टवान् । अद्य अग्रे तथाभूतः पन्थाः । निकटे स एव गुरुः । स्मृतितले कल्याणनिष्ठुरा जननी ।

शुभाङ्को वहिरागतः ।

अपरदिग्भागे प्रतिबिम्बनमपेक्षते पूर्णा तटिनी । शुभाङ्कः शनैः तत्र उपगतः । शून्यमन्दिरस्य प्रतिविम्बेन सह निजप्रतिफलनं स अमेलयत् । को निजत्वं पर्यत्यजत् ? इयं तटिनो…इदं जलम्…अयं शुभाङ्कः । कुत्राऽसौ मिश्रविन्दुः…? को वा कं निजीकृतवान् ? कोऽयं त्रिकः ? दर्शो वा ? पूर्णमासो वा ? कोऽयं यागः ?

करतालो ध्वनितः ।

शुभाङ्कः चकितः । पश्चात् अहसत् उपार्कः ।

— किमत्र क्रियते…?

शुभाङ्को मनाक् अव्यवस्थितः ।

उपार्कः दाम्भिकभावेन अवदत् ।

— किं पराजयो न स्वीकृतः ?

— अभिप्रायस्ते आकलयितुं न शक्यते ।

— किम्…आशा न पूर्णा ?

— केयम् आशा…

शुभाङ्को विस्मितः । कथमद्य उपार्कः दाम्भिकभावेन वदति ? विजयी इव उपहसति ? को वा पदार्थः लब्धः ? विचिन्त्य सः अपृच्छत् ।

— किमपि त्वया लब्धमद्य ?

— सत्यम् ।

— सत्यम् ?

— तदेव···यद् वाञ्छितम् ।

— f+ तत्···?

— तदेव सत् । तद् हि प्रीणाति । तदेव भाति ।

— किं साक्षात् ?

— साक्षात् अभिधा ।

उपार्कः भावाविष्टः—इयमादिस्पन्दनस्य स्थूलाकृतिः । इयमेव वचनस्य मधुरप्रकरणे विकृतिः । इयं च वितरणपरिभाषायां जीवनविभूतिः । इयं पुनः सहभावे विनिमयस्य प्रियप्रकृतिः···।

वेद्यान्तरजडः शुभाङ्कः ।

उपार्कः निमन्त्रणपत्रं प्रसारितवान् ।

— मम विवाहः अभिधया सह ।

शुभाङ्कः पुनश्च स्तब्ध ।

— किमस्मिन् गुरुः···?

— ते तु सम्मताः । तेषामाशीर्वादोऽपि मया गृहीतः ।

सोच्छ्वासं शुभाङ्कः स्वीकृतवान् ।

— भवतु···। शुभमस्तु ।

— नान्यथा चिन्तनीयम् । आगन्तव्यम्···

उपार्कः उपाहसत् ।

शुभाङ्कः क्षीणमहसत् ।

— अस्तु···। स्वीकृतम्···।

उपार्कः प्रस्थितः ।

अर्धनिमीलितदृष्ट्या तस्य मार्गमवलोकयन् शुभाङ्कः चिन्तित आसीत् ।

स्वस्मिन् स्वाधीनधर्मः प्रबुद्धः । अयमेव अवशेषः । अयं च विशेषः । स्वयं साक्षी । मुखबन्धे कर्मण उपक्रमः । मध्ये विषयो व्यापारः । तदुपरि संयोगस्य वियोगस्य च उपलेपः । परिशिष्टे फलं तु निर्लिप्तम् । तदेव तत्त्वम् । तत्त्वं च स्वाधीनम् । नामान्तरे तदेव 'अहम्' । अहमेव सत्यम् । सत्यं च प्रधानम् । तच्च अविशिष्टम् ।

पिप्पलच्छायातले शुभाङ्को निमग्नः। पुरतः तथापि सत्यापन्नम् अभिधाया मुखमण्डलम्। हृदयं तु मथ्नाति गुरुवचनम्…।

"शुभाङ्क! कालोऽत्र भावस्य नियामकः। समानोऽपि मार्गः न सदा समभावं पथिकीकरोति। कालः सर्वमपि परिच्छिन्नत्ति। एतदर्थं च मार्गः कदाचित् शुष्कश्वेत् कदाचित् कर्दमाक्तो भवति। अतोऽस्मिन् मोहो वृथा।"

शुभाङ्क एतदेव रोमन्थयति...विचारयति… विश्लेषयति……। तथापि रहस्याख्यायी। पुनश्च मनोऽणुं निक्वणयति। विमर्शो न अज्ञातः कश्चित् प्रणयवेणुः।

अनन्तः प्रतीक्षते।

अपरिमिता संपत्। अप्रतिमम् ऐश्वर्यम्। किन्तु मनो न सन्तुष्यति। केयं कथा? तथापि संपर्के दूरता? तथापि हताशा? केऽयं भावभूमिः? अथवा अग्रजस्य विवाहविषयिणो इयं मौनता? यदि एकत्र विवाहो विपन्नः तर्हि अन्यत्र स्थिरीकर्त्तव्यः। कथं चिन्ता? कुलमर्यादा किम् अन्यरीत्या अन्यत्र नाभिवर्धेत? नैतत् सर्वं सन्तोषजनकम्। अन्तराले नूनं किंचित् सत्यं निगूढम्। निष्पत्तिः तदपेक्षिणी एव।

माता अवनी पर्यङ्के आलुण्ठिता। नेत्रं मुद्रितम्। किन्तु भाले चिन्तनरेखा गभीरा दृश्यते। मुखं परिशुष्कमिव। कपोले केशकतिपयं स्वेदजडितम्। अधरं विशीर्णम्। वसनं च अयत्नतिहितम्।

अनन्तः शनैराकारितवान्।

— मातः! अस्वस्था किम्……?

अवनी चतुररीत्या अवदत्।

— नहि……तु! कुत्र गतवान्? भोजनं कृतं वा?

— कथं वा रोचेत?

अवनी व्यस्तभावेन आकारितवती

— अरे…! को वर्त्तते पाकशालायाम्…?

अनन्तः वारितवान्

— माऽस्तु । न आवश्यकम् । भुक्तं मया ।

— किं तर्हि······देहो न समीचीनः ?

— सम्यक् अस्मि ।

— तर्हि, कथं खिन्नं मनः ?

— काचित् जिज्ञासा वर्त्तते ।

— कः प्रसङ्गः ? को वा प्रश्नः ?

— गृहे सर्वे उदासीनाः । किमभूत् ? सर्वेषां विषण्णं मनः । न कोऽपि सम्यग् वदति ।

— अहं तु यथापूर्वं वच्मि ।

— नहि······ । भवतो छलयति ।

— अरे······, कथं छलना ? किं त्वं परः ?

— पर एव । अन्यथा कथं न सत्यं कथयसि ?

— कस्मिन् विषये ?

— कथं पिता चिरात् मौनः ? किमर्थं ज्येष्ठमाता नितरामवसन्ना ? किमर्थमेते सर्वेऽपि कर्मचारिणः मामेव पश्यन्तः स्थिरा भवन्ति ? नूनमत्र काचित् अपह्नुतिः ।

— नहि, न तथा किमपि अस्ति । पिता अस्वस्थः । ज्येष्ठमाता च सदैव तथा । त्यज, निजनियोगं संपादय । नान्यथा चिन्तय ।

— नाऽहं किमपि श्रोतुमिच्छामि । अद्यैव समाधानं कुरु ।

— किं समाधानम् ?

— न ज्ञायते······??

अवनी चकिता

अनन्तः विरक्तभावेन अवदत् ।

— यथा पितुरभिलाषः तथा कुरु ।

— किम्···?

— अग्रजस्य नाम्ना समग्रसंपत्तीनां यथा समर्पणं भवेत् तथा कारय।

— कस्तत् प्रतिषेधयति ?

— त्वम्······ ।

— अनन्त······!!

— त्वमेव परिवारेऽस्मिन् अशान्तेः कारणम् ।

— किमेतद् वदसि ?

— यथार्थं वच्मि । मन्निमित्तम् अपचेष्टा कथम् ? नेयं सम्पत्तिरावश्यकी मम । नाऽहं किंचित् अभिलपामि । सत्वरं मनोवृत्तिमिमां परित्यज ।

— अहं जाने । तवैव मनोवृत्तिविषये कस्त्वाम् अवदत् ? कः सः वराकः ? किं स जानाति माम् ?

— मम मनोवृत्तिं विमृश्य पिता रुग्णः । ज्येष्ठमाता विशीर्णा । अग्रजः प्रवासी ।

— अनन्त ! किमेतद् विजल्पसि ? जानासि माम् ?

— सम्यक् जाने । त्वं निष्ठुरा······दाम्भिका······

— अनन्त······!! अहं गृहपत्नी । गृहस्य हितं चिन्तयामि । यदत्र गृहस्य अहिताय कल्पते तत् सर्वमपि अन्यथा कर्त्तुं न कदापि पश्चात्पदा भविष्यामि ।

— किम् अशान्तिः गृहस्य हिताय ?

— कस्यापि ते प्रश्नस्य उत्तरं दातुं नाऽहं बाध्या । याहि······ निजनियोगं संपादय······।

अवनी विरक्ततया अपरदिशं विवर्त्तिता ।

अनन्तः दृढमवदत् ।

— परं जानातु माता······अनन्तः न कदाचित् अन्यायस्य समर्थनं करिष्यति । न वा अन्यस्य अधिकारं बलान्नेष्यति । यत् सत्यं यच्च न्यायोचितं तदर्थम् अनन्तः प्राणविसर्जनमपि करिष्यति ।

कुपितः अनन्तः बहिरागतः । तस्य भावम् आलक्ष्य परिचारिकादयो विस्मिताः । अवनी निजद्वारं पिहितवती । अपरप्रकोष्ठे उच्चस्वरं निशम्य कलहं च अनुमानेन निश्चित्य कुलभद्र आकारयन् उत्थितः ।

— अवनि······! अवनि ···! अरे ···, कुत्र गता ? अनन्त···!

अनन्त······! अरे, किमभूत् ? अयि······ !को वर्त्तते ?

परिचारको विनीतोऽभूत् ।

— आज्ञापयतु······।

— शन्नोदेवीप्रकोष्ठपर्यन्तं किंचित् आलम्बस्व माम् ।

— आगच्छतु······। स्कन्धेऽस्मिन् करं स्थापयतु ।

परिचारकः यत्नेन कुलभद्रं धृत्वा मार्गं निरचिनोत् । पश्चात् द्वारमुन्मुक्तमासीत् ।

कुलभद्रः शनैः प्रकोष्ठं प्रविष्टः । शन्नोदेवी किंचित् विचलिता। कुलभद्रः पर्यङ्के उपविश्य विषण्णतया अवदत् ।

— देवि ! अनन्तः अद्य कुपितः ।

शन्नोदेवी तदीयमनोभावमवगम्य अपृच्छत् ।

— किमर्थम् ?

— न जानासि ?

— नहि ।

— तर्हि, स कुत्र गतः ?

— तदापि न जानामि ।

— भवतु······।

— भवान् संप्रति अधिकविषण्णः प्रतीयते । किमभवत् ?

कुलभद्रो भावगद्गदः ।

— अहमनुतप्तो देवि······! मया त्रुटितम् । त्वन्निकटे अपराद्धम्।

— किमेतद् वदति भवान् ?

— हम्······, देवि ! तद्दिने मिथ्या कथितम् । कुलरक्षानिमि[त्तं] त्वन्निकटे वरः प्रार्थितः । किन्तु कुलरक्षाविषयः तदा गुरु[त्वं] नासीत् । प्रवृत्तिचरितार्थता एव मनसि मे मुख्या आसीत् । ए[त]दर्थम् अद्यापि अहं दग्धः······अहम् अनुतप्तो देवि !

— तत् सर्वं विस्मरतु ।

— कथं वा विस्मर्तुं शक्यते ? पाशविकप्रवृत्तेः परिणाम इदानीं [...]

दहति । इदमेव पशुत्वं दृष्टिं मे विफलीकृतवत् । संप्रति अहम्··· अहम् अन्धो, देवि !

— विचलितो मा भवतु भवान् ।

— सत्यनाम्ना शपथच्छलेन सर्वोऽपि अधिकारः बलान्मया गृहीतः । तदर्थमद्य परिवारे अशान्तिः। अवनी उद्धता । अनन्तः विशृंखलः । शुभाङ्को मे प्रवासी ।

— शान्तो भवतु । कालक्रमेण सर्वस्य समाधानं भविष्यति ।

— नहि, देवि ! नाऽहं समाधानमिच्छामि । केवलं प्रायश्चित्तमिच्छति मे मनः ।

— भवान् अस्वस्थ । अधिकचिन्ता न श्रेयसे······। विश्राम्यतु भवान् ।

— देवि ! त्वमत्र सत्यं सरलभावेन गृहीतवती । एतदर्थं मत्सम्मुखे त्वं सत्यस्य मूर्तिमती प्रतिमा । त्वत्समीपे मम प्रायश्चित्तं······

— दुर्बलो मा भवतु भवान् ।

— प्रायश्चित्तरूपेण मयि क्षमां सूचय, देवि ! क्षमस्व माम् ।

— कथं वा इदानीं क्षमाया अधिकारिणी भवेयम् ? अहं हि समर्पिता भवदीयचरणतले ।

— अहं शरणापन्नो देवि !

— अनेन न मां व्यथयतु भवान् । भवतो व्यथानिमित्तम् अहमेव प्रथमप्रकृतिः । तदर्थम् अद्य अनुतप्ता । पुनश्च भवान्······

— नहि, नहि,······देवि ! नैतत् कदापि सम्भवेत् । मदीयदुःखस्य अहमेव कारणम् । मां मोचय, देवि ! मार्गं दर्शय ।

— आश्वस्तो भवतु । सेवानिमित्तं मे अवसरं ददातु ।

— अहं शरण्यो, देवि ! त्वदीयं दानं प्रतीक्षमाणः अस्मिन्नेव प्रकोष्ठे कालं निभालयिष्यामि ।

— तथास्तु ! परमस्मिन् उत्तीर्णवयसि किं वा प्रदाय सन्तोषयिष्यामि ? केवलं, विश्रामनिमित्तं कियन्ति प्रार्थनावचनानि विहाय नाधिकं किमपि मयि वर्त्तते । तदेव पुरातननिवेदनं

पुरस्कृत्य इदानीमपि वदामि, 'किंचित् विश्राम्यतु भवान्'।

कुलभद्र आश्वस्तिकातरः। शन्नोदेवी गलितहृदया। पर्यङ्के शय्या आवाहनप्रिया। किन्तु परिवेशो निरुत्कण्ठः। दूकूलधारे आभिजात्यच्छटा कटाक्षकठिना। मन्दावेगे मधुबन्धः असुन्दरः। समयः स्वप्नबन्धुरः।

भोगांशः सिद्धपूर्वः।

संप्रति उपार्क उपकण्ठस्य जामाता। स प्राचुर्यस्य अधिकारी। संपत्तेश्च प्रभुः। स एव उपकण्ठस्य भाविजीवननिमित्तं प्रतिश्रुतिः। अभिधायाश्च तीर्थभूः। तस्य मनोविनोदाय परितो विलाससामग्री सम्मुखे पूर्णप्राणा भोगविभव अभिधा। ऐश्वर्यसामग्रीं बहुवर्णयन्त परिचारका निजपार्श्वे सुखभूषणाः। विषादः कुत्र? उत्तुङ्गप्रासाद नभश्चुम्बी। परमिह शून्यता कुत्र? प्रति प्रकोष्ठं प्रदोपमाल प्रकाशप्रणयिनी। अन्धकारः कुत्र? दृष्टिपथे प्रतिमार्गम् आदिभावस लास्यशैली। अभावः कुत्र? पुष्पेषु पल्लवेषु च सर्वत्र पावनम साक्षात् चित्रम्। किमिह अपवित्रम्? संपर्कप्रसारे प्रतिमुहूर्तमि शुभस्य संगीतम्। विडम्बना कुत्र? सर्वत्र सदेव दृश्यभूषणम् किमसत्……?

उपकण्ठः सन्तुष्टः। आश्रुतिः निभालिता। प्रतिज्ञापितं पूरितम् दायित्वं समर्पितम्। संकल्पो हस्तान्तरीकृतः। संशयः समाप्तः व्यग्रता विलुप्ता। कार्यवेग उपसंहृतः। परमुपसंहृतिरिह विर मात्रम्। इतो नूतनचिन्ता। नव्यं च कर्म।

उपान्तं वय विश्रामो ध्येयः। सम्मुखे अवक्षयः। पश्चात् विलय पग्ङ्क्तिः शिथिलः दृश्यप्रचयः। तथापि संसारस्य श्रीधारः पूर्ववत् न विषयः। स एव भावनायाम् अतिशयः।

उपकण्ठ आसीनः।

अभिधा उदासीनतया आगम्य पार्श्वे उपाविशत्।

उपकण्ठः सामान्यं विहस्य अपृच्छत्।

— कथम् उदासीना प्रतीयसे ? किं जातम् ?

दीर्घश्वासेन नासिकामुत्फुल्लयन्ती अभिधा निरुत्तरा। उपकण्ठः आश्वासनमुखेन अपृच्छत्।

— किम् उपार्को न प्रत्यागतः ? भवेत्……, कर्मव्यापृतः स्यात्। सम्पत्तिरिदानीम् इतस्ततो निपतति। दायित्वं तदुपरि न्यस्तम्। स वा सहसा केन प्रकारेण सर्वं निभालयेत् ? एतदर्थं समय आवश्यकः। अन्यथा स यदि सर्वदा अत्रैव उपविशेत् तर्हि गृहरक्षा कथं भवेत् ? कथं तव मर्यादा वर्धेत ?

अभिधा इतस्ततः अपश्यत्—मधुचन्द्रिका किं समाप्ता ? किमेतावति मधुसमयो विगलितः ? रूपमोहो नेदानीं गरीयान्। निजीकरणस्य लोभस्तु ग्रासोन्मुखः। प्रणयस्य अन्तराले दायित्वबोधच्छलना प्रभुभावमेव सर्वीकरोति। पुष्पम् आघ्रातम्। रस आस्वादितः। नूतनतया आकर्षणीयं तु संपत्तेः परिमाणमधुना।

उपकण्ठः कन्याया मनोभावमालक्ष्य गम्भीरभावेन अवदत्।

— मा अन्यथा चिन्त्यताम्। यद् भवेत् यत् सर्वं तव मङ्गलाय एव। त्वमस्य गृहिणी……गृहपत्नी। तवेच्छा अत्र फलवती भवेत्।

अभिधा उदासीना। विमनस्कमुखे तस्याः संशयरेखाः। अस्वस्थदृष्टिप्रसरे म्लानघटनाः। उदासस्मरणे सद्योविनोदः दूरक्रमः। अपूर्णसन्धाने प्रतीक्षा बलशालिनी। आशायां विश्वासः प्रतीतिविकलः। असन्तोषः क्रमवर्धिष्णुः। विक्लवबोधो भावान्तरभीरुः।

विषया विन्यस्तः।

शुभाङ्को नितरामुद्बुद्धः। नाद्य मनसि उत्कण्ठा, न वा उद्वेगः। परितः तपोवनस्य श्रीधारा। गमनार्थं मार्गाः सर्वत्र अनुकूलाः। तथा च निजभावः समानप्रभवः। यत्र दृक्पातः तत्र शान्तिपथः। जनाः समस्ता निजबान्धवाः। मिलनमेव परिचयसारः। अतिथिभावश्च सन्न्यस्तसंपत्तिः।

अभिधा दृष्टिं निक्षिप्तवती। आगन्तुकः कश्चित् अग्रेसरः।

परिचित इव अप्रार्थितः संप्रति इत आगच्छति। अभिधा त्वरिता, द्वारमुन्मोच्य उपगता। सम्मुखे अनिमन्त्रितः पुरोहितो निर्वाक्। अभिधा अवगुण्ठनं संप्रसारितवती अनुच्चस्वरेण सा अपृच्छत्।

— कमन्वेष्यति भवान्?

शुभाङ्कनयने कुण्ठिता वधूः अभिरूपा। स नतमुखः सन् अपृच्छत्

— उपार्को वर्त्तते?

अभिधानेत्रमण्डले जटावर्धितकलेवरः श्मश्रुलः। ज्योतिष्मान् तथापि उदात्तपुरुषः। सं किञ्चित् अधो विलोक्य अपृच्छत्।

— किं भवान् शुभाङ्कः?

— हम्······। उपार्कस्य बन्धुः।

अभिधा निजमर्यादां विपरिवर्त्य अनुरुद्धवती।

— उपविशतु······। अनुपदमागच्छामि।

अन्त पुरतः फलमूलादीनि आनीय सा उपहृतवती।

— गृह्णातु······।

शुभाङ्को विस्मिततया सामान्यमहसत्।

— तर्हि······, मम बन्धुः······?

— स इदानीमत्र न उपस्थितः।

— कदा प्रत्यागमिष्यति?

— दिनद्वयाभ्यन्तरे।

— तर्हि, अहम्······

— न किमपि चिन्तयतु। वक्तव्यमस्ति चेत् कथयतु।

— नहि, न तथा कश्चिद्विशेषः। प्रव्रज्यातः प्रत्यागच्छामि स्म। मनसि उदितः भवदीयविषयः। विवाहसमये निमन्त्रणं प्राप्यापि आगन्तुं नाशकम्। तदेव संप्रति मनस्यन् समागतः।

— सम्यक् कृतम्। वयमस्मिन् आनन्दिताः।

— किन्तु······

— भवतो बन्धुः नास्तीति खेदो वा?

अभिधा मुखमपश्यत् शुभाङ्कः। उज्ज्वलप्रभातस्य अरुणिमा भूषयति मुखमण्डलम्। तत्र च ऋतायते प्रणवः—सृष्टिसंहारयोः सूचिविशेषः ······ पृथिवी परिधिपरिमाणस्य सामूहिकपरिवेषः······भावसमस्तस्य निश्चित आश्लेषः······।

अभिधा समदिशत्।

— भवत आगमनं निशम्य बन्धुः नूनं प्रसीदेत्। इदानीम् अतिथिविशेषलाभेन अहं परितृप्ता।

— अहमपि प्रसन्नः। अन्यदा आगमिष्यामि। इदानीं प्रस्थानं प्रार्थये।

— भवतु·····। सुप्रस्थानम्······।

शनैरुत्थाय शुभाङ्कः निजपथमारूढः। अभिधा द्वारं पिहितवती। किन्तु उपरि अन्तःपुरस्य वातायनमुन्मोच्य सा विस्मिता। श्मश्रुलः अदूरे चरणतः कण्टकमपसारयति। रक्तप्रवाहं च दमयितुं यतते। स्तोकं गच्छति। पुनः दण्डायमानो भूत्वा रुधिरं प्रोञ्छति। अभिधा विचलिता। उपचाराय आकारयितुम् उद्यता। ततः अवरुह्य द्वारम् उन्मोचितवती। किन्तु स्वरः सामर्थ्यविहीनः। दूरंगतः आश्रमवासी। दृश्यते केवला आकृतिः। परिचिताऽपि··· अपरिचिता। अग्रे प्राकारस्य रुद्धद्वारं प्रतिकूलपवनेन इतस्ततो विचाल्यते। निरर्थकः शब्दराशिः शून्यभात्रं प्रगुणयति। अभिध्रासम्मुखे केवलः शून्यमार्गः पथिकान् ग्रसते।

अग्रे अनन्तः।

प्रतीक्षमाणः स उपविष्टः। शुभाङ्क उपस्थितः। प्रणाममुद्रया चरणं स्पृष्टवान् अनन्तः। शुभाङ्कः तं समालिङ्गत्। रुद्धवाष्पं लोतकरूपेण उभयस्य कपोले अन्तर्भावम् असूचयत्। शुभाङ्कः अनुजस्य लोतकमपसार्य अपृच्छत्

— कः समाचारः ? कुशलिनः सर्वे ?

मृदुभाषी अनन्तो व्यथितः।

— न किमपि कुशलम्।

— का स्थितिः संप्रति ?

— पिता रुग्णः । ज्येष्ठमाता विपण्णा । माता तु साक्षात् चण्डी ।

— तर्हि, त्वं तत्र न किमपि……

— सर्वान् बोधयितुं यत्नः कृतः परं किमपि न फलम् ।

— कुत्र दोषः ?

— दोषस्तु सर्वेषामस्ति । परं न कोऽपि स्वीकर्तुं सन्नद्धः ।
अपि च न कोऽपि किमपि बुध्यति ।

— कथमेतत् सर्वमभूत् ?

— भवतो विवाहविषयं केन्द्रीकृत्य इदानीं सर्वत्र अव्यवस्था ।

— तर्हि, किमहं करवाणि ?

— ममैका प्रार्थना अस्ति ।

— कथय……

— नहि…… । भवान् प्रतिज्ञां करोतु ।

— मयि अविश्वासः ?

— हम्…… । अविश्वास एव ।

— अनुजः……अनन्तो मयि न विश्वसिति ?

— नेदानीं प्रसंगः अविश्वासस्य । प्रसंगस्तु जीवनस्य कृते । तदर्थं
प्रतिज्ञा आवश्यकी । सत्यस्य शपथः अपेक्ष्यते ।

शुभाङ्को विस्मितः । खिन्नः स कियत्कालं चिन्तने मग्नः । किमर्थमागतः अनन्तः ? कः सन्देहः मनसि ? किमपि परीक्षितुमागतः ? अथवा कनिष्ठा माता किमपि मन्त्रयित्वा एनं प्रेषितवती ? किं वा संपत्तेः प्रभुत्वभिक्षार्थम् अनन्तः समागतः ? शुभाङ्कः अहसत् ।

— भवतु…… । त्वद्वचनं स्वीकरोमि । प्रतिजाने च तव प्रार्थनां
पूरयितुम्…… ।

— तर्हि, भवान् मया सह स्थानमिदं परित्यजतु ।

— एतदर्थम् एतावान् श्रमः ?

— भवान् अभिजातः । आभिजात्यमेव वर्धयितुमत्र भवान् प्रशिक्षितः

इदानीं प्रशिक्षणस्य वयः उत्तीर्णम्। अतः स्थानेऽस्मिन् भवतो निवसनम् अस्मत्कृते न शोभनम्। तत्र गृहे नाना दायित्वम्। नाना च कर्माणि। तत्सर्वं निभालयितुं को वा वर्त्तते ? पिता असमर्थः। माता च उपेक्षाशीला। सर्वं तत्र इतस्ततः। अतो भवान् प्रत्यागच्छतु। यत् कर्त्तव्यं तत्र सर्वं विचारणीयं भवेत्।

— अवश्यं प्रत्यागच्छामि।

— तर्हि, आगच्छतु।

— न संप्रति।

— कदा……?

— यदा गुरूणाम् अनुमतिः भवेत्।

— तर्हि, अहं गत्वा निवेदयिष्यामि ?

— नहि, नेदानीम् अवसरः। गुरुवर्यः नात्र सन्निहितः।

— कुत्र सन्ति ते ?

— व्रतपालनाय तीर्थंगताः।

— कदा आगमिष्यन्ति ?

— न जाने। किन्तु अल्पदिनाभ्यन्तरे। अनन्त…… ! इदानीं प्रत्यागच्छ, गृहे पिता एकाकी। नूनं व्यथितः स्यात्। त्वरस्व ·। माताऽपि मार्गं विलोकयन्ती प्रतीक्षमाणा स्यात्। याहि……, सेवस्व……। तेषां सेवा इदानीं ते दायित्वम्। न कदाचित् एतद् अवहेलय। गुरुपादानाम् अनुमतिं गृहीत्वा नूनमहं प्रत्यागमिष्यामि।

विनम्रभावेन अनन्तः प्रस्थितः। शुभाङ्कः द्रवितहृदयः। भावनायां च विलीनः। अत्र अहम्। अन्यत्राऽपि अहम्। एकोऽहम्। अपरश्चाहम्। एकतः अपरपर्यन्तं दूरता कियती ? अहमिकामोहनस्य विरामः कुत्र ? पुरो गच्छति अनन्तः। पुरातनक्रीडनकानि संगृह्य स खेलितुं यत्नवान्। शून्यगणनापुस्तिकाम् उन्मोच्य प्राचीनाङ्कं गणयितुं स पुनरपि व्यग्रः। प्रभुत्वस्य स्वाक्षरं नवीकर्त्तुं स नितराम्

उत्सुकः। विलुप्तवंशक्रमं पुनरुद्धृत्य आभिजात्यप्रकटनाय कियन्ति नामानि भिन्नलिपिभिः उत्खोदयितुं तत्परः। ···केवला आवृत्तिः। नाम्नः पुनरावृत्तिः······। नव्यनाम्ना विन्यासविचित्रा······। सत्यं तु तदेव यद् विन्यासस्य निदानम्।

केशपाशम् आवर्त्तयति अभिधा।

आत्मानं सज्जीकरोति। मण्डयति मुखमण्डलम्। दर्पणे पश्यति। धन्या भवति। ततो ध्याने आभासते स एव श्मश्रुलः। नयने नृत्यति तस्य मृदुमन्दसंलापशैली। दया जन्यते मनसि। सा ज्ञातुं न प्रभवति कथम् अस्य कृते मनसि करुणा लहरीयति? कथं च मनो विषीदति? किमर्थं, स एव पुरुषः पुनः पुनः दृग्गोचरीभवतु इति चेत उत्सहते? कथं वा अलक्ष्यप्रतीक्षा तदनुगामिनी भवति? सा वारंवारं पृच्छति—'कुत्र भवतो बन्धु.? कथमत्र स नागच्छति? किं भवान् तं न निमन्त्रयति?' उपार्क उपेक्षते। प्रभुवचनेन च तां वारयति। असहिष्णुभावेन च कुपितो भवति। अभिधा उपहसति। परमात्मानं संयमयति। विस्मतुं यतते। तथापि न पारयति। उपार्क आश्वासयति। नानारीत्या बोधयति। नीतिवाक्यमुदाहृत्य प्रवृत्तिं दमयितुमुपदिशति। निजप्रभुत्वं नयस्यति। पातिव्रत्यं विशदयति। सतीत्वमूरीकृत्य जीवनस्य याथार्थ्यं प्रतिपादयति।

अभिधा प्राचुर्यदग्धा।

अनुसंधत्ते सा—कुत्र शान्तिः? किमैश्वर्यम्······? विलासोत्तरजीवनस्य का परिभाषा? पार्थिवप्राचुर्यतः परं किमस्ति नव्यम्? का वा भोगोत्तरा स्थितिः? कथं वा जीवनं सीमितम्······? किमर्थं वा प्रियं वस्तु क्रमशः अरुचिकरम्? को वाऽत्र पूर्णप्राणः? कथमेतन्न ज्ञायते? किं निमित्तम् अज्ञानस्य चिरधारा? व्याकुलजिज्ञासानिवहे अभिधा विमनस्का।

निजोपरि दायित्वं नास्ति। गृहे कर्म नास्ति। परिचारिका नित्यकर्मणि अभ्यस्ताः। धनलोभेन अविश्वस्ता अपि विश्वस्ताः।

भृत्या प्रभुनिर्भरा:। अन्यत् सर्वं नियमबद्धम्। किं वा अधिककर्त्तव्यम्? अभिधा उपविशति······यथेच्छं चिन्तयति······क्रमशः आलस्यपरायणा भवति।

उपार्को विव्रतः।

इदानीमभिधा तमवजानीते। पूर्वरागम् अवनमयति। प्रतिवचनं कुप्यति। वचनपरमाणुं पर्वतीकृत्य कलहायितुं प्रवर्त्तते। किमत्र कारणम्? कथं सहसा परिवर्त्तिता? सर्वाऽपि व्यसनसामग्री सन्निहिता वर्त्तते। तथापि न रोचते? को वा पिशाचः मनसि न्यवसत्।

उपार्कः सतर्कः। अभिनयस्य सकलप्रस्तुतिमूले नारी एव प्रथमभूमिका। सैव विदलति··· विदहति··· दारयति······ मारयति···। मुक्ता धनसामग्री एतासां दिव्यरूपं राक्षसीकरोति। नारीवृत्तिः पैशाचिकी भवति। न तत्र दया, न वा क्षमा, केवलो ग्रासः······।

कुपित उपार्कः सद्यो निर्गतः। लक्ष्ये तस्य शुभाङ्कः यन्निमित्तम् अभिधा दयार्द्रा। यदर्थम् अभिधामनसि विकृतिः। यदर्थं स्वयं सः अवधीरितः। अद्य स एव प्रष्टव्यः—किमर्थं समाधानात् परं पुनः समरः संघटते? कथं वा निकटसंपर्के स्खलनं दृश्यते? कथं च समृद्धिः संकीर्णभावभूमिं निर्माति?

शुभाङ्कः शुभानुध्यायी।

संपर्कमन्थनधिया लहरीस्वभावं विशदीकरोति शून्यमन्दिरस्य विवर्णपताका। पादपव्यादाने पवनः स्रोतोवहः। प्रतिफलने पर्णवर्णिला सरसीजले लहरीलीला। मन्दिरद्वारे दोलायमाना अचिरम्लाना कुसुममाला। वदान्यदाने चूर्णलेहने गुहा सकला बकधवला।

अपराह्णस्य पवनं सेवते शुभाङ्कः शिलासने। सम्मुखे नदीनिर्झरयोः दृश्यराशिः भावरोमन्थनं मन्थरयति। नदी झरीयति। झरी च नदीभवति। स्रोतस्तु यथा तथा। उपचये श्रीमती सहस्रधारा। अपचयेऽपि तथैव श्रीधारा। वहने क्षालनप्लावनयोः अद्वैतप्रीतिः।

परं नदीयं न कदाचित् प्लावयति। केवलं क्षालयति… …पावयति। इहं हि चेतनानदी।

निजकृते यदद्य आकर्षणीयं तत्तु जनस्वभावे सारल्यम्। जनस्य च शान्तस्वरूम्। प्रतीक्षायां यदपि अमूल्यं तत्तु अधरे किंचित् स्मितम्। लक्ष्ये सार एव साक्षात्कारः। लक्ष्यप्राप्तेः पूर्वं तु जीवनरथः गति-सामर्थ्यं हारयति। यदा च गम्य आमुखीक्रियते तदाऽयं रथः निजवाच्यम् आकुञ्चति। तदनु साक्षात्कारपरिणामे अमूर्तविशेषो मिलनमर्मणि गतानुगतिकः।

शाश्वतस्य नेपथ्यनादे वसुन्धरा तथापि सुन्दरी। तिरोभावस्य च रहस्ये अन्तर्भावोऽत्र मौलिकसुरभिः। एतदर्थमिह आपाढप्रतीक्षायां जीवति वैशाखतटिनी। दृष्टिपथे आवाहनायते त्रिकालस्य ऐकिकी-धारा। निमज्जनं निजायते रूपप्रकारे। हास्यधारे अन्तर्भुक्तिरेव निवेदनायते।

उपगत उपार्कः।

साधुवादं व्याहरन् शुभाङ्कः प्रसन्नः। उपार्कस्तु गृहस्थस्य अहमिकां वहन् गम्भीरः। शुभाङ्कः स एव श्मश्रुल आश्रमवासी। कथाप्रकारे तस्य प्राक्तन आतिथेयभावः। सत्कारनिमित्तं च कृतकृत्यता। स वन्धुभावं नवीकृत्य अभिमानेन अवदत्।

— किमयं जन इयद्दिने मानसमागतः?

उपार्कः कुटिलमहसत्।

— त्वं तु आवयोः मध्यस्थः।

— युवयोः……? हुँ, भवेत्। वर्तमानकाले त्वं मम सम्मुखे। तव पत्नी च त्वां मनसीकृत्य मम पश्चात्। उभयोर्मनसि नूनमहं वर्तमानः कश्चिन्मध्यस्थः। सम्प्रति युवां तु कूलद्वयम्। युवयोर्मध्ये स्रोतः संसारः। स एव मध्यस्थः। मन्ये, तद्रूपं मदुपरि आरोपयितुमिच्छसि।

— नहि। अहं मन्मार्गस्य त्वं च त्वन्मार्गस्य पथिकः। किन्तु यदा चतुष्पथ आगच्छति तत्र अवश्यम् अतिक्रमणीयं परस्परम्।

अतिक्रमसमयेऽस्मिन् यद् आरोप्यते तत्तु परिचयमात्रम्। परं स एव परिचयः यत्र कुत्राऽपि पुनः चतुष्पथं निर्मातुं शक्नोति।

— साधु भाषितम्। जीवनपथे तु नैके चतुष्पथाः।

— सत्यम्। नैते स्वयं निर्मिताः। अपितु निर्मापिताः।

— किं निमित्तम्?

— संशयार्थम्……अविश्वासार्थम्……विभेदनिमित्तम्……।

— उपार्क! मन्ये, त्वं विभ्रान्तः।

— तदर्थमेव आगतः।

— तर्हि, किं वक्तुमिच्छसि?

— वक्तव्यं तु तवैव वचनम्।

— मम वचनम्?

— स्मरसि? एकदा त्वं प्रतिज्ञापितवान्।

— किम्……?

— मम प्रार्थनां पूरयिष्यसीति।

— उ… ", तदेव……! सम्यक् स्मरामि। किन्तु किं वाऽस्ति मन्निकटे? केन प्रकारेण वा तव कामनां पूरयिष्यामि? त्वन्निकटे अपरिमिता सम्पत्तिः। पुष्कलं प्राचुर्यम्। पत्नी तु साक्षाद् देवी। किमन्यद् वाञ्छसि?

— अस्ति तथापि याच्ञा।

—तर्हि प्रार्थय। अवश्यं पूरयिष्यामि। बन्धुभावेन यावच्छक्यं समर्पयितुम् अहं प्रस्तुतः।

उपार्कः विमुखतया किमपि चिन्तयितुम् आरब्धः—एकस्मिन् मार्गे किं सर्वे गन्तुं प्रभवेयुः? सम्भवेत्……, यदि मार्गः संकीर्णो न स्यात्। किन्तु मार्गेऽस्मिन् गत्वा सर्वे किं निजलक्ष्यं लभेरन्। एतदर्थं नाना मार्गाः नैके च चतुष्पथाः। तत उपार्क गम्भीरभावेनअवदत्।

— इतः परं न कदाचित् अभिधासम्मुखमागमिष्यसि।

— उपार्क……!! किमेतद् वदसि?

— पश्य··· । प्रतिमनुष्यं काचित् दुर्बलता अस्ति ।

— तर्हि, मयि अविश्वासः ?

— न त्वयि···, किन्तु मयि··· ।

— भवतु··· । बन्धुभावेन तव प्रार्थना मया अङ्गीकृता । तव स्वस्ति कामये ।

निषण्णः शुभाङ्कः प्रस्थातुमुद्यतः । उपार्कः तं सावधानीकुर्वाणः अवदत् ।

— शृणु······ । कस्मिंश्चित् परिवारे एकस्य जीवनस्य स्खलनं नाम समग्रपरिवारस्य नाशः ।

नेत्रकोणे तिर्यग् विलोक्य शुभाङ्कः प्रस्थितः । उपार्कः शनैः आश्रमपरिसरतो निर्गतः । उभयस्य अपसारे परस्परप्रेक्षाभावः स्नेह-संकीर्णः । तिक्तबोधे प्रस्थानदिशा धूसरा ।

अपराह्णच्छाया दीर्घायते ।

परमियं छाया निर्वाप्यते न तु संक्षिप्यते । तदनु नामान्तरम्······ रूपान्तरम्······। स्थूलपरिभाषया ततः तदेव तिमिरम्······। पराऽपरयोः घोरमन्दिरम्······। अदृष्टस्य विमृष्टस्वाक्षरम्······।

तथापि अनन्त नक्षत्रस्य प्रकाशं निरन्तमन्वेषयति । पिपीलिका इव दीर्घक्लेशं विलमुखम् आकृषति । एकस्मिन् सूत्र सर्वान् बद्धुं नियतं यतते । एकस्मिन् मार्गे गमयितुं च प्रोत्साहयति । किन्तु न सूत्रे सरलं भवति । न वा गुम्फावस्तु स्थिरायते । तथापि स विश्वसिति ।

— यदत्र दृश्यते तत् सर्वस्य किमपि मूलभूतं सूत्रमस्ति येन दृश्यमानं निसज्जमपि सुन्दरं प्रतिभाति । एकः स्खलति । अन्यः तत् स्थानं पूरयति । मालास्वरूपे परिवर्त्तनं दृश्यते । मालास्वभावे तु सूत्रमेव परिशेषः । तदेव अन्तर्भवनस्य मूलतत्त्वम् । तदेव सत् । तदेव शश्वत् । तदेव महत् ।

अनन्तः शनैः गत्वा कपाटं टङ्कितवान् । किं तु न किमपि प्रत्युत्तरं प्राप्तवान् । पुनरभिघातेन सह स आकारितवान् ।

— मातः ! मातः······!

मृदुरीत्या अवनी असूचयत् ।

— अनन्तः ?

— हँ, मातः !

अवनी उपागम्य आवेदितवती ।

— आगच्छ……। उपविश……।

अनन्त उपाविशत् । पुत्रमुखं विलोक्य अवनी स्मेरानना । अनन्तः साधारणरीत्या अवदत् ।

— मातः ! त्वं यच्चिन्तयसि, मन्ये, तन्मदर्थमेव ।

— कोऽवदत् ? कथम् एकचक्षुष्कतया विचारयसि ?

— जाने… , माता मे ममैव हितकांक्षिणी ।

— नहि, तन्न सद् । अहम् अस्मिन् गृहे सर्वेषां हितं चिन्तयामि ।

— किन्तु……?

— अस्ति कश्चित् सन्देहो मनसि ? पृच्छ्यताम् ।

— पिता तु त्वयि अभियोगं न्यस्यति ।

अवनी अहसत् ।

— पिता ते इदानीं शिथिलः । मनसि नाना चिन्ताः । अतः सहसा कर्तुं प्रवर्त्तते । अविचार्य यत् किमपि आदिशति । अहमेतद् वारयामि । अतः स कुप्यति । अन्ततः तस्यैव वचनं कार्येण अनूद्यते । किन्तु भिन्नरीत्या भवति । भिन्नसमये च भवति ।

— अनेन को लाभः ?

— लाभोऽयं कर्मणः सफलता ।

मातुः हितदृष्टिमाकलय्य अनन्त चकितः । इदानीं हृदये तस्य गम्भीरा भक्तिः । प्रीतिपूर्णश्च स्वभावः । मनसि तथापि कौतूहलम् । स पुनरपृच्छत् ।

— मातः ! संप्रति मामेव निमित्तीकृत्य अपप्रचारो भवति सर्वत्र ।

पुनरहसत् अवनी ।

— कोऽयं विषयः ?

— सर्वे वदन्ति—सम्पत्तिलोभेन अवनी ज्येष्ठपुत्रं निष्कासयितुम् उपायान् निर्माति । सदैव निजपुत्रस्य अनन्तस्यैव अभिषेकं

कामयमाना गृहं विभिनत्ति। सर्वैः सह कलहं करोति। किमेतत् सत्यम् ?

क्षणं गम्भीराऽभूत् अवनी। अपवादः तां भृशमदहत्। वचनं संयम्य सा क्षीणमहसत्। हास्यधारे विषण्णरेखाः कपोले अचिरमङ्किताः। अनन्तस्य विस्मयाभिभूतं नयनद्वयं विलोक्य सा अबोधयत्।

— पुत्र······! मिथ्याप्रणयिनो लोकाः।

अनन्तः अकुप्यत्।

— दण्डनीया इमे।

— नहि, तैः यदवगतं तत सत्यम्।

— मातः ! तर्हि त्वम्······।

— अवबोधे किंचित् ते अवशिष्टम्। शृणु······। सत्यं नाम भयङ्करम्। तदामुखीकर्तुं साधारणानां साहसं कुतः ? यदा एतस्य स्वरूपमाच्छाद्य तेषां निकटे उपस्थाप्यते तदैव ते सरलभावेन एतत् स्वीकृत्य चमत्कृता भवन्ति। सामान्यमपि सत् अङ्गसज्जया पुष्कलं दृश्यते। सैव अङ्गसज्जा आक्षेपाय अपवादाय च प्रचुरा प्रतिभाति। यत् सत् तत्तु निर्मलम्। तत्र अपवादस्य को वा अवसरः ?

— किमपि वोद्धुं न शक्नोमि, मातः !

— समयः सर्वं बोधयिष्यति। प्रतीक्षस्व······। धैर्यं धर······।

— नहि, मातः ! मनसि मे अलक्ष्यझञ्झा। सैव मां विचालयति। उपायं निर्दिश, मातः ! किमहं करवाणि ?

— विषयेऽस्मिन् अतिशयं चिन्तयित्वा त्वं व्याकुलः। इदानीं विश्रम्यताम्। माऽधिकं चिन्त्यताम्।

— मातः ! अद्याऽहं किंचित् प्रार्थयितुमुत्सुकः।

— प्रार्थना······? अरे ! मातापुत्रयोः व्यवधानं कथम् ? तव प्रार्थनाऽपि मम प्रार्थना।

— नहि, मातः ! व्याकुलतया व्यवधानम् अहमेव उत्पश्यामि।

— तर्हि, कथय······किमिच्छसि ?

— वैशाखपूर्णिमा निकटायते । तद्दिने एव अग्रजस्य अभिषेकनिमित्त-
मादेशं प्रसारय ।

— अग्रजस्य……अभिषेकः ?
अवनी आत्ममुक्तमहसत् ।
अनन्तो विस्मितः ।

— मातः……! किमभूत्……? कथमुपहससि ?

— नहि, पुत्र ! अतीतं स्मरामि । भविष्यच्च कल्पयामि ।

— तर्हि, मम……प्रार्थना……?

— पूर्णा……। सद्य एव आदेशं प्रसारयामि । सर्वमायोजयितुं च
निर्दिशामि ।

— मातः……!!

वाष्पगद्गदः अनन्तः जननीचरणं संस्पृश्य आनतः । अहो, जननी-हृदये करुणा……। स्वयं सा कियती न उदारा……। कियती न वात्सल्यस्निग्धा ? अवनीनयने अश्रुधारद्वयं सुस्पष्टम् । भवसंलग्ना दृष्टिः अदूरे किमपि अन्वेषयन्तीव स्थिरा । पर्याकुलकेशपाशे पवनो वेगसुन्दरः । गम्भीरमुखमण्डले स्नेहसमवायः संकेतभङ्गुरः ।

अनन्तः अनुनयति ।

— किं विचारयसि, जननि !

— वहुदिनेभ्यो बद्धवात्सल्यम् अद्यैव विमोचितं, पुत्र !

— बोद्धुं न शक्नोमि, मातः !

— एतावत् कालपर्यन्तं सर्वान् मोहतो दूरे स्थापयितुं यत्नो मे
अव्याहत आसीत् । इदानीं तु मयि मोहः अङ्कुरितः ।

— आलापः अर्थं न संगच्छते, जननि !

— याहि……पुत्र ! तव प्रार्थना पूर्णा । सत्यस्य मार्गः परिष्कृतः ।
तत्र आत्मानम् आविष्कुरु ।

अनन्तः सानन्दं इन्नोदेवीप्रकोष्ठं प्राधावत् । अवनी तु मग्ना । तस्या दीर्घकेशविभा रजनीम् आह्वयति स्म ।

अनिरूप्यस्वनसंचारे पवनो वेगखञ्जः। चैत्रविभावरी प्रसा
प्रेयसी। नक्षत्रश्रीक्षेत्रे पुञ्जरतिः नेदीयसी। पादपोपरि आका
पारेश्वरः। परितः कालस्वरः अविनश्वरः। पिहितद्वाराणि गृहा
तु प्रकृतेरनपेक्षितानि उपकरणानि एव। निद्राविधाने अन्तःपुर
आश्वस्तिमात्रम्। एकाङ्गशय्या स्वप्नमसृणा।

अभिधा पार्श्वशायिनी।

उपार्को नास्ति। संध्यातारका इव अद्यत्वे तस्य उपस्थितिः। त
गतानुगतिकरीतिः······स आविर्भवति······प्रतिष्ठते······। म
सीदति। हृदयं दूयते। देहो दह्यते। तथापि वक्तुं न शक्यते। नय
अतीतमेव दोलायते। सुखस्मृतिः दुःखानि उपस्थापयति। त
सकलमरुचिकरम्। उपाधाने केवलमश्रु चिह्नानि अङ्कयति।

तद्दिने अभिधा अपृच्छत्।

— मामत्र विहाय दूरे भवान् किमपि नानुभवति ?

उपार्कः विमुखतया उदतरत्।

— समयः कुत्र ?

— तर्हि, भवान् किं करोति ?

— यत् करोमि तत्तव सुखाय एव।

— अहं तु नैतदिच्छामि।

— यदि तवात्र न रुचिः तर्हि सर्वमेतद् भविष्यद्वंशधराणां
उपयुज्येत।

— ये अनागताः तेषां कृते चिन्ता। अपितु पार्श्वे अहमस्मि। म
भवान् निष्ठुरः ?

— यदहं संगृह्णामि तत् सर्वस्य संचयः यत्नश्च तव। तदेव कु
नाधिकं चिन्त्यताम्।

— तर्हि, अस्य उपयोगः ?

— तद्विषये अहं चिन्तयामि।

— येन केनोपायेन भवान् संग्रहीष्यति। यथा कथंचित् च तदहं संचेष्यामि। केयं नीतिः ? किमिदं सन्तुलनं जीवनम् ?

— यदहं करोमि तदेव अनुकुरु। यच्च वच्मि तदेव अनुसर।

— नैतत् सम्भवेत्।

— अभिधा······?

— भवान् मोहग्रस्तः। मोहवशतः यत्र कुत्रापि अन्यायम् अनीतिं च प्रश्रयते। तदहं केन प्रकारेण समर्थयामि ? कथं च दुष्कृतेः भागं ग्रहीष्यामि ?

चपेटाभिघातेन समम् अगर्जत् उपार्कः।

— अभिधा······??

अभिधा चकिता। शनैश्च शय्यायां पार्श्वं विवर्त्य किंचित् अपश्यत्। प्रदीपशिखायां धूमरेखा तथापि अन्तर्वहा। उन्मुक्तवातायने तमसा शाश्वती।

सा नेत्रं न्यमीलत्।

सम्मुखे स्थितोऽभूत् उपार्कस्य कोपप्रतिमा। तदानीं सहसा उपार्कः वहिरागम्य अपृच्छत्।

— शुभाङ्कः किमर्थमागतवान् ?

— भवन्तमेव अन्विष्यन आसीत्।

— ततः······?

— भवदीयबन्धुरिति मया सत्कारः कृतः ?

— तदनन्तरम्······?

— पुनरागमनं प्रतिश्रृण्वन् स प्रस्थितः।

— पुनरन्यद्······?

— किमन्यद् ?

— यदि स आगच्छेत् तर्हि द्वारं पिहितव्यम्।

— किमर्थम् ? किमर्थम् ? किं स भवतः अपमानं कृतवान् ?

— नहि।

— तर्हि······किमर्थम् ?
— यद् आदिशामि तदेव पालय ।
— प्रयोजनमनिर्दिश्य आदेशः कथम् ?
— जानेऽहम्······ललनायाः श्रृंगारमूर्त्तिः काले काले प्रलुब्धा आकृषति । पुनश्च तव काचित् दुर्बलता तस्यैव नाम्नः प्रशंसा करोति । किन्तु पश्य, यथाऽनयोः समन्वयो न भवेत् तथा चेति तव्यम् ।
— किमेतद् वक्ति भवान् ? मम श्रृंगारमूर्तिरेव भवन्नयने नृत्यति तदपि भवान् पापवृत्तये विचारयति ? नान्यत् किमपि प्राप्नोति भवान् ? अहो, पौरुषम्······?

अभिधा अञ्चलमाकृष्य लोतकम् अपासारयत् । विहगानां निशान्तरावः श्रुतिगोचरोऽभूत् । सा उदासीनतया वातायनमपश्यत् प्रकाशः तथापि तमोगर्भः । सा दौर्बल्यम् अन्वभवत् । कथा निह्नुता व्यथा तु तथैव । अद्य देहे अलक्ष्यरोगः । उपशमयितुम् उपचारक समयो नास्ति । देहः क्षीयते । मनश्च उत्साहं त्यजति । सम्मुखे सं अरुचिकरम् । केवलशाटिकामाच्छाद्य सा कुलीनस्य पुत्री··· अभिजातस्य वधूः·······।

उपशान्तो निशान्तः ।
प्रकाशस्वरूपे दिवसो विषयवशः । अर्जनलोभने कर्मनिर्मन्थः श्र विरसः । उत्कोचरचनायां कार्यालयपुस्तिका मसीविकला । ईर्ष्याविः परस्परपथरोधिनी कर्मशाला । वञ्चनवाञ्छातले चतुरा वि रजस्वला ।
चिन्तनकुन्तले तु पन्था अनेकान्तः ।

अनुदात्तवेशेन अद्य आश्रमं प्रविशति कुलभद्रः । याच्ञाका मनोमूले तस्य निजपुत्रस्य शुभानि······प्रभुत्वस्य अभिषेकः··· अभिजातस्य मर्यादा······सम्पत्तेः हस्तान्तरीकरणस्य महोत्सव कुलभद्रः मनाक् पुलकितः । सम्मुखे आश्रमस्य अभोगः । सौ

च्छटाऽत्र नैसर्गिकी। सरलश्च जीवनप्रवाहः। जीवनमात्रमिह गानाय मुक्तशैली। प्रतिदिशं स्वतन्त्रसरणिः। निर्विरोधः शाश्वतिकः। कुलभद्रः तल्लीनः।

गुहासोपाने अलेखः हास्यसरलः। निकटे उपनिषद्य शुभाङ्कः परिपृच्छति।

— प्रभो ! किमस्य जीवनस्य निदानम् ?

— सत्यम्……। आनन्दस्वभावेन इदमेव नानायते।

— किमेतस्य लक्ष्यम् ?

— शान्तिः……।

— मध्ये कोलाहलस्तु पुष्कलः।

— नानात्वमत्र निदानम्।

— तर्हि, कोऽयं मे पन्थाः ?

— पश्य, शुभाङ्क ! मितावधिकं जीवनमिह। किन्तु नानात्वस्य सीमा नास्ति। नाना हि अनन्तम्। गुरुस्तु करं धृत्वा तावत् सहायते यावत् नानात्वम् अपरामृष्टम्। यदा तत् परामृश्यते तदा गुरुः उपदिशति—'इदानीं मार्गा दृष्टाः। चतुष्पथोऽपि विलोकितः। अत्र स्थित्वा यथारुचि निश्चयः क्रियताम्। तव अनुभव एव सर्वसहायको भवेत्'।

— ततः……

— ततः तव आविष्कृतिः अन्यार्थं किंचित् आवरणमुन्मोचयितुं शक्नुयात्।

शुभाङ्कः किंचित् विस्मितः।

— तर्हि, कियद्दूरे स चतुष्पथः ?

सरलभावेन अहसत् अलेखः।

शुभाङ्कः नम्रभावेन अयाचत।

— प्रभो ! तावद्दूरं भवान् मे सहायको भवतु। तस्मिन्नेव चतुष्पथे मां प्रापयतु।

शिष्यप्रार्थनया गुरुस्तरलः ।

— तथास्तु……।

सश्रद्धम् अलेखः नमोमुद्रातः शुभाङ्कमुत्थापितवान् । अदूरे दृष्टिं निक्षिप्य अवदत् ।

— शुभाङ्क ! पश्य, पिता ते इत आगच्छति । याहि……, यथाविधि सत्कृत्य तमत्र आनय ।

पथभ्रान्त्या कुलभद्र इतस्ततः पश्यति । किंचिद् विचारयति । पुरःसरति……। पुनः पश्चात् पश्यति । क्लान्तिम् अपनुदति । खेदं शीतलयति । सुदीर्घं निश्वसिति । शक्तिम् आहरति । मनः स्थिरीकरोति । अलेखं मनस्यति । वक्तव्यं निश्चिनोति । प्रार्थनप्रकारं विवेचयति । गुरोः प्रतिवचनम् अनुमिनोति । तस्य च प्रतिक्रियां विमृशति । अग्रे चलति ।

पश्चात् शुभाङ्कः सम्बोधितवान् ।

— पितः !

परिचितस्वरं निशम्य कुलभद्रः अपश्यत् ।

— अर ! शुभाङ्कः ?

शुभाङ्कः प्रणिपत्य अवदत् ।

— इत आगच्छतु । गुरुदेवः गुहानिकटे आसीनः ।

पुत्रं निकटे प्राप्य कुलभद्रो गौरवान्वितः । स च इदानीं मार्गं निर्दिशति इति तस्य प्रथमानुभवः । कुलभद्रः सुप्रसन्नः । शुभाङ्कः अपृच्छत् ।

— गृहे कुशलिनः सर्वे ?

हर्षोत्कर्षं प्रकटयन् कुलभद्रो विह्वलोऽभूत् ।

— सर्वं समीचीनम् । सर्वे स्वस्थाः सन्ति ।

शुभाङ्कः मार्गं निरणयत् ।

— इत आगच्छतु । पश्यतु……अग्रे…… गुरवः ।

कुलभद्रः अन्तिकगामी

— अहो……सौम्यः !!

तरलहृदयः कुलभद्रः गुरुमुपासरत् अलेखः। पूर्ववद् धीरः। आशीर्वादवितरणे नितरामुदारः। श्मश्रुमयलपनपरिसरे तस्य कालप्रव्रज्या अर्वाचीना। लोलितचर्मरेखायां विषयधारा मर्ममलिना। मुक्तदेहे प्रकृतिः आकृतिकृपणा।

कुलभद्रो विनम्रः।

शुभपृच्छायां अलेखो मुक्तहृदयः।

— कुशलं खलु ?

— भवदाशिषा सद्य एव समञ्जसम्।

— किमन्यत् ?

— तदेव निवेदयितुमागतः। पुनश्च किंचित् प्रार्थयितुम् उत्सुकः।

— कथयतु……।

— अदूरे वैशाखपूर्णिमा। तद्दिने पुत्राभिषेकः निश्चितः अस्माभिः। यदि भवतः अनुमतिरत्र स्यात् तर्हि……

— क्रियतां नाम।

— अहं वृद्धः संजातः। संपत्तेः भार इदानीं मयि अधिकः। अतः हस्तान्तरीकरणं निश्चित्य आगतोऽस्मि। भवान् प्रथमतो मे निमन्त्रणं स्वीकरोतु।

— स्वीकरोमि।

— भवतोऽपि उपस्थितिः तत्र काम्यते।

— भवतु नाम।

— अवश्यम्……।

— अभिज्ञो भवान् किं वा वच्मि ? शुभाङ्को मे अतीत प्रियः। तदर्थं सकलमिदमायोजनम्। किन्तु भवदाशिषा स महान् भवतु इति मे कामना। स दिव्यज्ञानं प्राप्नोतु। कुलम् उज्ज्वलयतु। एतावदेव प्रार्थ्यते भवदीयचरणकमले।

— तथास्तु।

गुरोरुदारहृदयं परिचिन्वानः कुलभद्रो वाष्पगद्गदः। स तस्य

चरणधूलिमानीय प्रार्थितवान् ।

— अद्य शुभाङ्कस्य गृहगमनम् अनुमोदयतु कृपया ।

अलेखो विहस्य आदिशत् ।

— शुभाङ्क ! अनुमोद्यते ते गमनम् । पूर्णिमादिने साक्षात्कारः। संप्रति प्रस्थीयताम् ।

अलेखः गुहां प्राविशत् ।

पितृमुखम् अपश्यत् शुभाङ्कः । अलक्ष्ये निगलितमश्रुधारद्व अपसार्य सः अन्वनयत् ।

— पितः ! आगच्छतु……। इत आगच्छतु ।

पुत्रस्य कोमलसम्बोधने कुलभद्रो विपुलमनस्कः । स क प्रसारयत् । शुभाङ्कः तस्य करं निजस्कन्धोपरि आलम्बयन् अवदत् ।

— आगच्छतु……।

— इतो मे चिन्ता नास्ति, पुत्र !! त्वं मे सहायः । त्वमेव मार्ग- दर्शकः । अपराह्णम् अवरोहतु । रजनी आगच्छतु । चन्द्रो न विकशतु । अमावस्या तमोजालं विस्तारयतु । मेघो यथेच्छ गर्जतु । आकाशः करकान् पातयतु । कालो मां कवलीकरोतु। तथापि भयं नास्ति, पुत्र……!

पथिकद्वयस्य सुप्रस्थाने अपराह्णयात्रा मार्गविरला । अग्रे दीर्घ दिग्वलयः । पश्चिमाधरे लाक्षारसः सरसः । अभिधेयत्वसंधाने संध्या मन्दिरद्वारस्था । अमावस्याया अङ्कनिरूपणे गोशालादीपाली देहली- रसिका । सरीसृपस्य अभिसारे स्वैरशिरोमणिः ग्रामसरणिः ।

आलग्नं कर्मणो मध्यान्तरम् ।

दायित्वसर्वस्व उपार्कः श्रान्तः । कर्मशिविरे एकाकी आसीनः। परिचरा निजचर्यायाम् अवकाशभोगिनः । स्वयं स निजमर्मणि विलीनः । दीर्घदिनेभ्यः गृहादागतम् । तदनु कर्मैव मनस्तत्त्वे मुख बन्धः । आभिजात्यप्रतिष्ठा च लक्ष्यसमष्टिः । परमद्य सरणिं रुणद्धि तद्दिनस्य गुरुसाक्षात्कारः ।

सहसाऽत्र अलेखः समागतः। कुशलम् अपृच्छत्। परिवाराय स्वस्ति व्यतरत्। ततो भृशमकुप्यत्।

— त्वम् एतावान् नीचः संजातः ?

अधोमुख उपार्कः प्रतिक्रियामसूचयत्।

— मन्ये, शुभाङ्कः भवन्तं प्रतीपयितुं यतते।

अलेखः दृढं प्रत्यरुणत्।

— उपार्क! गुरुः नानीतिं समर्थयति। सत्यनिमित्तमेव तस्य पक्षपातः। त्वादृशानां नयने पार्थिवसंपत्तिरेव भूयसी। अतः यां कामपि अनीतिं नीतित्वेन ग्रहीतुं प्रतिपादयितुं च युष्माकं प्रयत्नः। तदर्थं युष्माकं मोहः……ईर्ष्या……असूया। पुनश्च सर्वमेतत् युष्माकम् अवबोधं प्रतिरुणद्धि। अतः सर्वे युष्माकं सम्मुखे शत्रुरूपेण दण्डायमाना भवन्ति। युष्माकं भीतिः वर्धते। किन्तु आभिजात्यव्याजेन युष्माभिः अहंकारः प्रदर्श्यते।

उपार्क! बहुवारबोधितस्यापि ते अवबोधः तथैव संकीर्णः। इदानीमपि समयः अस्ति। पुनः विमर्शं कुरु। संसारतः किं नीत्वा गमिष्यसि ? इदं सुन्दरशरीरमपि त्वया सह न यास्यति। कस्य कृते मोहः ? किमर्थं संकीर्णता ? कथं हीनस्वभावः ?

अलेखो विरतः। विमुखतया च प्रस्थातुमुद्यतः।

उपार्कः अन्वनयत्।

— सत्कारं मे स्वीकरोतु।

— नहि……। नाऽयम् अवसरः। इदं ते कर्मशिविरम्।

— तर्हि……। गृहे मे पादस्थापनाय कारुणिको भवतु कदाचित्।

— बहुवारं त्वयाऽहं निमन्त्रितः……अनुरुद्धः……अनुनीतोऽपि। किन्तु यावत्कालं गृहे जीवनस्य न सन्तुलनं, न वा सत्यस्य प्रतिष्ठा तावदहं निमन्त्रणं स्वीकर्तुं न प्रसन्नः।

अलेखो निष्क्रान्तः।

उपार्कः प्रकृतिस्थः। मनसि क्लिन्नाऽभूत् अभिधायाः शीर्णप्रतिमा। अहो……एषु एव कियद्दिनेषु अभिधा कियती न म्लाना ? आकृतिः

तस्याः क्रियच्चापल्येन नावतीर्णा ? शरीरं कियत् शीघ्रं न पुष्टि-विहीनम् ? किन्तु रोगः कुत्र ? कलहभयेन वराकी मौनमाचरत्। मनोमोचनाय सुयोगो न प्राप्तः। व्रतच्छलेन उपवासच्छलेन च आत्मानं कृशीकृतवती। परं मङ्गलस्य अवसरो नागतः।

अन्तराले चिन्तायाः समुद्रिका। परिपृच्छामात्रं प्रतिवचनस्य अभावः। सम्बोधने गोपनलोतकम्। वेशे यथेच्छपर्याकुलता। आभूषणे निर्लोभदृक्पातः। गतिमात्रम् अनन्तरस्य अनपेक्षा। आचरणमेतद् अभिधायाः ? सत्यम्……। कियत्त्वरया सा न परिवर्त्तिता ?

उपार्कः सकृदभिधां सकृच्च गुरुमचिन्तयत्। ततो व्यमृशत् —सत्यम्……, किमस्ति प्रभुत्वेऽस्मिन् ? किमहं नेष्यामि। संसारतः ? कथं वा नेतुं शक्नोमि ? सर्वमत्रैव त्यक्तव्यम्। अपरं च यदर्थं सर्वमिदमानन्दकरम्……यदर्थं च जगत् सुन्दरम्……यदर्थं दृश्यमानं स्नेहसुलभम्……यदर्थं वा वर्त्तमानं रुचिकरम्……तत्तु न परिचिनोमि। अहो, व्यामोहो मयि ? अहो, स्खलनं मम ? अहं कियान्न स्वार्थपरः ? कियान् अहं न संकीर्णः ? कियान्न हृदय-हीनः…? उपार्कः शय्यारूढः।

अनुतापस्य अश्रु प्रथमवारं तस्य नेत्रकोणमस्पृशत्। मनः तस्य चञ्चलमभूत्। स शयितुं नापारयत्। प्रतिक्षणम् अनपेक्षितं दहनम् अन्वभवत्। अस्थिरभावेन स इतस्ततो विलोक्य शब्दापितवान्।

— अरे……! को वर्त्तते ?

परिचारकः उदतरत्।

— अहमस्मि……। आदिशतु……।

— घोटकाः अत्र सन्निहिता वा ?

— सन्ति।

— चालको वर्त्तते ?

— वहिः सुप्तः।

— जागरय······

आदेशं प्राप्य चालक उपस्थितः। शनैश्च नम्रोऽभूत्।

— गन्त्री सम्यक् अस्ति ?

— समीचीना।

— तर्हि, सज्जीभव······।

— अकाले······कुत्र यात्रा ?

— रात्रो······घोटकाः······

— बिभेषि वा ? अहं चालयिष्यामि······

— तथा न वच्मि······। भवतु······अहं प्रस्तुतः। वहिरागच्छतु भवान्।

निदाघरजनी उपभोग्या आसीत्।

अन्धकारे उपार्कः गृहं प्रापितः।

रक्षी सविस्मयं मुख्यद्वारम् उन्मोचितवान्। चालकः यथास्थानम् अश्वान् संस्थाप्य विश्रान्तुं गतः। परिचारकः अन्तःपुरस्य मार्गं निर्दिश्य पूर्ववत् द्वारं पिहितवान्। तेनैव वेशेन उपार्कः अभिधा प्रकोष्ठम् अभिसृतः। सपदि अपश्यत्······द्वारं सर्वम् उन्मुक्तम्। स विस्मितः। मृदुगतया च समचरत्। पश्चात् द्वारं पिहितवान्। प्रदीपं च अदीपयत्। पुनरपि चकितः। ······विपर्यस्ता पर्यङ्कशय्या शून्या। हृदये तस्य स्पन्दनं प्रगुणितम्। स इतस्ततो दृष्टिमचारयत्। ततः किंचित् आश्वस्तः। किन्तु खिन्नोऽभूत्—कटमात्रशय्यायाम् आलुलायते अभिधा। उन्मुक्ता कवरी तस्या मुखार्धम् आच्छादयति। कति केशाः कटमतिक्रम्य भूतलं स्पृशन्ति। उपेक्षित वसनं शय्यायते। मुद्राविहीनकरद्वये आभरणं विवर्णम्। शिथिलपादयुगलस्य वक्रस्थितिः भीतिमावहति। उपार्कः भयेन शब्दापितवान्।

— अभि······! अभि······!

अभिधा पार्श्वशायिनी अभूत्।

— अभि······! अभि······!

नाम्नः संकुचिताक्षरद्वयम् अभिधायाः चैतन्यमस्पृशत्। परिचितमिदं प्रीतिपूर्णं नाम। तेन सह स्वरोऽपि परिचितपूर्वः। सा नेत्रे उन्मोच्य चकिता। सहसा उत्थाय वसनाकुञ्चनपुरःसरम् आत्मानं सज्जीकृतवती। किन्तु किमपि निश्चेतुं उन्मादिनी इव जल्पितुमारभत।

— कुत्र अभी······? अहम् अभी ?? नहि······। तर्हि······, कः 'अभि······! अभि······!' आकारितवान् ? भवान्······? इयद्रात्रौ······?

— हम्······।

— किमयं स्वप्नः ······? किमियं माया······? अथवा मे मतिभ्रमः?

— नहि······। एतत् सत्यम्।

— सत्यम्······स आगतः ? स तु न भवादृशः। नैतावान् अचञ्चलः? नैतावान् निरहंकारः नैतादृशः प्रीतिकातरः ? सत्यं कथयतु 'को भवान् ?'

— स एवाऽयं पुरुषः, अभि······!

— भवान्······??

— एतदेव सूचयितुमागतः। मया त्रुटितम्। मम स्खलनं सम्यक् मया अवबुद्धम्। त्वन्निकटे तदेव स्वीकर्तुं प्रधावन् उपस्थितः। अहम्······अन्धः······स्वार्थपरः······संकीर्णः······विचारमूढः।

— भवान् स एव पुरुषः ?

— अभि······! त्वामहं बोद्धुं न प्राभवम्। प्रभुत्वमोहेन अहं अन्धः संजातः। अतः त्वां हारितवान्। अद्य तु त्वामेव अन्विष्यन् अत्र दण्डायमानः।

— किमपि बोद्धुं न प्रभवामि। किमपि न मे रोचते। भवान् विश्राम्यतु······स्वपितु।

— न माम् अन्यथा चिन्तय, अभि ! त्वन्निमित्तं मयि सद्बुद्धिः उदिता। त्वदर्थमेव गुरुः स्वयं मन्निकटमागतवान्। पुनश्च

कथितवात्—'यावत्कालमावयोः न सौमनस्यं तावन्न……।"

अभिधा विपरिवर्त्त्य वातायनसमम्मुखं गतवती । उपार्कः पूर्वकथनं विरमयन् कातरकण्ठेन समबोधयत् ।

— अभि……

अभिधा निरुत्तरा । सरलतया वहिः पश्यन्ती दण्डायमाना । उपार्कः कियत्क्षणं नीरवः । तस्य नयनाग्रे अभि-ायाः पश्चाद्भागः । तदुपरि आलम्बमाना विपर्यस्ताः केशाः । एकपार्श्वे दोलायते स्खलिताञ्चलम् । उपार्कः अतीव कातरः ।

— न मां क्षमसे, अभि……!

अभिधा तथापि प्रतीपा ।

— किं मे प्रायश्चित्तं त्वया कर्तुं न शक्यते ? तर्हि, अहमितः चिराय प्रस्थानं करोमि ?

उपार्कः प्रस्थातुमुद्यतः ।

अभिधा विवर्त्य अवदत् ।

— शृणोतु……।

उपार्क सतृष्णमपश्यत् ।

उपार्कस्य नेत्रे प्रथमवारम् अश्रु विलोक्य अभिधा विलापविह्वला संजाता । उन्मादिनी इव प्रधावन्ती सा तं दृढमालिङ्गत् । अभिधायाः शीर्षकपोले अश्रुप्लावनम् अवलोक्य उपार्कोऽपि अस्थिरः संजातः । उभयोः अश्रुतर्पणे निशीथशय्या तथापि संगमोत्सुका आसीत् । किरणप्रणिधाने शुभस्वभावाः प्रातःप्रदीपाः ।

वस्तु भग्नं चेत् तस्य पुनर्निर्माणं भवेत् । जीर्णं चेत् तस्य पुनरुद्धारो भवेत् । प्रकृतिः शीर्णा चेत् पुनर्नवीना भवेत् । संसारः अस्वस्थश्चेत् पुनः स्वस्थो भविष्यति । अनाविष्कृतश्चेत् आविष्करिष्यते । दुर्गमश्चेत् अभिगम्यो भवेत् । दुरवगमश्चेत् अवगम्यो भविष्यति । दुरधिगमश्चेत् अधिगम्यो भवेत । परं किमधिगम्यते ? किमवगम्येत् ? अनुभवे तु शान्तिसारा ऋतस्य धारा……अमृतस्य धारा……।

विमर्शविलीन उपार्क उपविष्टः सभाजनगृहे। सद्योभूषिता अभिधा तदीयकरे उपाहारं समर्प्य उपविष्टा। उपार्कस्य प्रसन्नमुखे हास्यमखेलत्। अभिधा स्मेरमुखी। किन्तु उपार्कस्य चकितनिरीक्षणे अभिधा श्रीहीना। मुखं तथापि शुष्कम्। नयनतले श्यामिकास्तरं रतिकातरम्। अधरं न मनोहरम्। उपार्कः कारुणिकः संजातः। किंचित् अभिमानेन उक्तवान्।

— अभि……! त्वं जीवनमिदं भारत्वेन स्वीकृतवती। तदर्थं गरीयसि चिन्तने निमग्ना।

अभिधा उपार्कस्य मुखमपश्यत्।

उपार्कः अहसत्।

— पश्य, अभि……! किमस्ति इयति चिन्तने ? हसितुं यतस्व…। पुनश्च यदा दुश्चिन्ता आयाति ताम् उपहस। ततो मधु मिलिष्यति।

अभिधा सामान्यमहसत्। उपार्कः ताम् अद्य संपश्यन् प्रसन्नः। साक्षादिदं तदेव हास्यम्… यन्निह्नुतमासीत्……यच्च सद्यो विकशितम्……। उपार्कः शनैः उपरि-प्रासादमुत्थितः। अभिधा वहिरपश्यत्। मेघमुक्तः तपनः पुनः प्रकाशं विकिरति। प्राकारद्वारम् उन्मुक्तमस्ति। अदूरमार्गे कश्चन आगन्तुकः। सः इतोऽभिगच्छति। तरुणः अभिजात इव लक्ष्यते। अभिधा निर्निमेषं तमपश्यत्। आगन्तुकः मुख्यद्वारम् उपस्थितः। रक्षी द्वारं रुद्धवान्। आगन्तुकः अपृच्छत्।

— मन्ये, इदम् उपार्कमहोदयस्य गृहम् ?

रक्षी दृढमवदत्।

— हाँ……एतदेव। दर्शनार्थम् अनुमतिः अपेक्ष्यते।

आगन्तुक इतस्ततोऽपश्यत्।

अभिधा मध्यद्वारम् उपस्थिताऽसीत्।

स ताम् अवलोक्य सम्बोधनमुखेन अवदत्।

— देवि ! केनोपायेन अनुमतिं प्राप्नुयाम्……?

अभिधा तत्क्षणमादिशत् ।

— रक्षिन्……! प्रवेशय आगन्तुकम् ।

रक्षी मार्गं निरदिशत् ।

आगन्तुकः मध्यद्वारमुपस्थितः । सविनयं नमस्कृत्य अपृच्छत् ।

— देवि ! भवती गृहपत्नी ?

कथयतु……।

— अहं सुन्दरग्रामनिवासी । नाम्ना अनन्तः……कुलभद्रस्य पुत्रः ।

— कुलभद्रः ?

— मन्ये, श्रुतपूर्वं स्यादिदं नाम ।

— हम्……इदानीं स्मरामि । आगच्छतु……अन्तरागच्छतु……।

अभिधाहृदये स्पन्दनमखेलत् । सा चञ्चलाऽभूत् । शीघ्रतया सत्कारनिमित्तं धात्रीमादिशत् ।

— सभाजनगृहं प्रवेशयन्ती सा तमनुरुद्धवती ।

— उपविशतु……। कथयतु……, कः समाचारः ?

अनन्तः निमन्त्रणपत्रं प्रसारितवान् ।

अभिधा कौतूहलिनी ।

— किमिदम्……?

— किं विवाहः ?

— नहि……अभिषेकः ।

— कस्य……? भवतः……?

— नहि, मम अग्रजस्य……

— अग्रजः ?

— नाम्ना शुभाङ्कः ।

अभिधानयने सहसा भावो विपरिवर्त्तितः । सा नितरां प्रसन्ना कौतूहलिनी च भूत्वा आकारितवती ।

— अयि……! उपरि किं करोति भवान् ? अद्य आगच्छतु।
पश्यतु……, कोऽत्र आगतः।
उपरि उपार्कः अपृच्छत्।

— कस्तत्र……?

— भवदीयबन्धुशुभाङ्कस्य अनुजः ?
एतत् श्रुत्वा उपार्कः त्वरया आगतवान्।
अनन्तः प्रणामं न्यवेदयत्।

— अभिवादये……।

— नमस्ते। कथं वर्त्तते अग्रजः ?

— सम्यक्।
अभिधा सोत्साहम् उक्तवती।

— शुभाङ्कस्य अभिषेको भविष्यति। निमन्त्रणमानीय अयम् उपस्थितः।
उपार्कः हर्षमसूचयत्।

— शोभनम्……। अभिषेकः कथम् ? न विवाहः……?

— यथा पितृपादनाम् आग्रहः।

— भवतु……। कदा भवति ?

— तिथिः वैशाखपूर्णिमा।

— भवतु……। पुनरन्यत् ?

— इदं दम्पतीनिमन्त्रणम्। अवश्यमुपस्थातव्यम्।

— जानीमहे……। अवश्यं गमिष्यामः।

— भवतु……। प्रस्थानं प्रार्थये।

— भवदीयसुप्रस्थानमभिलषामः।

अनन्तः मुख्यद्वारम् अतिक्रम्य निष्क्रान्तः। अभिधा तदीयमार्गं विलोक्य चिन्तारता। उपार्कः तां वारितवान्।

— अरे……! किं चिन्तयसि ?

— तद्दिने भवान् एकाकी गच्छतु।

— किमर्थम् ?

— नाऽहं गमिष्याति । मम गमने तु भवान्······

— अरे······, नहि । नास्ति मनसि मे सन्देहः । त्वदर्थमेव हारितनिजत्वं मया पुनरधिगतम् । पुनस्तत् हारयितुं नेच्छामि । एहि······अन्तःपुरमागच्छ । किं पुनरभिमानेन ?

इत्थमपि स्वस्थीकृतसम्पदा जीवनं नवीकर्तुं प्रभवति जनः । अहंकारमवनमयन् असाध्यं साधयति । अविवेकम् अवदम्य साफल्यमाहरति । प्रभुत्वं सम्यक् उपयुज्य शक्तिमान् भवति । कर्मपरिसरं संयमयन् दृढः संजायते । प्रवृत्तिं सुनियम्य पूज्यो भवति । ततो निसज्जं सज्जीभवति । ऊषरं सस्यं प्रसूते । मरुः चारूणि तनुते ।

हर्षप्रकर्षे उन्मोदते अनन्तः ।

व्यापारे आदरस्य परिसीमा वृहती । आयोजने मनोयोगः अभूतपूर्वः । उत्सुकनिमज्जने तस्य अग्रजप्रीतिः विनयशीला । अनुभवगौरवे च अनुयायिभावना वशंवदा । साधारणसौमनस्ये इदानीं तु महोत्सवो हितैषी । सौहार्दसूचने साक्षात्कारो बान्धवीयः । स्नेहविभवा च अतिथिचर्चा ।

अनन्तः अभिषेकस्य साफल्यं कामयमानः शन्नोदेवीमुपगतः । उदासीना शन्नोदेवी पूर्ववत् पूजाव्यापृता । अनन्तो न्यवेदयत् ।

— मातः ! श्वः वैशाखपूर्णिमा ।

— अनन्तः······?

— हं······मातः ! सर्वमायोजितम् । सर्वस्मिन् कार्ये उत्सुकाः सन्ति साधारणाः । अतिथयः क्रमशः समागच्छन्ति । तेषां सौविध्यनिमित्तं यथास्थानं जना नियोजिताः ।

शन्नोदेवी निरुत्तरा ।

अनन्तः सोत्साहं विजल्पति ।

— मातः ? चिन्तया अलम् । सुपरिकल्पितो नियोगः । कार्यभारः सम्यक् वितीर्णः । न कुत्राऽपि शैथिल्यम् । परिचालनं सुचारु

भवति ।

शन्नोदेवी अन्यमनस्का ।

अनन्तः सविस्मयमपृच्छत् ।

— मातः ! न वदसि कथम् ?

शन्नोदेवी सस्नेहमपश्यत् ।

किन्तु नेत्रे तस्य अश्रु विलोक्य अनन्तः आश्चर्यान्वितः ।

— मातः ! विलपसि ? किमस्मिन् अभिषेके तव सम्मतिर्नास्ति ? अग्रजस्य सुखं न कामयसे ?

शन्नोदेवी विव्रतभावेन तस्य मुखे करं निधाय अवदत् ।

— नहि······नैतद् वद, पुत्र··· ! अग्रजस्य ते शुभं नूनं कामये······ भृशं कामये······।

— तर्हि, विलापः कथम् ?

— एका स्मृतिरुदिता ।

— कैषा स्मृतिः ?

— वैशाखपूर्णिमायाः······

— कथय······नु ?

— एकदा दिनेऽस्मिन् तव अग्रजनिमित्तं मम प्रार्थना प्रथमा आसीत्। अस्मिन्नेव दिवसे तस्य सौभाग्यकामनया मया सः समर्पितः पुनश्च सैव पूर्णिमा। तदानीं च तस्य अभिषेकः। सर्वमेतद् विमृ··· किमपि अपूर्वमनुभवामि, पुत्र !

— शुभमेतत् । नान्यथा चिन्तय ।

— हुँ······पुत्र ! शुभम्······।

— किन्तु, मातः ! इदानीं त्वमित्थं वदसि । तद्दिने माता······

— अवनी······?

— हम्······। साऽपि अन्यमनस्का आसीत् । सर्वमेतद् वोद्धुं प्रभवामि, मातः ! किं वा सत्यं निह्नुतमन्तराले ?

— नहि, पुत्र ! न तथा किमपि । उत्तीर्णवयसि एवं कदाचित् जना···

विकारो दृश्यते। तदर्थं चिन्ता माऽस्तु। कर्मणि आत्मानं व्यापारय। अन्यथा कुत्रचित् अव्यवस्था स्यात्।

अनन्तः नम्रभावेन वहिरागच्छत्। मनसि तथापि संशयस्य स्पर्शलेशः।

पूजाप्रकोष्ठे विनयावनता शन्नोदेवी। पुत्रस्वस्तिकामनातले तस्याः स्मृतिरोमन्थः अतीतग्रासी। शाश्वतयाजने पौर्णमासी सैव प्राचीनप्रमा। दिवाप्रवाहः नामान्तरे महाकालः। तत्र आशाबन्धो नाम जीवनधारणार्थं कतिपयकल्पनाराशिः। सूत्रपरामर्शे तु सेयं धारा अनन्ता। सूक्ष्मतानिरीक्षणे शन्नोदेवी आत्मविस्मृता।

द्वारे दण्डायमाना अवनी।

शन्नोदेवी क्षीणमपश्यत्।

— अवनी ?

— हुँ······ भगिनि !

— अभिषेकस्य प्रारम्भिकं तु······

— प्रारब्धम्······। सर्वे सज्जीकृताः। पिता भूषितः। पुत्रावपि भूषितौ। त्रयस्य मस्तके अद्य अभिषेकस्य उष्णीषं शोभते। किन्तु परिधापनसमये शुभाङ्कस्य मस्तकात् वारत्रयम् उष्णीषं स्खलितम्।

— अवनी······?

— हृदय मे कम्पते, भगिनि······! किमपि कर्तुं न प्रवर्त्तते मनः।

— अवनि ! इयद्दिनानि व्यतीतानि। कदाचिदपि ते च्युतिर्नाभूत्। इदानीं वा कथं तरला भविष्यसि !

— सोढुं न शक्नोमि, भगिनि······!

— नहि, अवनि ! सहनीयमेव। मनः पुनश्च दृढीकरणीयम्। अन्यथा सर्वं निष्फलं भवेत्।

— बाल इव अनन्तो गौरवान्वितः। अभिजातभूषणेन पिताऽपि तादृशः। शुभाङ्कस्तु पूर्ववत् धीरः······स्थिर······।

— नेदानीं हृदयदौर्बल्यं शुभकरम् यथायोग्यं सर्वं व्यवस्थापय।

अन्यथा अतिथयः अवमानिताः स्युः।

अञ्चलाग्रे लोचनं प्ररिष्कृत्य अवनी शनैरपसृता। गृहे वहिश्च आगन्तुकानां पूर्वाह्णपरिचर्या पारम्परिकी। मङ्गलवाद्यध्वनिः परिसरं मुखरीकरोति। कर्मनियुक्तानां व्यापृतितले पौर्णमासी सामाजिकी। सुन्दरग्रामस्य प्रतिमार्गं स्वागतिका।

प्रासादचूड़ातः अपराह्णमवातरत्।

नदीबालुका शीतलाऽभूत्। स्वेदमपहर्तुं प्रवृत्ता मनोज्ञसंध्या। ललनाविलासे सुरभिमतनोत् मल्लिकामाला। नववधूनयने मधुमत्ताऽभूत् कज्जलकला। पिप्पलपर्णेषु स्वरमभरत् पवनलीला। निदाघवेला मार्गकेवला।

साक्षात्काराय सज्जीभूतः शुभाङ्कः। कुलीनो वेशः। प्रसन्नं लपनम्। प्रफुल्लं नयनम्। विकसितम् अधरम्। विनम्रा भङ्गी। नत्नोमुद्रा प्रासङ्गिकी। प्रतीक्षा दर्शनसारा। परिप्रश्नः परिमितः। सन्देशः स्वस्तिकल्पः।

परिचारको न्यवेदयत्।

— दम्पती दर्शनमिच्छतः।

शुभाङ्कः आदिशत्।

— उपस्थापय……।

दम्पती उपागच्छतः।

शुभाङ्कः दृष्टिं प्रासारयत्—आलोकमालातले केयं मालिन्यमालिका……? केयं कालकवलिता सरलरेखा? वेशैकशरणा केयम् अपराह्णस्य अरुणा……? कोऽयं सहचरः? नश्वरस्य निर्दिष्टदृष्टान्ते कोऽयं क्रमभङ्गुरः? परिचितपुराणे केयं व्यवधानविलुलिता प्रतिमाद्वयी … उपार्कः … अभिधा… ? अभिधा" उपार्कः?

विनम्रस्नेहाञ्जलिविनिमये परस्परमनोनिवेदनं भावपूर्णमभूत्।

परस्परविलोकने आत्मविवरणी श्रद्धाविधूता। हृदये पूर्वकालस्य तथ्यविमन्थः सद्यः उपशान्तः। उद्‌बुद्धस्मृतितले अनुरागो नवीकृतः। स्मितं प्रसारयन् शुभाङ्कः स्वागतं व्याहरत्।

उपार्कः अपृच्छत्।

— आश्रमतः अन्ये के आगताः ? मन्ये, गुरुचरणाः……

— आगमिष्यन्ति……। कथं वर्त्तते भवान् ?

— अभिधा तु अनेकदिनेभ्यः पीडिता आसीत्।

— तथैव दृश्यते।

— इदानीं तु……

— त्वादृशं जनं प्राप्य कथं वा स्वस्था न स्यात् ?

अभिधा सहसा चकिता। नयनाग्रे तस्या अभिजातश्मश्रुलयोः समन्वयमनोभूमिमावहन् दण्डायमान आतिथेयः स एव आश्रमवासी। परिच्छदो विवर्त्तितः। आकृतिः विलक्षणा अभूत्। किन्तु व्यवहारे प्रतिवाक्यं स्नेहरङ्गो भावनिर्यासः।

उपार्कः अवदत्।

— कियद्दिनतले गुरुदेवः साक्षात् समागत आसीत्।

— सर्वं श्रुतम्। मन्ये, इदानों स्थितिः परिवर्त्तिता।

— मम स्खलननिमित्तम् अहम् अनुतप्तः, शुभाङ्क !। अद्य तु बन्धुभावेन त्वं मे त्रुटिं शोधयिष्यसीति धिया समागतः।

— अरे ! कथं विषण्णोऽसि ? जीवने तु नाना चतुष्पथाः।

— तद्दिने सत्याबद्धभावेन अभिधाया दर्शनमपि त्वदर्थं मया निषिद्धम् अनेन अमङ्गलम् आमन्त्रितं मया। इदानीं तु……तव दर्शनार्थम् अभिधामानीय उपस्थितः। मन्ये, हृदयं मे अवगमिष्यसि।

शुभाङ्कः अहसत्।

— अरे ! तदेव बन्धुहृदयं पर्याप्तम्। किमधिकं कामयिष्ये।

— नहि, कथय……। सत्यबद्धभावेन तव कामनामपि अहं पूरयिष्यामि।

— मम कामना तु पूर्णा संप्रति । एकदाहं गुरुदेवनिकटे युवयोः सौमनस्यं प्रार्थितवान् । तदिदानीं पूर्णम् । इदमेव महत् दम्पती-दर्शनेन ।

— शुभाङ्कः ?

— आगच्छ……, अन्तरागच्छ……।

अभिधा उभयोर्मुखं विलोक्य सरसहृदया । किन्तु मनसि लहरीयति, आश्रमस्य तदेव निर्विशेषसौजन्यम्……शून्यमन्दिरस्य सीमारेखातले आश्रमस्य वक्रः पन्थाः……दोलायमाना वीथिलतिका-……पुनश्च लघुचतुष्पथाः……।

श्रद्धाकुसुमानि उपहृत्य शुभाङ्कः मातृदेवीनिवासस्य मार्गं निरदिशत् ।

— आगम्यताम् ……।

मातृमन्दिरे प्रविश्य अभिधा आत्मविस्मृता ।

वैशाखपूर्णिमा प्रकाशमतनोत् ।

जनसमागमे कोलाहलः क्रमशो वर्धितः । दानभोजनेषु अतिथयः आप्यायिताः । परितृप्ताः सुप्रस्थानाय प्रवृत्ताः । अनागता यथाकालं संप्राप्ताः । तर्पणप्रस्थानयोः धारा क्रमवाहिनी वर्त्तते । सकलकार्यपर्यवेक्षणे अनन्तः न्यस्तनियोगः ।

ससम्मानम् अलेखमादाय कुलभद्रः गृहम् उपगतः । गुरुदेवपरिपूजने समग्रोऽपि परिवारो निमग्नः । सर्वेषां समानकालीनोपस्थितिं विलोक्य अलेखः प्रसन्नः । मृदुवचसा स स्वस्ति व्यतरत् । सहसा उपार्कम् अभिधां च अभिलक्ष्य स अपृच्छत् ।

— उपार्क ! इतः परं, मन्ये, तव गृहं प्रति मम निमन्त्रणं भवेत् ।

उपार्कः विनीतः ।

— सर्वं जानाति देवः । तदेव आवयोः कामना ।

— शान्त्या निवस, जाते……!

ततो दृष्टिं निवर्त्य अलेखः किंचित् गम्भीरोऽभूत् ।

शन्नोदेवीं विलोक्य स स्मारितवान् ।

— देवि ! अद्य वैशाखपूर्णिमा ।

वाष्पवृत्तिं प्रतिरुध्य सा अवदत् ।

— जाने, गुरुदेव !

कियत् क्षणं नीरवो भूत्वा अलेखः अवनीमपश्यत् ।

— देवि ! अद्य वैशाखपूर्णिमा ।

— जाने, प्रभो……!

समयेऽस्मिन् वहिर्व्यापृतः कुलभद्र उपस्थितः । तं निरीक्ष्य अलेखः अभिलषितवान् ।

— कुलभद्र ! इदानीं प्रस्थानसमयः ।

कुलभद्रः सविनयं व्यज्ञापयत् ।

— अभिषेकोऽयं भवदीयकरकमलेनैव भविष्यति । तदर्थं सर्वं सन्नद्धम् ।

समयेऽस्मिन् अनन्तः व्यग्रभावेन समागच्छत् । शुभाङ्कं विलोक्य सः अभाषत ।

— अग्रज ! दर्शनाय केचन अतिथयः प्रतीक्षन्ते । वहिरागच्छतु……।

कुलभद्रो वारितवान् ।

— नहि । इदानीं त्वमत्र तिष्ठ । अभिषेकसमयः उपस्थितः । तत् सर्वं समाप्य स वहिर्गच्छेत् ।

अलेखः गम्भीरभावेन स्मारितवान् ।

— कुलभद्र ! अद्य प्रतिज्ञापितो दिवसः ।

सहसा कुलभद्रः चकितः ।

— गुरुदेव ……?

— इयं वैशाखपूर्णिमा तव संकल्पं पूरयिष्यति ।

— निष्ठुरो न भवतु । पुत्राभिषेकनिमित्तं भवानपि अनुमतिं दत्तवान् । कारुणिको भवतु……।

— अनन्तोऽपि तव पुत्रः कुलभद्र !

— गुरुदेव……?

अनन्तः विक्षिप्तभावेन अगर्जत् ।

— नहि, नैतत् सम्भवेत् अभिषेकाय अग्रजस्य अधिकारः । न तदन्यथा

भवेत् । नाऽहं कुलकलङ्को भवेयम् ।

शन्नोदेवी अनन्तं पार्श्वमाकृष्य अबोधयत् ।

— अनन्त ! कथं न बुध्यसि ? गुरुः अस्माकं पुरोहितः । स एव कुलस्य रक्षकः । स एव अधिकतया अस्माकं मर्यादां चिन्तयति ।

— नहि, मातः ! कथमग्रजस्य अधिकारं बलात् नेष्यामि ?

— नाऽत्र अधिकारस्त विचारः । सत्यस्य, संकल्पस्य, नीतेश्च रक्षा-विषयो गरीयान् ।

— नहि, नैतद् भवेत् ।

अनन्तस्य विक्षिप्तभावमालक्ष्य कुलभद्रः कातरोऽभवत् ।

— गुरुदेव ! पुनर्विचारयतु भवान् ।

— त्वमेव विचारय, कुलभद्र !

कुलभद्रः अलेखस्य चरणं धृत्वा भृशं व्यलपत् । अलेखः कारुणिकः संजातः ।

— कुलभद्र ! तर्हि, अहं प्रत्यागच्छामि ।

अवनी दृढमवदत् ।

— नहि, नैतत् करोतु भवान् । अभिषेकम् आरभताम् ।

कुलभद्रः विचलितोऽभवत् ।

— अस्मिन् काले त्वमपि तथैव……?

शन्नोदेवी अन्वनयत् ।

— कथं सत्यभ्रष्टो भवति भवान् ?

— सत्यभ्रष्टः……? कः सत्यभ्रष्टो भवति ?

अवनी पुनः दृढीकृतवती ।

— भवान्……। भवानेव……।

— अवनी……?

— स्मरतु भवान् । मम विवाहदिवसं स्मरतु……।

— सम्यक् स्मरामि……।

— यदा पाणिग्रहणनिमित्तं मम पितृनिकटे प्रार्थितवान् स तदा

किमुक्तवान् ? भवान् च किं कथितवान् ?

— नहि, न किमपि मानसम् आयाति ।

— भवान् सत्यबद्धः संजातः । संकल्पमुखेन सत्यमेव साक्षीकृत्य भवान् दृढमवदत्—"भवतः कन्यायाः पुत्र एव मम समग्रसम्पत्तेः अधिकारी भविष्यति । तस्य च अभिषेकं स्वयम् अहं कारयिष्यामि ।" ······स्मर्यते नु ?

— अवनि······! अवनि···! कियन्न भयङ्करं सत्यम् ? अवनि···! त्वमेव अद्य मे चक्षुरुन्मीलितवती । इदानीं नयने मे सर्वं प्रतिभाति । कथमिदं प्रथमतो नोक्तवती ? किमर्थं चिरायितम् ? अहा······, अहं कियान्न मोहग्रस्तः ? कियान्न विषयविधुरः ? अवनि ! तदेव सत्यं मनसि नि॰ाय एवावत् पर्यन्तं त्वं मया सह संग्रामं कृतवती । किन्तु······त्वामहम् अन्यथा चिन्तयित्वा यथेच्छं भर्त्सितवान् । क्षमस्व माम्···, क्षमस्व··· अवनि !

— विचलितो मा भवतु ।

— शन्नोदेवि···! त्वमपि अवनीं समर्थ्य विषयमिमं निगूहितवती । किन्तु अद्य वैशाखपूर्णिमा···। अद्यैव प्रतिज्ञापितो दिवसः । शन्नोदेवि···! सम्यक् स्मरामि—अस्मिन्नेव दिने एकदा गुरुदेवस्य निकटे शुभाङ्कं समर्पयितुं संकल्पः कृतः । तस्य च मङ्गलनिमित्तं, मुक्तिनिमित्तमपि, बहुशः प्रार्थितो गुरुदेवः । सोऽयं साक्षी साक्षात् उपस्थितः······।

अलेखः समाश्वासितवान् ।

— आश्वस्तो भव कुलभद्र !

— गुरुदेव ! हृदये अद्य आनन्दं वा दुःखं किमपि ज्ञातुं न प्रभवामि । अयं शुभाङ्कः··· ··अयं च अनन्तः । उभावपि भवदीयप्रसादत एव । उभयस्य मार्गं निर्दिशतु भवान् । इदानीं तु नयने मे भवत्प्रदर्शितः स एव सत्यपक्षः । तत्र सहायितुम् एकपार्श्वे शन्नोदेवी, अपरपार्श्वे च अवनी सदा दण्डायमाना । ······आशीर्वदतु······, इतःपरं न कदाचिन् मे स्खलनं भवतु ।

— कुलभद्र ! पथि गच्छन्ति बहवः। किन्तु यदा चतुष्पथम् आयान्ति तदा सम्यक् पथं निश्चेतुं केचन प्रभवन्ति ? सत्यपथमाविष्कर्तुं वा केचन धैर्यशालिनो भवन्ति ? को वा अभिलषति,—तस्य उत्तराधिकारी सन्मार्गगामी भूत्वा सत्यमाविष्करोतु...... महात्मा भवतु ? केचन सन्ति तादृशाः ?

अनन्तः विनयी अभूत् ।

— गुरुदेव ! तर्हि, किमयं भग्नमार्गः मदर्थम् उद्दिष्टः ? मन्निमित्तं किं स एव पुरातनः पन्थाः ?

— नहि, अनन्त ! शुभाङ्कः मार्गं निर्मातुं प्रवृत्तः। त्वमपि तथा कुरु। मार्गाणां संयोगनिमित्तं न तदा नश्वरोऽयम् अलेख तिष्ठेत्। अपितु अन्तर्निहितं सत्यं गुरुः भविष्यति।

सर्वे स्तम्भीभूताः।

अभिधानेत्रतले अश्रुलेखा। अवनी-शन्नोदेव्योः मध्ये स्थिता सा वचनशून्या। अपरपार्श्वे उपार्कः गुरुमेव पश्यन् स्थिरः। अलेख कौषेयस्यूततः शंखमेकं बहिष्कृत्य उपार्कहस्तं प्रासारयत्। उपार्कः शंखम् अधमत्।

अलेखो ध्यानस्थः।

अभिषेकमारभत् शुभाङ्कः। प्रथमतया मस्तकत उष्णीषम् अवतार्य अनन्तस्य मस्तके परिधापितवान्। ततो ग्रीवात अभिषेकमाल्यमानीय अनन्तस्य गलके अलम्बयत्। अभिधा अर्घ्य पात्रं धृत्वा सम्मुखमागता। शुभाङ्कः चन्दनकुङ्कुमादिभि अनन्तस्य मुखमाभूषयत्। अवशिष्टम् अभिधा अमण्डयत् अनन्तस्य नयने तु लोतकप्लावनम्।

शंखध्वनिः निरवच्छिन्नः।

अनन्तः सर्वान् प्रणिपत्य अन्ततः शुभाङ्कनिकटे बाष्पविह्वल संजातः।

शुभाङ्कः अबोधयत्।

— अनन्त ! अपिहितमपि सत्यं क्रमश आलोकपथमागच्छति। तदद्य त्वन्निकटे समुज्ज्वलम् । तदेव ग्रहणीयम् । तदेव महत् । संसारोऽयं धैर्यमिच्छति······साहसमिच्छति। अनुगमनेन वा किं प्राप्नोति जनः? ममानुगमनं तु वृथैव। पृथक्तया सर्वम् अनुभवपथम् आनय। ततो ज्ञास्यसि······, आवयोः संपर्के दूरता कियती ? को वा कस्माद् वियुज्यते ?

शुभाङ्कः सर्वेभ्यः सुप्रस्थानं प्रार्थितवान्। सर्वे तु स्तब्धाः······ स्थिराः······स्थाणवः······।

अलेख उच्चारितवान्।

— सत्यं परं धीमहि······

शुभाङ्क आवृत्तिमकरोत्।

— सत्यं परं धीमहि······सत्यं परं······धीमहि······।

प्रसादस्य पश्चिमद्वारम् उन्मुक्तम् । अलेखः अग्रेसृतः। मन्त्रमुच्चारयन् शुभाङ्कः शनैः प्रतिष्ठते। समग्रशरीरे कौषेयवसनम्। स्कन्धे कौषेयस्यूतम् करे कमण्डलुः। चरणे काष्ठपादुका। शुभाङ्कः सत्यपथिकः।

पश्चिमद्वारे सर्वे विरताः। कियद्दूरे अनन्तः शेषप्रणतिं निवेद्य सन्न्यासिद्वयं व्यसर्जयत्। श्रवणपुटे तस्य "सत्यं परं धीमहि"। अपरपार्श्वतः प्रतिध्वन्यते उत्सवस्य कोलाहलः। विक्लवहृदये तस्य निष्ठुरस्पन्दनं प्रगुणयति परिवारस्य सत्यनिष्ठता। अनन्तः दृष्टिं निवर्त्य सर्वान् प्रत्यागन्तुम् अनुरुद्धवान्। रक्षी मार्गं निरदिशत्।

पश्चिमद्वारं पिहितम्।

पौर्णमासी प्लावनस्वभावा। निशीथप्रकाशः प्रसाररसिकः। सुन्दरग्रामस्य अभिषेकदीपाली तथापि कुण्ठीना। नदीकूले शुभाङ्कस्तु परिव्राजकः।

निजस्वरे स्नेहरङ्कः चक्रवाकः।

— समाप्तम् —

शोषःपोषश्च

(कविरत्नम् अमीरचन्द्र शास्त्री साहित्याचार्यः, दिल्ली)

शोषो मा विकलीकरोतु जगतीमित्यर्थितो वारिदः
काक्वा चाटुभिरुक्तिभिश्च बहुभिर्भूयोऽप्युपालम्भितः।
आहास्मान् यजतः प्रभुञ्च भजतो राष्ट्रावनायामितो
भद्राः पश्यत पश्यताद्य भवतां वृद्धेर्विपर्यस्तताम् ॥१॥

सत्क्षेत्रे पतिता कृषिर्मृगयते वप्तुर्न कञ्चिद् गुणं
कीलालं तरलञ्च शीतलमियं सेकाय चापेक्षते।
मूढैः किन्तु निषेचिता कृषिरियं तूष्णैर्धनैः कायजैः
कीलालैरिति शोष एव परितः पर्यावृणोद् भारतम् ॥२॥

अस्मात् शोणितशोणितात्सह मया भीता तु सौदामिनी
नैवावातरदुज्ज्वला खलु दिवो नैवान्तरिक्षं श्रिता।
तामेतां पुनरन्तरा सहचरीं नात्रागमं वेलया
सोपालम्भमुदीरितोऽपि बहुधा शोषं प्रतीमं जने ॥३॥

वीक्ष्यातङ्ककृतां गतिं शिथिलतां यत्नेन रक्षावलैः
लोकैः पञ्चनदस्थितैः सहकृतै नीतान्तमप्युग्रता।
तामेता धरणीं चिरात्परिचितां सेक्तुं जलैः शीतलैः
आयातोऽस्मि सहप्रियः कृषिफलं दातुं प्रतीक्षाकृताम् ॥४॥

किञ्चास्मिन्नवभारते प्रतिदिनं भाषापि संस्कृतिर्मा
न त्यक्ता पशुरक्षिभिर्मुहुरियं प्राप्तास्त्युपेक्षां नृणाम्।
उद्घाट्यां तदकादमीं च कलयन्नद्यागतोऽस्म्यञ्जसा
नूनं संस्कृतकोविदैः प्रणिहिता मन्त्रैर्भवेदाहुतिः ॥५॥

भाषायां ममतां ममोपनिषदा विज्ञापितां ज्ञापये
यत्राहं मनुजान् सुरांश्चदनुजान् त्रिर्देति चोपादिशम्।
तैर्दद्ध्वञ्च दयध्यमित्यथ दमध्वं चेति विज्ञातृभि—
र्धर्मादानदयादमा निजहितास्तैः स्वीकृता आसत ॥६॥

कथंकथा

डा० बच्चूलाल: अवस्थी 'ज्ञानम्' कालिदास अकादेमी,
उज्जयिनी)

(१)

पिका मौनं भजेरन् मासि वासन्ते कथंकारम् !
शरः शाकुन्तलः सिध्येन्न दुष्यन्ते कथंकारम् ।।

(२)

यदा लावण्यपूरो बाष्पपूरं संसृजन्नास्ते ।
तदा चक्षूषि पन्थानं विलोकन्ते कथंकारम् ।।

(३)

नतापाङ्गैर्विदग्धानां मुहुश्चेतांसि दुन्वन्तः ।
इमे सौन्दर्यसम्भारा न दूयन्ते कथंकारम् ।।

(४)

भ्रुवोर्भङ्गभ्रमाद् भूम्ना निषेधाः सम्प्रतीयेरन् ।
कपोलप्रान्त-संकेता निगूह्यन्ते कथंकारम् ।।

(५)

सहेला हावभावा विभ्रमा इन्द्रायुधायन्ते ।
निराकाराश्चमत्कारा न सह्यन्ते कथंकारम् ।।

(६)

समुद्यद्भानुसम्पर्काद् विकासं यान्ति पद्मिन्यः ।
वराकाश्चञ्चरीकाश्चञ्चलायन्ते कथंकारम् ।।

(७)

निषीथेषु प्रतीताश्वासिनः स्मेरं समालापाः ।
स्मृता विध्यन्ति, निःश्वासा निरुध्यन्ते कथंकारम् ।।

(८)

उपायैः कण्टकं पादान्निरस्येतापि सायासम् ।
अथो शल्यानि कालेया[1]दपोह्यन्ते कथंकारम् ।।

❋

---

१ "कलेजा" इति हिन्दी । हृदयादधो मांसखण्डविशेषः ।

देववाणी-परिषद्वार्ता

१. **नूतनसत्यनारायणकथायाः समुन्मीलनम्** : नवदिल्ल्यां २५-११-१९८७ ई० तारिकायां देववाणी-परिषदा समायोजिते एकस्मिन् समारोहे पूर्वसांसदेन किञ्च प्रसिद्धेन असमियासंस्कृतभाषासाहित्यकारेण ऐतिह्यविदा च डा० विश्वनारायणशास्त्रिमहाभागेन परिषदध्यक्षाचार्यरमेचन्द्रशुक्लप्रणीता 'नूतनसत्यनारायणकथा' समुन्मील्य समारोहाध्यक्षाय मुम्बापुरीस्थदेववाणीमन्दिराध्यक्षाय किञ्च गीर्वाणसुधासम्पादकाय श्री श्री० भि० वेलणकरमहाभागस्य समर्पिता।

२. १२-१२-१९८७ ई० तारिकायां नवदिल्ल्या वाणी-विहारे देववाणी-परिषदा 'संस्कृतनाट्यम्' समायोजितम् यत्र श्रीमत्या कमलिनीदत्तमहाभागया कु० पूर्वा धनश्रीमहाभागया च संस्कृतरचना अधिकृत्य नृत्यं प्रस्तुतम्।

३. **ग्रन्थार्पणम्**—देववाणी-परिषदा स्व दशमवार्षिकाधिवेशनावसरे दशसहस्ररूप्यकाणां संस्कृतग्रन्थाः दशविद्वद्भ्यः समर्पिताः।

४. देववाणी-परिषदो नवमं दशमं च संयुक्तं वार्षिकमधिवेशनं १३-१२-१९८७ तारिकायां नवदिल्ल्यां वाणी-विहारे सम्पन्नम्। अस्मिन्नवसरे परिषदः कार्यसमित्या साधारणसभया च प्रतिवर्षं शरत्पूर्णिमायां 'पण्डितराजमहोत्सवं' समायोजयितुं संकल्पप्रस्तावोऽयमङ्गीकृतः :—

"दिल्लीनगर्यां संस्कृतसाहित्यनभोऽङ्गणे पार्वणशर्वरीश्वरायमाणः पण्डितराजो जगन्नाथः सर्वात्मना सुरभारतीं सिषेवे। देववाणी-परिषदा तमुद्दिश्य प्रतिवर्षं शारदी पूर्णिमा 'पण्डितराज-महोत्सव'- रूपेण समायोजयिष्यते। तत्र न केवलं दिल्लीस्थविदुषां, सुरभारतीसेवाजुषां विश्वेषामपि विदुषां समवाये पण्डितराजसाहित्यरसास्वादनं सानन्दमातनिष्यते। पण्डितराजोऽयं न केवलं कविराज आलङ्कारिको वा। यथायं साहित्यवारिधिमज्जनोन्मज्जननिपुणः काव्योत्कर्षपरीक्षानिकषस्तथैव सुमहानयं वैयाकरणः, भारतीयसांस्कृतिकमहिम्नः कल्पतरुभूत आसंसारं प्रकाशते। पण्डितराजमहोत्सवाराधनेन न केवलं भारतस्यैकता, भारतीया विश्वमङ्गलभावनापि सुनिपुणं सेविता भविष्यतीति न सन्देहलेशः। सौभाग्यमेतद् दिल्लीस्थविदुषां यत्तैः निजनगरीतिलकायमानोऽसौ महाकविः प्रतिवर्षं सभाजयिष्यते।

महोत्सवस्यास्य विशिष्टस्वरूपनिर्धारणपूर्वकं महोत्सवायोजनसङ्कल्पात्मकः प्रस्तावः परिषदा सर्वात्मनाङ्गीक्रियते।'

अधिवेशनस्यावसरे निर्वाचनमण्डलसमज्यायां कार्यसतितिसदस्यानां निर्वाचनमप्यभूत्। तदनुसारमिमे सदस्याः १३-१२-८८ पर्यन्तम् आगामिवार्षिकाधिवेशनं यावद्वा निव चिता जाताः—

अध्यक्षः प्रो० श्रीनिवास रथः, **उपाध्यक्षः** श्रीमती रमा शुक्ला, **महासचिवः** डा० रमाकान्त शुक्लः, **सहसचिवः** डा० रवीन्द्र नागरः, **कोषाध्यक्षः** श्रीवेदप्रकाश गौतमः, **सदस्याः**-डा० रमेशचन्द्रशुक्लः, डा० कृष्णकान्तशुक्लः, डा० उमाकान्त शुक्लः, श्री बलदेवानन्द सागरः, श्रीमती कमलिनी दत्त, डा० दुर्गाचरण शर्मा च ।

५. देववाणी-परिषदा स्व एकादश स्थापनादिवसमुपलक्ष्य १३-१२-१९८७ ई० तारिकायां नवदिल्लीस्थराजधानीकालेजपरिसरे एका अन्तर्महाविद्यालयीय संस्कृतपद्यपाठप्रतियोगिता दशमाखिलभारतीयसंस्कृतकविसम्मेलनं चायोज्याताम् ।

संस्कृतपद्यपाठप्रतियोगितायां देववाणी-परिषत्प्रकाशितेभ्यः काव्येभ्यः पद्यान्युद्धृत्य प्रतियोगिभिः सस्वरं प्रस्तुतानि । निर्णायकानां निर्णयानुसारं श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठच्छात्रः श्रीनवलकिशोर चौधरी एकसहस्र रूप्यकसममूल्यपुस्तकात्मकं प्रथमम्, इन्द्रप्रस्थमहाविद्यालयच्छात्रा कु० शेफाली सार्धसप्तशतरूप्यकसममूल्यपुस्तकात्मकं द्वितीयं, सेण्टस्टीफेन्समहाविद्यालयच्छात्रः श्री सैफुर्रहमानः पञ्चशतरूप्यकसममूल्यपुस्तकात्मकं तृतीयं, मोतीनाथसंस्कृतमहाविद्यालयच्छात्रः श्री कैलाशपतिझा त्रिशतरूप्यकसममूल्यपुस्तकात्मकं चतुर्थं, मैत्रेयीमहाविद्यालयच्छात्रा कु० मुक्ता करवाल् च सार्धैकशतरूप्यकसममूल्यपुस्तकात्मकं पञ्चमं पुरस्कारं च अलभन्त । एतदतिरिक्तम् एकादश पञ्चाशद्रूप्यकात्मकान् सान्त्वनापुरस्कारान् इमे प्रतियोगिनोऽलभन्त : १. कु० उमा शर्मा (राजधानी), २. कु० सन्ध्या कटारिया (सेण्ट स्टीफेन्स) ३. कु० अर्चना (लक्ष्मीबाई०), ४. कु० रेखा गुप्ता (लक्ष्मीबाई), ५. कु० अनिता वर्मा (मैत्रेयी) ६. कु० मीनू अरोरा (इन्द्रप्रस्थ), ७. श्री सञ्जय योगी (मोतीनाथ), ८. श्री अवधेशकुमार झा (हिन्दू०) ९. श्री मुरारी झा (हिन्दू०), १०, श्री वैद्यनाथ मिश्रः (महावीर विश्वविद्यापीठ०) ११. श्री गणेशप्रसादः (महावीर०) च ।

प्रतियोगिताया निर्णयः कुरुक्षेत्रविश्वविद्यालयप्राध्यापक-डा० पतञ्जलिकुमारभाटिया-रुड़कीस्थ बी०एस०एम० कालेज संस्कृतविभागाध्यक्ष-डा० सेवारामशर्म—आकाशवाणीसंस्कृतसमाचारवाचक-श्री विश्वनाथशास्त्रिभिः कृत. । आध्यक्ष्य पुरस्कारवितरणं च देववाणी-परिषदध्यक्षैराचार्यश्रीनिवासरथमहाभागैः कृते ।

दशमाखिलभारतीयसंस्कृतकविसम्मेलने कविरत्न श्रीअमीरचन्द्रशास्त्रि-आचार्य वेदानन्द झा-डा० रामकरणशर्म-डा०सत्यपाल नारङ्ग-कविरत्न ओम् प्रकाश ठाकुर-डा०सेवाराम शर्म-प्रभृतिभिः कविभी रचनाः प्रस्तुताः । सम्मे-

लनाध्यक्षैराचार्यश्रीनिवासरथमहाभागैः 'बलदेवचरित'महाकाव्यात्-'वाराणसी-वर्णनं' प्रस्तुतम् । सम्मेलनस्य संचालनं डा० रमाकान्तशुक्लेन कृतम् । धन्यवाद-ज्ञापनं परिषत्सहसचिवेन डा० रवीन्द्रनागरमहाभागेन कृतम् ।

संस्कृत-जगद्वार्ता

(१) १—७-११-१९८७ तारिकासु उज्जयिन्याम् कालिदास-अकादमी-मध्यप्रदेशशासनाभ्यां साकं विक्रमविश्वविद्यालयेन कालिदास-समारोहः समायोजितः। अस्मिन्महोत्सवे मेघदूतसंगोष्ठी, प० सूर्यनारायणव्याससमृतिव्याख्यानं, संस्कृतकविसमवायः, संस्कृतवाद-विवाद-प्रतियोगिता, श्लोकपाठ-प्रतियोगिता, विविधानि सांस्कृतिकानुष्ठानानि चायोज्यन्त । कु० अरुन्धतीवर्तकरचिता मेघदूतचित्रमालिकापि प्रादर्श्यत । कालिदाससमितिसचिव आचार्यश्रीनिवासरथमहाभागः सपरिकरः समुत्सवस्य सफलायोजनार्थं समभिनन्द्यते ।

(२) बिहारशासनेन डा० कैलासनाथद्विवेदि-प्रणीतः 'ऋग्वैदिक भूगोल' इतिग्रन्थः पञ्चसहस्ररूप्यकात्मकेन 'डा०काशीप्रसाद जायसवाल' पुरस्कारेण सम्मानितः ।

(३) १२-१२-१९८७ तारिकायां 'दिल्ली प्रशासनस्य संस्कृतअकादेमी' दिल्ल्या उपराज्यपालेन श्रीहरिकिशनलालकपूरमहाभागेन विधिवदुद्घाटिता । अकादेमी-सचिवः श्रीश्रीकृष्णसेमवालः संस्कृतमाध्यमेन कार्यक्रमसञ्चालनमकरोत् ।

(४) १४-१२-१९८७ तारिकायां दिल्लीविश्वविद्यालये संस्कृत-स्वाध्याय-मण्डलेन संस्कृत-कविसम्मेलनमायोजितम् यत्राष्टौ कवयः स्व रचनाः प्रस्तुतवन्तः । सम्मेलनस्याध्यक्ष्यं विक्रमविश्वविद्यालयसंस्कृतविभागाध्यक्षेण आचार्यश्रीनिवासरथमहाभागेन संचालनं च डा० सत्यपालनारंगमहाभागेन कृतम ।

(५) १६-१२-१९८७ तारिकायां दिल्ल्यां लक्ष्मीबाईकालेजे संस्कृत-विभागेन डा० रमाकान्त शुक्लस्य 'संस्कृतच्छन्दांसि' अवलम्ब्य भाषणं काव्य पाठं च आयोजिते ।

(६) १७—२०-१२-१९८७ तारिकासु प्रख्यातसंस्कृतकवेः आचार्यश्री-निवासरथस्य स्वरेषु तत्कवितानां नैकेषां कालिदासकाव्यानां च ध्वन्यंकनं दिल्ल्यां सम्पन्नम् ।

(७) ३१-१२-१९८७ तारिकायां रात्रौ दिल्लीदूरदर्शने नववर्षारम्भे यः कार्यक्रमः प्रस्तुतस्तस्यारम्भः 'नववर्षम्' इति-संस्कृतशीर्षकेणाजायत । कार्यक्रम-निष्पादकः श्रीशरददत्तमहाभागो वर्धापनानि अर्हति । सर्वथा नूतनोऽयं प्रयोगः। संस्कृतं दूरदर्शने समुचितं स्थानं प्राप्नुयात् । (रमा शुक्ला)

अर्वाचीनसंस्कृतस्य ग्राहशुल्कम्

(१५-१-१९८७ तः)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेष) य० एस० डालराः 10
आजीवनं (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्यय : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** (Arvacheensanskritam/*Arvācinasaṃskṛtam*) इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M.O.) वा निम्नलिखिते संकते प्रेषयितुं प्रार्थ्यन्ते :

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)

देववाणी-परिषद, दिल्ली'-कृते डा० रमाकान्तशुक्लेन देववाणी प्रिंटर्स उत्तम नगर, नयी दिल्ली-११००५९ इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१०/१) प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५.१.१९८८

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (,, ,,)	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (,,)	रु० ३०.००
९.	,, ,, ,, (द्वितीय खण्डः) (,,)	रु० ४०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
१६.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् (,,) (,,)	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) (,, ,,)	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः)	रु० १२.००
२९.	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकपत्रम्)

दशमवर्षे द्वितीयोऽङ्कः

१५ अप्रैल, १९८८

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली–११० ०५९

अर्वाचीनसंस्कृतम् (१०/२)

(R. N. 34554/79)

(१५ अप्रैल १९८८ ई०)

विषय-सूचिः

	विषयः	लेखकः	पृष्ठांकः
१.	सम्पादकीयम्		९७
२.	अकालजलद !	डा० रमाकान्त शुक्लः	१०१
३.	ज्वलति हन्त पञ्चाप्प्रदेशः !	डा० परमानन्द शास्त्री	१०२
४.	भारत-वन्दना	ओमप्रकाश ठाकुरः	१०३
५.	राष्ट्रवन्दनम्	डा० मल्लिकार्जुन परड्डी	१०५
६.	भारतम्	रामकैलाश पाण्डेयः	१०७
७.	उज्जयिनी	डा० हरिहर त्रिवेदी	१०९
८.	उज्जयिनीमुपसर	डा० सुधाकराचार्य त्रिपाठी	११०
९.	स्वप्नकन्यका	ई०पी० भरतपिषारटिः	१११
१०.	पल्लव ! कम्पसे किम् ?	आचार्यवेदानन्द झा	११५
११.	श्री वेदव्यासप्रणीत ब्रह्मसूत्रस्य सरलश्लोकेषु विवृतिः	आचार्य रमेशचन्द्रशुक्लः	११७
१२.	काव्ये सब्लाइमनामधेयम् उदात्तम्	डा० रमाशङ्करतिवारी	१३३
१३.	देववाणी-परिषद्वार्ता	रमा शुक्ला	१४५
१४.	संस्कृत-जगद्वार्ता	” ”	१४६
१५.	नवप्रकाशन-चर्चा		१४८

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम्—नयी दिल्ली ।

२. प्रकाशनकालावधिः—त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिक[illegible] च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली [illegible] ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वा[illegible] विहारः, नयी दिल्ली-११००५९ ।

डा० रमाकान्त शुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलम[illegible] विवरणं मम मतौ सत्यमस्ति ।

१५-४-१९८८

—डा० रमाकान्त शुक्[illegible]

प्रकाशकः, सम्पाद[illegible]

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य दशमवर्षीये द्वितीयेऽस्मिन्नङ्के नव कविताः, एका पद्यविवृतिः, एकः काव्यशास्त्रीयो लेखः, देववाणी-परिषद्वार्ता, संस्कृत-जगद्वार्ता नवप्रकाशनचर्चा च प्रकाश्यन्ते ।

'अकालजलद !' इत्येतस्यां कवितायामेतत्पंक्तिलेखकेन परिणतसस्य-विनाशको मेघ उपालब्धः । १३.३.१९८८ तारिकायां रात्रौ उत्तरभारतस्य केषुचित्स्थानेषु कृषिविनाशकरी भयंकरी उपलवृष्टिः सञ्जाता । दिल्ल्यामनया वृष्ट्या यद्यपि आकाश उज्ज्वलीकृतः, हरीतिमा प्रवर्धितः, वृक्षाः प्रक्षालिताः वायौ मिश्रिते 'सल्फर डाई आक्साइड'-'कार्बन मोनो आक्साइड' नामधेये वार्त्ते च अपाकृते किन्तु गाजियाबादजनपदान्तर्गतषडशीतिग्रामस्थितानि परिणतगोधूम-यव-चणक-सर्षपवन्ति क्षेत्राणि भयंकरकरकानिपातेन ध्वस्तानि । सप्तोत्तरैकशतसंख्याकग्रामेषु पाकोन्मुखकृषिः बहुहानिं सोढवती । 'जनसत्ता'-'नवभारत टाइम्स'-प्रभृतिदैनिकपत्रैरेतद्विषये दीर्घाः समाचारा अपि प्रकाशिताः । मया तु समाचारपठनात्पूर्वमेव मनसि मेघोऽधिक्षिप्तः । १३.३.१९८८ तारिकायां निशीथे 'अकालजलदम्' (अकाले = असमये जलदम्) अभिलक्ष्य कवितायाः प्रथमं पद्यं विरचितम् । पृथिव्याः मनस्तापः 'पृथ्वी'च्छन्दसैवाभि-व्यक्तः । १४—१५.३.८८ तारिकयोः अनेनाकालजलदेन कृता कृषिविनाश-लीला वृत्तपत्रेषु सविशेषं प्रकाशिता पठिता । १६.३.८८ तारिकायां दिल्ली-प्रशासन-संस्कृत-अकादम्या नवदिल्लीस्थ-'फिक्की'-सभागारे आयोजिते अखिल-भारतीयसंस्कृतकविसम्मेलने इयं कविता सर्वप्रथमं पठिता या १.४.८८ तारिकायां दिल्लीदूरदर्शनात् प्रसारितापि बभूव । संयोग एवायम् उताहो मेघेन कवेः भाव आदृतः । अतः परं ग्रीष्मर्तौ कुत्रापि परिणतसस्यमयेषु क्षेत्रेषु उपलवृष्टिर्नैव जाता ।

इतः पूर्वं मेघमुद्दिश्य 'क्रूरहृदय मेघ !' इतिशीर्षकेण मया रचितायाः कविताया अपि विचित्र इतिहासोऽस्ति । १९८७-८८ सत्रे शताब्द्या भीषण-तमेन शोषेण भारते अत्याचरितम् । १९८७ तमेशवीयाब्दस्य अक्टूबरमासं यावत् प्रायः समस्तेऽपि भारते अवृष्टिः पदं चकार । यत्र च बिहारादिप्रदेशे वृष्टिः सञ्जाता तत्र जलप्लावनेन कृषिर्विनष्टा जनजीवनं च व्याकुली-भावमापन्नम् । अस्मिन्नेवान्तराले ६.१०.१९८७ तारिकायां मध्यप्रदेशसंस्कृत-

अकादम्या जाबालिपुरे 'स्वरिता' संस्कृतगीतसंध्या आयोजिता। अकादम्याः सचिवेन सुहृद्वर्येण त्रिपाठिना डा० भास्कराचार्येणाहमपि काव्यपाठाय समाहूतः। ५.१०.८७ तारिकायां 'कुतुब एक्सप्रेस'नाम्ना रेलयानेनाहं 'हज़रत-निज़ामुद्दीन' स्टेशनतः जाबालिपुरं प्रति प्रस्थितः। दिल्ल्यां नैककार्यव्यापृतत्वान्नूतनां काञ्चिद्रचनां रचयितुं समयो नैव लब्धः। अतः रेलयाने एव नूतनां रचनां कर्तुं प्रवृत्तः। आगरारेलस्टेशनं यावत् शोषविभीषिकां दर्श दर्श स्मारं स्मारं च कानिचन पद्यानि लिखितानि। आगरातो यदा रेलयानं चलितं तदाहं सुप्तः। प्रातःकाले यदा 'माणिकपुर'-स्टेशन निकषा उत्थितस्तदा मया आकाशे मेघघटावलोकिता। जबलपुरे च यदाहं प्राप्तस्तदा मयावलोकितं यन्मेघमहोदयः वर्षितुं प्रवर्तते इति। अयमपि संयोग एवासीत् उताहो कवेर्धर्षणं मनसा निशम्य मेघस्य सद्बुद्धिलाभः-इति विनिश्चेतुं ज्ञानिनो विज्ञानिन एव वा प्रमाणम्। अस्माभिस्तु केवलमिदमेव कथयितुं शक्यते यत् 'क्रूरहृदय मेघ !' इतिकविताविरचन-कालानन्तरमेव मेघोदयस्तद्वर्षणञ्च समभूताम्। कवितेयं ६.१०.१९८७ तारिकायां जाबालिपुरस्थे 'शहीदस्मारक-भवने' समायोजितायां गीतगोष्ठ्यां सर्वप्रथमं पठिता। ततः परं यत्रापि श्राविता तत्रैव वृष्टिरजायत। १६.१०.८७ तारिकायाम् श्रद्धेयाचार्यश्रीरमेश-चन्द्रशुक्लमहोदयानां पुरतः इयं कविता दिल्ल्यां पठिता। १७.१०.८७ तारिकायां दिल्ल्यामपि मेघाच्छन्न आकाशो दृष्टः। १८ १०.८७ तारिकायां दूरदर्शने दृष्टं यत् इन्दौरनगरे 'रिलायंसकप-क्रिकेटस्पर्धा' वृष्टिवशात्स्थगिता। एवमेव देववाणी-परिषत्समायोजिते दशमेऽखिलभारतीयकविसम्मेलने १३.१२ ८७ तारिकायां यदेयं कविता पठिता आसीत्तदनन्तरमपि वृष्टिः सञ्जाता। अस्तु, इयं कविता 'अर्वाचीनसंस्कृतस्य' नवमवर्षीये चतुर्थेऽङ्के प्रकाशिता जाता, या पाठकैरवलोकिता भवेत्।

यद्यपि 'क्रूरहृदय मेघ' इतीयं रचना १९८७ तमेशवीयेऽब्दे शोषकाले रचितासीत् तथापि अस्यां सार्वकालिकी काचिन् प्रासंगिकतापि सहृदयैः साक्षात्कर्तुं शक्यते। स्वनियोगं योऽशून्यं न करोति तस्मै इयं रचना कदापि कुत्रापि अन्योक्तिरूपेण श्रावयितुं शक्यते। एवमेव 'अकालजलद !' इतीयमपि रचना अन्योक्तित्वेन ग्रहीतुं शक्यते।

डा० परमानन्दशास्त्रिप्रणीता 'ज्वलति हन्त ! पञ्चापप्रदेशः'—इतीयं रचना अद्यत्वे आतंकाक्रान्ते पञ्चापप्रदेशे यद्यद् भवति तस्य चित्रं प्रस्तौति। न जाने कदा तत्र प्रशासकाः कौशलं दर्शयिष्यन्ति, कदा च आततायिनः सद्बुद्धिं लप्स्यन्ते ! कवेश्चिन्ता तु समीचीनैव !

'भारतवन्दना' शीर्षकरचनायां कविरत्नश्रीओमप्रकाशठाकुरमहाभागेन एकतो भारतस्य अतीता: श्री: समुपश्लोकिता अपरतश्च तस्य वर्तमानदशां प्रति चिन्ता अभिव्यक्ता; अन्ते च **'गौरवश्रीस्ते पुनर्गगने विभातु'**—इत्युक्तवता कविना आयत्यां स्वदेशस्योन्नतिराशंसिता ।

डा० मल्लिकार्जुनपरड्डी-कृतं **'राष्ट्रवन्दनम्'** कवीशरामकैलाशपाण्डेय-प्रणीतं च **'भारतम्'** स्रग्विण्या भारतस्य विविधा: विशेषता: समुन्मीलयत: । अर्वाचीनसंस्कृते इत: पूर्वं प्रकाशिताभि: स्रग्विणीत्रिनिबद्धाभि: रचनाभिस्सा-कमनयो रचनयोस्तुलनया सहृदया: शोधार्थिनञ्च विशिष्टं रसं ग्रहीतुं शक्यन्ते ।

डा० हरिहरत्रिवेदि-कृता **'उज्जयिनी'** इति त्रिपाठिडाक्टरसुधाकराचार्य-प्रणीता **'उज्जयिनीमुपसर'** इति च रचनाद्वयम् उज्जयिन्या प्राक्तनमद्यतनं च वैशिष्ट्यं समुन्मीलयति । इत: पूर्वमर्वाचीनसंस्कृते एतत्पंक्तिलेखकस्य **'उज्जयिनीयं जयति'** इत्येका रचना प्रकाशिता जाता—इति नापोहितं पाठकानाम् । एता: सर्वा अपि रचना उज्जयिन्या रामणीयकं संस्कृतपदावल्या प्रस्तुवन्ति । अस्मिन्नेव प्रसंगे आचार्यश्रीनिवासरथ-प्रणीता **'उज्जयिनी जयते'**—इति शीर्षकरचनापि महत्त्वं निदधाति मन्ये, या एताभ्य; सर्वाभ्यो रचनाभ्य: पूर्वं रचितास्ति । इयं रचना अद्यावधि अप्रकाशिता । आशास्यते शीघ्रमेव इयमपि अर्वाचीनसंस्कृते प्रकाशिता भविष्यति ।

'स्वप्नकन्यका' इति कविता संस्कृतकाव्यानुवादप्रवृत्तिं द्योतयति । **'कामधेनु'** - सम्पादकेन श्री ई० पी० भरतपिषारटिमहाभागेन वीणा पेरिन्तल-मण्णाविरचिताया: 'DREAM' इत्याङ्ग्ली-कविताया: संस्कृतपद्यानुवाद: कृत: । वर्णवृत्तेन कृतोऽनुवाद: संस्कृतस्य स्वारस्यं कथमुद्गिरतीति सम्यक् द्रष्टुं शक्यते सहृदयै: ।

'पल्लव ! कम्पसे किम्' इत्यत्र **'कम्पनमेमि धीमन् !'** इत्यत्र च आचार्य-वेदानन्दझामहाभागै: अन्योक्त्या: समस्यापूर्ते: प्रश्नोत्तरपद्धतेश्च अपूर्वं सम्मेलनं कृतम् ।

आचार्यरमेशचन्द्रशुक्लमहाभागै: १०५ पद्येषु **'श्रीवेदव्यासप्रणीत-ब्रह्म-सूत्रस्य सरलश्लोकेषु विवृति:'** कृता । ब्रह्मसूत्राणां काव्यात्मिकेयं व्याख्या विचाररसेन काव्यरसेन च संवलिता नूतनामेव शोभां धारयति ।

इत: परं डा० रमाशंकरतिवारिमहाभागै: निबद्ध: **'काव्ये सब्लाइमनाम-धेयम् उदात्तम्'** इति शीर्षको लेख: संस्कृतमाध्यमेन काव्यशास्त्रीयविषयेषु क्रियमाणमर्वाचीनं चिन्तनं प्रस्तौति । डा० तिवारिमहाभागा आंग्लविद्याचार्या

इति हेतोरेव मन्ये तेषां संस्कृतवाक्यानि आंग्लभाषापदक्रममेव प्रायोऽनुसरन्ति। अत एवैतेषां संस्कृतं सम्यगवगन्तुं पाठकैः आंग्लवाक्ययोजनां भिज्ञैर्भाव्यम्। पाश्चात्यकाव्यशास्त्रीयं सिद्धान्तं संस्कृतमाध्यमेन जिज्ञासूनां कृतेऽयं लेख उपकारकोऽस्ति ।

देववाणी-परिद्वार्तायां संस्कृत-जगद्वार्तायां च परिषदि अन्यत्र च समायोजिता गतिविधयो दीयन्ते ।

नवप्रकाशनचर्चायां श्रीगणपतिशुक्लप्रणीतं 'कथामृतम्' डा० प्रभाकर नारायणकवठेकरमहाभागैः समीक्ष्यते । बालोपयोगिपुस्तकमिदं कैः कैर्विशिष्टैः सवंलितमस्तीति संक्षेपत उपन्यस्यतीयं समीक्षा ।

आशासे, बहुविधया सामग्र्या संवलितोऽयमङ्कः सहृदयानां सुधियां ध्यानमावर्जयिष्यति ।

विदुषामाश्रवः

(डा० रमाकान्त शुक्लः)
प्रधानसम्पादकः

१५.४.१९८८
६ वाणी-विहारः, नयी दिल्ली-११००५९

अकालजलद !

(डा० रमाकान्त शुक्लः, ६ वाणी-विहारः, नयी दिल्ली-११००५९)

अकालजलद ! त्वया किमिति निन्द्यमाचर्यते ?
कृषीवलपरिश्रमः कथमहो त्वया नाश्यते ?
निपात्य करकाचयं परिणतेषु सस्येषु हा
त्वया किमिति तुद्यते वद पयोद ! पृथ्वीमनः ॥ १ ॥

निदाघतपनज्वलद्वसुधया यदाकारित-
स्तदा त्वमगमः क्वचिद्वसुमती त्वया शोषिता ।
यदा च वसुधासुतैः श्रमभरैः प्रयासैर्निजै-
ररक्षि कृषिसन्ततिर्विषमहो त्वया पतितम् ॥ २ ॥

महाराजतशोभिनः परिणताः सुगोधूमकाः
यवाः कणिशालिनश्चणकसर्षपाश्चाहृताः ।
श्रमेण परिपालिता कृषिलता त्वया मर्दिता
धिगस्तु तव जीवनं ! चरति यद्भुवे वैशसम् ॥ ३ ॥

कृषीवलगणैः समैः कृषिफलं सदा पोषितुं
वृतस्त्वमसि रक्षकस्त्वमभवस्तु हा भक्षकः !
सुकालमवलोक्य नो समभवत्तवावर्षणम्
मुधाद्य तव दुःसहा वद वदान्यता कीदृशी ॥ ४ ॥

कृषीवलगणास्त्वया विषद ! वञ्चिता लुण्ठिता
स्तथापि कृषिदेवता भवसि कैर्गुणैः ब्रूहि रे ।
अकारणमिदं त्वया किमिति वैरमाविष्कृतम्
कलंकितमहो कथं प्रकुरुषे स्वकीयं यशः ॥ ५ ॥

यथासमयमस्तु ते जलद ! गर्जनं वर्षणम्
यथासमयमस्तु ते समुदयस्तथा विश्रमः ।
जगज्जनसुरञ्जनो भव न वै जगत्त्रासकः
परोपकरणव्रतं वृणु पयोद ! कल्याणदम् ॥ ६ ॥

ज्वलति हन्त पञ्चाप् प्रदेशः

(डा॰परमानन्दः शास्त्री, सिद्धार्थसदनम्, मन्दिरमार्गः, अलीगढम्)

ज्वलति हन्त ! पञ्चाप् प्रदेशः
प्रतिदिग् लग्नो वह्निः प्रसरति
जातोऽसह्यस्तापविशेषः ।

ऋषयो यत्र मन्त्रद्रष्टारः
अभवन् वेदानां स्रष्टारः
अभिसन्धातुं तत्र मनुजता-
मापातितो खलैर्विद्वेषः
ज्वलति हन्त ! पञ्चाप् प्रदेशः ।

यज्ञाज्यप्रज्वलितहुताशः
मिलितहविर्गन्धोत्करवासः
बत बताद्य नरमांसाहुतिभी
रचितो महाचितापरिवेषः
ज्वलति हन्त ! पञ्चाप् प्रदेशः ।

गता मतिः परहितकल्याणी
अनादृता सीदति गुरुवाणी
जीर्णवास इव महानुज्झित—
स्तस्या मिथः प्रीतिसन्देशः
ज्वलति हन्त ! पञ्चाप् प्रदेशः ।

हिंसकमनोवृत्तिरुत्ताला
हन्यन्ते वनिता अपि बालाः
निरागसो निःशस्त्रानपि च
घ्नतां तनुर्नो मनसि क्लेशः
ज्वलति हन्त ! पञ्चाप् प्रदेशः ।

मनो मतिः संविन्मानवता,
सकला गताः श्रिता दानवता,
पशु-पिशाच-रक्षसामप्यहो !
भवति न तादृग् हिंसोन्मेषः
ज्वलति हन्त ! पञ्चाप् प्रदेशः ।

❋

भारत-वन्दना

(कविरत्नम् ओमप्रकाश ठाकुरः डी-७५७ सरस्वती-विहारः
दिल्ली-११००३४)

हिमकिरीटं राजते भाले त्वदीये
क्षालनां पदयोः पयोनिधिरातनोति
ऋतुगणो भव्यां विभूषां संविधत्ते
चित्रविहगालिः स्तुतिं मधुरां करोति
तुङ्गतां ते प्रथयतेऽसौ पर्वतेशः
निर्झरा गरिमाणमुच्चैः संगिरन्ति
अनुपलं संदृश्यते सुषमा नवीना
वैभवं भाति प्रकृतिदेवी किरन्ती
जन्म लब्धुं यत्र देवा अप्यलुभ्यन्
गौरवं तत् परममहनीयं दधासि
विविधविद्यानामसि क्रीडास्थली त्वं
संस्कृतीनां दिव्यया विभया विभासि
कलयसे भारत ! कलानां कलनिधानं
यान्त्रिकोत्कर्षश्च तेऽद्य विलोकनीयः
शान्तिमान्तरिकीमवाप्तुमिहोपयाति
कोऽपि वैभवभीतिमान् देशान्तरीयः
प्राङ्गणे प्रविचरति ते गीतार्थगन्धः
शौर्यगाथा यत्र दाशरथेः पुनाति
उपनिषद्भागीरथी प्रवहत्प्रवाहा
आकुलेभ्यो निर्वृतिं परमां ददाति
धर्मभाषाजातयो मैत्रीमुपेता
यत्र सानन्दं त्वदीयाङ्के लसन्ति
मठ-विहाराश्रमकुटी-प्रासाद-लक्ष्यः
संश्रिता एकायनं प्रेम्णा वसन्ति

शोभसे बहु धारयत् त्वं वीरवेषं
राजसे क्वचिदावहन्मुनिधीरभावं
उत्सुकं वाऽसि क्वचित्पञ्चाग्नितपसे
विविदिषसि देहे क्वचिद् ध्यानप्रभावं

साधनामार्गे क्रियायोगेऽसि मग्नं
भावप्रह्वं वा मनो भक्तौ निधत्से
अस्मि चकितस्तावकैः रूपैरनेकैः
त्वं विभूतीर्भगवतो विविधा दधासि

किन्तु दैवविडम्बनां सम्पश्यतो मे
मानसे विपुलां व्यथां भूयो ददासि
प्रखरशक्तिमतोऽपि ते दैन्यं किमर्थं
तव समन्ताज्जालमनेतारः किमर्थम् ?

क्षुद्रजम्बुकगणकृता ते धर्षणा किं ?
वैरिविहिता व्यंग्यवचसां वर्षणा किं ?
पतसि निजमौग्ध्याद् वशे दुरिताशयानां
क्रूरकुटिलस्वार्थबुद्धिप्रेरितानाम्

पिबसि तत्सङ्गादहो व्यामोहमदिरां
व्याहतेष्टार्थप्रखिन्नो भवसि नितरां
यद्गतं हे भव्यभारत ! नानुशोच्यम्
वर्तमाने ह्येव चित्तं संनियोज्यम्

धारयस्व पुनः स्वपौरुषदीप्तिमुग्राम्
उग्रकर्मवतां विखण्डय हिंस्रमुद्राम्
सर्वतः समवेतधूर्तकुलं प्रतर्दय
मनुजतायै विगतमानधनं समर्पय

गौरवश्रीस्ते पुनर्गगने विभातु
मानसे मुदिता सदा पदमादधातु

○

राष्ट्रवन्दनम्

[डा० मलिकार्जुनः परड्डी संस्कृतविभागे प्रवाचकः, कर्णाटक विश्वविद्यालयः,
धारवाड-५८०००३ (कर्णाटकः)]

(१)

हिन्दवः क्रिश्चियन् मुसलमान् बन्धवः
सन्ततं सोदरत्वेन ये सङ्गताः ।
श्रद्धया वन्दनं यस्य ते कुर्वते
दृश्यतामस्मदीयं महद् भारतम्

(२)

कालिदासादिभिर्यत्तु संकीर्तितं
स्वीयकाव्येषु भूलोकसंचारिषु ।
व्यासवाल्मीकिसद्ग्रन्थसंमानितं
राष्ट्रमस्माकमन्यादृशं भारतम्

(३)

आगताः दूरतो येऽपि दुष्टाशया
निर्गताः राक्षसास्तैर्न वासः कृतः ।
येऽपि वाऽत्र स्थिता भारतीया कृताः
अस्मदीयं महासंस्कृतं भारतम्

(४)

गंगयानङ्गशत्रोर्जटामालया
यत्स्थली पावनेनाम्भसा पाविता ।
तुङ्गभद्रादिभिः सस्यपूर्णा कृता
वीर्यवन्नाकमेवागतं भारतम्

(५)

शंकराचार्य-मध्वादिवेदान्तिनो
बुद्धमुख्या जगन्मोददाने रताः ।
वीरशैवादयो यद्यशोगायका
नीतिधर्मप्रसिद्धं क्षितौ भारतम्

(६)

प्राकृतं बङ्गला, कन्नडं हिन्दवी,
मागधी कोंकणीत्यादिभाषामयम् ।
किन्तु तासां भवेन्मातृवत्संस्कृतं
तत्सुसंस्कारयुक्तं भवेद् भारतम् ॥

(७)

वर्गतो वेषतो भाषयाहारतो
राष्ट्रमित्थं भवेत् भेदपूर्णं यदा ।
मूलतो भारतीया वयं सत्प्रजाः
एकता भिन्नतायां सदा भारते ॥

(८)

राष्ट्र भंगोद्यमे दत्तचित्तो जनो
आततायी च साफल्यवान् किं भवेत् ।
शान्तिमन्त्राप्तसौख्या वयं भूतले
विश्वकल्याणचित्तं सदा भारतम् ॥

(९)

अर्थशास्त्रं तथा नाट्यशास्त्रं पुनः
कामशास्त्रं तथा वैद्यकं विश्रुतम्
सर्वशास्त्राणि पुण्याणि यत्राभवन्
प्रज्ञया विश्वसंमानितंभ ारतम् ॥

(१०)

वित्तहीना नरा यत्र सत्यान्विताः
वित्तपूर्णा जना त्यागशीलान्विताः ।
हिंसनं यत्र सर्वैर्जनैः खण्डितं
शान्त्यहिंसामयं सन्ततं भारतम् ॥

भारतम्

[कवीशरामकैलाशपाण्डेयः १ बी/२४ बाघम्बरी रोड,
अल्लापुर, इलाहाबादः (उ०प्र०)]

यत्र गङ्गा सुराणां नदी विद्यते
यत्र काशी गजारेः पुरी वर्तते ।
यत्र रामेश्वरं तीर्थमुद्भासते
सोमनाथस्य दीप्तिः सदा राजते ।।

शर्मदं भारतं सिद्धिदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ।।१।।

यस्य रामोऽपि कान्तारदेशं गतः
व्यूहमध्येऽभिमन्युः स बालो हतः ।
रक्षितुं राजपुत्रं कृतज्ञा स्वकं
मृत्यवेऽदाद्धि पन्ना प्रियं पुत्रकम् ।।

शान्तिदं भारतं ज्ञानदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ।।२।।

भान्ति नद्यो यथासूर्यजा नर्मदा
यत्र गोदावरी ताम्रपर्णीजलैः ।
यत्र सिप्रा शतद्रुश्च मन्दाकिनी
प्रीतिमाप्ता वहन्तीव युक्ताः कलैः ।।

सस्यदं भारतं शान्तिदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ।।३।।

नित्यमाभाति मार्त्तण्डसम्बन्धिनी
यत्र कोणार्कदेवालयस्था प्रभा ।
लोकनेत्रव्रजान् मोहयन्ती हठात्
भाति बौद्धाग्रदूतीव सांची-विभा ।।

मुक्तिदं भारतं हर्षदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ।।४।।

देशभक्तिप्रभावप्रभोद्भासितः
यस्य वीरो व्रती बालगङ्गाधरः ।
गर्ह्यकारागृहस्यान्धकारेऽप्यसौ
लेखकोऽभूद्धि गीतारहस्यस्य वै ॥
श्रीनिधिं भारतं धीनिधिं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥५॥

आर्तवं गौरवं यत्र हर्षावहं
पुष्पमासस्य पुष्पावलीनां द्युतिः ।
प्रावृषेण्याः पयोदाश्च चेतोहराः
शारदश्रीरपूर्वा महानन्ददा ॥
सुन्दरं भारतं धैर्यदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥६॥

यस्य भूपान्वया वर्णनीयाः सदा
गुप्तवंशोद्भवक्ष्माभुजां त्विट्चयः।
पल्लवक्ष्माभृतां वैभवाडम्बर-
श्चोलभूभृद्वराणां समृद्धिस्तथा ॥
सर्वविद्यानिधिं बुद्धिदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥७॥

यस्य साहित्यमास्ते श्रिया मण्डितं
कालिदासस्य काव्योपमाचन्द्रिका ।
विश्वविद्वच्चकोरैः सदा पीयते
लभ्यते नैव सौहित्यमद्धा कथम् ॥
पूज्यदेशं सुराष्ट्रं वरं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥८॥

★

उज्जयिनी

(डा० हरिहर त्रिवेदी, ३३ शंकर बाग, इन्दौर ४५२००६)

(१)

अस्ति प्रशस्तविभवोज्जयिनीति नाम्ना
विख्यातविक्रमनराधिपराजधानी ।
सिप्रातरंगजलधावितपादपद्मा
सद्मान्धकासुररिपोर्नगरी विशाला ॥

(२)

यत्र प्रसिद्धकविमौलिमणिः पुरासीत्
काल्यां शिवे च निरतः स च कालिदासः ।
यत्कीर्तिगायनपराः प्रतिवर्षमत्रा
यान्ति प्रगल्भमतयो विविधस्थलेभ्यः ॥

(३)

अवन्तिदेशरत्नस्योज्जयिन्याः कीर्तिवैभवम् ।
एवमुक्त्वाधुना सर्वान् कोविदान्प्रणमामि वः ॥

(४)

अभ्रांगणे ज्वलति तारकदीपमाला
भूमौ विभाति शुभशारददीपपंक्तिः ।
एकादशी भवति कार्तिकशुक्लरम्या
देवप्रबोधनपरा भवतां समृद्ध्यै ॥

○○

उज्जयिनीमुपसर

(त्रिपाठी डा० सुधाकराचार्यः रीडरः, संस्कृतस्य मेरठविश्वविद्यालये
मेरठनगरे उ० प्र०, २५०००५)

उज्जयिनीमुपसरोज्जयिन्यामुत्सूयते समारोहः ।
कालिदासकविताकूजितदेशे सुकवीनामारोहः ।
तालवने परिसरे तडागे शिप्रालहरीव्यामोहः ।
महाकालदेवालयसोपानेषु सिद्धमुनिसन्दोहः ॥
उज्जयिनीमुपसर······॥१॥

यथा यथा निकषा विन्ध्याचलवनाञ्चलं शिप्रासलिलम् ।
यथा यथा पार्वतीसिन्धुसरितामेतत्स्रोतोऽविरलम् ।
यथा समीपे महाकालमन्दिरं पताकासंवलितम् ।
तथा तथेदं हन्त हृदयमपि गाढोत्कण्ठाकन्दलितम् ॥
उज्जयिनीमुपसर······॥२॥

अत्र क्रीडति मेघमालिका पुष्पलाविकाहृदयाशा ।
पश्चा मयराष्ट्रश्च कनखलं याति हिमगिरिं धन्या सा ।
घटजलमनूच्छलन्ती लोके कादम्बिनी हि नृत्यन्ती ।
सुप्ते परावतानां गणे वलभीष्वेषा गर्जन्ती ॥
उज्जयिनीमुपसर······॥३॥

कृष्णमृत्तिका पलाशपङ्क्तिः पक्वशालिसुरभिक्षेत्रम् ।
विद्युद्दामस्फुरितकामिनीवशीकरणरञ्जितनेत्रम् ।
'माच' नृत्यमञ्चेषु वेल्लिता मालविकासङ्गीतिः ।
कस्य न चित्तं मदयति सद्यः स्वागतभङ्गिमरीतिः ॥
उज्जयिनीमुपसर······॥४॥

विक्रमकीर्त्या मण्डितविश्वजनीने विद्यालये प्रथा ।
कालिदाससंस्थाने विद्वत्परिषदि विदुषां शास्त्रकथा ।
मालवजनमेलापकसम्मर्देषु वीक्ष्यते सोज्जयिनी ।
या दृष्टा विक्रमेण चकितं कालिदासकविताजननी ॥
उज्जयिनीमुपसर······॥५॥

उज्जयिनीमुपसरोज्जयिन्यामुत्सूयते समारोहः ।
उज्जयिनीं चल, चलोज्जयिन्यामुत्सूयते समारोहः ॥

स्वप्नकन्यका×

रच० —वीणा पेरिन्तलमण्णा, केरलः अनुवादकः ई० पी० भरतपिषारटिः
'कामधेनु'-सम्पादकः, एनेल्लूरः, (केरलः)

(१)

कुतो न जानामि जनाः समस्ताः
मां स्वप्नकन्येति समाह्वयन्ति ।
यन्मेऽक्षिणी स्वप्नमये, स एव
हेतुर्भवेत् स्वप्नसहस्रभाजी ॥

(२)

स्वप्नेषु मे दृक्पथमाप्नुवन्ति
परःसहस्रा विविधाः पदार्थाः ।
अतथ्यभूता अपि तत्र भान्ति
विचित्रभावाश्च विलक्षरूपाः ॥

(३)

हिमोच्चयैः शुभ्रकिरीटभाजां
महीभृतां चारुतटप्रदेशाः ।
प्रान्तेषु चोच्चैश्शिरसां गिरीणां
जनाश्च शान्ताः कृतसन्निधानाः ॥

(४)

विहायसे निश्चलपक्षपालो
निरुद्धनादश्च पतत्रिवृन्दः ।
समक्षमायाति, स यत्न कुत्रा-
प्यास्तां, सदा वीतविचारभारः ॥

× केरलप्रान्ते कलाशालाछात्राणां कृते समाकलितायां आंङ्गलीभाषा-कविता-रचनास्पर्धायां प्रथमपुरस्काराहायाः DREAM इत्यस्याः कविताया अनुवादः ।

(५)

विचारधारासु परं विलीना
स्वप्ने समीक्षेऽहममर्त्यलोकम् ।
क्लेशस्य लेशो विदितो न यत्र
दुःखानि चान्त्यश्वसितं श्वसन्ति ।।

(६)

समप्रदेशेषु सविस्तरेषु
बालारुणज्योतिषि सञ्चरन्त्याम् ।
आलीसकन्येव सुविस्मयानां
लोकेऽहमीक्षे कुतुकात् स्वमेव ।।

(७)

स्वप्ने यदि स्यामखिलाण्डनाथो
मदंगुलीनां शिखरेष्वमीषु ।
आनीतमक्लिष्टमनेककृत्वः
प्रवर्तयेयं ह्यखिलाण्डभाण्डम् ।।

(८)

स्वप्नान्तरेषु क्वचन भ्रमामि
मदीयराष्ट्रस्य विशालतायाम् ।
भाग्यं कियत् स्यात् मम भारतस्य
स्वातन्त्र्ययोधेषु तदाऽजनिष्ये ।।

(९)

गुणोत्तरं भारतमाकलय्य
स्वप्नेष्वहं निर्णयमेमि नित्यम् ।
विद्वेषमुच्छेदयितुं प्रधाव्य
कदापि काले विजयेय विश्वे ।।

(१०)

स्वप्नान्तरे यं ननु सन्दिदृक्षुः
स चन्द्रमा मामुपयाति पश्चात् ।
पृष्ठे धृतप्राणसमीरकोशां
बाह्यान्तरिक्षोचितवेषभूषाम् ।।

(११)

कियत् तदा स्यां परिहासपात्रं
सङ्कल्पसम्पूर्णविलोचनाऽहम् ।
शशाङ्कबिम्बे कृतसन्निधाना
दृश्येय वैदूषकवेषभूषा ॥

(१२)

धृताक्षियुग्मानुगुणोपनेत्रां
शाटीं वसानां शबलां विचित्राम् ।
तेजस्विनीं कामपि तत्र नारीं
पश्यामि सङ्कल्पतले दृशा मे ॥

(१३)

का स्यादियं ? विद्ध्यनुमाय, सेय—
महं हि, तथ्यो भवतां ननूहः ।
साऽहं कराग्रे धृतवेत्रयष्टि—
रध्यापिका कापि वयोधिकाऽस्मि ॥

(१४)

अन्ते कदाचित्तु ममैव लोकं
विशामि दीर्घां विरचय्य यात्राम् ।
स्वप्नान् तदा यानवलोकयेय—
मवर्णनीया ननु ते वचोभिः ॥

(१५)

एकाग्रताशक्तिपरीक्षकेषु
मां गाढसङ्कल्पतलेषु लीनाम् ।
नैवाकुलीकर्तुमिहास्ति किञ्चित्
न चारवश्चोद्दलितुं विचारान् ॥

(१६)

स्वप्नाः सहस्रं परियन्ति, तेषां
न सन्ति चान्योन्यसमानधर्माः ।
अथैकथा वा परमन्यथा वा
परस्परं ते तु गुणैर्विभिन्नाः ॥

(१७)

स्वप्नेऽत्र मे स्युः कतिचिन्न तथ्याः
अन्ये तु केचिन्नितरामसाध्याः ।
साध्याः स्युरन्ये कतिचित् कदाचि-
दिच्छाबलं मे मनसो यदि स्यात् ॥

(१८)

दिनानि मे दुःखमलीमसानि
स्वप्ने मदीये तु यदा स्फुरन्ति ।
तदा तदाऽहं व्यथया व्यरोदं
विकारतैक्ष्ण्यान्ननु निस्सहाया ॥

(१९)

यथैव जीवाम्यहमद्य नित्यं
तथैव च द्वन्द्वशतैर्विमुक्ता ।
अतः परं चापि दिनानि नेतु—
मिच्छाम्यहं, तृप्तिकरं न मेऽन्यत् ॥

(२०)

इदं तु मे जीवितमत्र लोके
प्रहर्षभारैः परिपूर्णमेव ।
यतः प्रहृष्टानि दिनानि मेऽद्य
ततः प्रभो ते स्तुतिरस्तु नित्यम् ॥

(२१)

स सर्वसाक्षी जननं ददौ मे
सङ्कल्पसत्यैर्घटितेऽत्र लोके ।
सन्तोषनिःश्वासपरम्पराभि—
र्यः पूरयत्यन्वहमन्तरिक्षम् ॥

○

पल्लव ! कम्पसे किम् ?

(आचार्य वेदानन्द झा, दिल्ली)

(१)

छायान्तनोषि रुचिरां शरणं श्रितेभ्य-
स्तापं निरस्य परमां मुदधमादधासि ।
कम्रां छटां मृदुतरां नयनाभिरामां
तन्वन् हितार्थमयि पल्लव कम्पसे किम् ?

(२)

काले प्रसूनसुरभिं प्रवितीर्य लोके
मूर्ध्ना किरन् सुमकुलं चरणे धरण्याः ।
वातेरितेन मधुना मदयन् प्रबुद्धां-
ल्लोकोपकारकर पल्लव कम्पसे किम् ?

(३)

दृष्टः फलेग्रहिरिहाविकलं त्वमेव
कोऽन्यः परार्थममृतं सुफलं बिभर्ति ।
संचिन्तयन्ननुपलं किल भूतसौख्यं
वन्दारुवृन्तभृत पल्लव कम्पसे किम् ?

(४)

ताम्रारविन्दललनाधरकान्तवर्णः
स्निग्धः स्वभावमृदुलः कलितानुरागः
लोकानुरञ्जनपरो हि वृतानुतापो
नन्दन् मिलिन्दभृत पल्लव कम्पसे किम् ?

(५)

न त्वं भवेस्तरुषु गुल्मलतौषधीषु
च्छत्रायितः शिरसि चेद् भुवनं मरुः स्यात् ।
श्यामा विभा मरकतस्य वने समन्तात्
कीर्णा त्वया सुफल पल्लव कम्पसे किम् ?

(६)

धाराप्रपातमसकृत् करकानिपातं
शीतातपार्तिमपि मृष्यसि सर्वकालम् ।
झञ्झाप्रभञ्जनरयं सहसे सहेलं
सर्वंसहो विनत पल्लव कम्पसे किम् ?

(७)

कम्पोऽपि ते सुखद एव जनाय शश्व-
न्मन्दानिलानुहरणे व्यजनायितस्य।
पातेऽप्यहो भवसि पर्णकुटी मुनीनां
ध्यायन् किमप्यनघ पल्लव कम्पसे किम्?

पल्लवस्य प्रतिबोधनम्

"कम्पनमेमि धीमन्!"

(८)

मेषाजसेवनरताः कुधियो भवेऽस्मि-
न्नुद्यानपत्रनिचयं त्वदयं हरन्ति।
श्रेयो विदन्ति न रसौघफलोत्कराणा-
मित्येव वीक्ष्य ननु कम्पनमेमि धीमन्॥

(९)

तृष्णान्धिता अविधनाः परितो विशन्त-
श्छायार्थिनां सकलमेव हरन्ति मूलम्।
सच्छद्मवृत्तिकलया भुवने वसन्तो
लुम्पन्ति कूलमिति कम्पनमेमि धीमन्॥

(१०)

कामाकुलाः कलिभुवश्छलिनो बिडाला
मायूरिका जवनिकां विपिने दधानाः।
प्रच्छन्नगाः सुवयसां चरणावरोधं
कुर्वन्ति तेन ननु कम्पनमेमि धीमन्॥

श्रीवेदव्यासप्रणीत-ब्रह्मसूत्रस्य सरलश्लोकेषु विवृतिः

(लेखकः—आचार्यरमेशचन्द्र शुक्लः, दिल्ली)

कृपालुकृष्णं पितरं च मातरं
प्रभुं सुबन्धुं सुहृदं जगद्गुरुम् ।
परोपकारैकपरायणं प्रियं
नमामि लोकाखिलनाथमीश्वरम् ॥१॥

योऽगोप्सीत् सुजनान् सुमार्गगमनान् सर्वांश्च धर्मात्मनः
साधून् यः सकलान् जुगोप नितरां पुण्यात्मनां पावनम् ।
वृन्दं यः सुकृतिप्रियोऽनुदिवसं लोकेऽत्र धर्मप्रियो
वन्देऽहं करुणामयं हरिममुं गीताप्रवक्तृप्रभुम् ॥२॥

श्रीकृष्णं प्रणमामि निन्द्यपथगान् सन्मार्गविध्वंसिनः
पापाचारपरायणानपकृतौ लग्नान् महापामरान् ।
सोऽधर्मे स्थितिकारिणो वसुमतीभारान् शठान् योऽधमान्
हत्वाथात्रहरिः कृपामयमाः धर्मं समस्थापयत् ॥३॥

दृष्टिर्यस्य दयामयी तनुभृतां तापत्रयोन्मूलिनी
वेदो यस्य गिरा भुवो मतिमतां स्वान्ते सुधां वर्षति ।
यस्याङ्घ्र्यम्बुरजः प्रसादकणिका नृणां भवात् तारिणी
सोऽयं कोऽपि विभासतेऽत्यतितरां श्रीकृष्णचन्द्रो हरिः ॥४॥

श्रीरामोऽखिललोकपालनरतो नाथः कृपाम्भोनिधिः
माता चापि पिता सुहृच्च परमोदारो जगत्याः पतिः ।
सर्वेषां हितकारिबन्धुसुखदः शान्तिप्रदः प्राणिना-
मापन्नाशनकारिशौर्यविदितस्त्राता सतां वन्द्यते ॥५॥

संहर्ता दुरिताध्वगामिमनसां दुष्टाधमानां नृणां
सत्कर्माचरणस्थमानसभृतां पुंसां सदा पोषकः।
यस्मान्नास्ति परो हि कोऽपि हितकृत् सर्वेषु लोकेष्वपि
स्वामी सः सरलस्वभावसुभगो भक्त्या मया नम्यते ॥६

शम्भो त्वां परमेश्वरं हितमयं भक्त्या जनो योऽनिशं
भक्त्याराधयतीष्टदं स्मरति चाजस्रं त्वदीयार्चनाम्।
श्रद्धास्थापितमानसो हि कुरुते दातुर्दयालुप्रभो.
प्राप्नोति स्वमनोरथं स सफलं क्षिप्रं जगत्यामिह।।७

एष त्वां शरणं गतो त्रिभुवनाधीशं शिवं शङ्करं
कालेऽस्मिन्नतितापतप्तहृदयो मन्दोऽपराधी महान्।
नानाकल्मषपीडितो दुरितकृद् दोषोदधिर्मन्दधीः
दीनानामधमोऽस्म्यहं मम पितस्त्रायस्व मां साम्प्रतम् ॥८

मूर्ख ! त्वं नम शङ्करं कलुषतश्चेत् सत्वरं काङ्क्षसि
स्वोद्धारं मतिमन्द याहि शरणं क्षिप्रं भवानीपतिम्।
ईशः सोऽस्ति महानुदारहृदयो नो तादृशो विद्यते-
ऽनन्तौदार्य्यधरः कृपामयपिता कुत्रापि दाताऽद्भुतः ॥९

माता सा करुणामयी भगवती बुद्धिप्रदा शारदा
विद्यावैभवकाङ्क्षितेषु सततं वात्सल्यवन्मानसा ।
सर्वाभीष्टप्रदायिका ह्युपकृतीर्नित्यं विधत्तेऽमिताः
आनन्दामृतजाह्नवीं सविनयं भक्त्या मया वन्द्यते ॥१०

तं वन्दे गणनायकं गणपतिं श्रीपार्वतीनन्दनं
यं सर्वा जगती सदैव भजते भक्त्या महत्यान्वहम्।
प्रत्यूहान् निखिलान् निहन्तु भगवान् अस्माकमीशो द्रुत-
मित्थं प्रार्थयतेऽनिशं हि जगती यं पातु सोऽस्मान् प्रभुः ॥११

शम्भोः सूनुरयं दयालुहृदयो विघ्नान्धकारं द्रुतं
विध्वंसं कुरुते सुखानि किरति प्रीत्या भृशं सन्ततम् ।

संसाराय शुभञ्च शान्तिममितां भद्राण्यनन्तानि च
दत्ते मोदमनाश्च मोदकमुखो मोदाम्बुवर्षी सदा ॥१२॥
सर्वेषामसुधारिणां जनयिता ह्याधारमूलेश्वरः
आस्ते यस्य निरन्तरं प्रकृतिरादेशस्थिता सर्वदा।
यो भर्ता कुरुतेऽखिलानि भगवान् तत्संश्रये सन्ततं
साम्राज्ये विदधाति सर्वजगतीं सञ्चालितां यस्य सा ॥१३॥

सर्वेषां हृदये स्थितोऽस्ति कुरुते यो रक्षितां मेदिनीं
काष्ठेऽग्निः पयसीव सर्पिरखिले भर्ता य आस्तेऽनिशम्।
पाताले नभसि क्षितौ सुखमयं तेजो यदीयं स्थित-
मीशो वस्तुनि चेतनेऽपि निखिले च द्योततेऽचेतने ॥१४॥

शास्ता निष्क्रिय ईश्वरः स जगति व्याप्तः सदा शोभते
सर्वेषामपि जीवनं गतिमयं कुर्वन् हरी राजते।
प्राणाख्यः पवनोऽस्ति सर्वदयितो विश्वाकृतिर्भ्राजते
आनन्दोऽस्ति चिदस्ति सच्च जगतीधातेश्वरो द्योतते ॥१५॥

स्रष्टा कारणकार्ययोः स्थिरतमे सम्यग् विधाने स्थितः
ईशत्वं सततं च यस्य सकलक्षेत्रेषु विश्वाखिले।
सर्वान् प्राकृतिकान् स्वकीयनियमान् संश्रित्य यो दीप्यते
लोकान् सः कुरुतेऽधियः परिणतान् शश्वच्च संशोभते ॥१६॥

क्षेत्रत्वं गमितं प्रवृत्तिपरकं यो भौतिकं ह्यात्मनो
नित्यं शास्ति च लोकसर्वमनिशं सन्तिष्ठते यत्र सः।
अव्यक्तं सकले भवेऽप्यतिशये यो राजते सन्ततं
यस्मिन् भाति समग्रमेव सततं सोऽस्मत्पिपितास्तीश्वरः ॥

शुद्धं ब्रह्म निरञ्जनं ह्यनुपमं चाद्यन्तहीनं परम्
आनन्दात्मकर्निगुणं सुविमलं ज्योतिर्मयं मङ्गलम्।
मायोद्भूतसमस्तभेदरहितं शान्तं मनोऽगोचरं
वाचातीतमरूप्यपूर्णसुखदं सत्यं शिवं सुन्दरम् ॥१८॥

नो तत् प्रमाणपथगं प्रभुर्निर्विकल्पं
ज्ञेयं न तद् भवति नापि च तत् प्रमेयम् ।
ज्ञानात् परं घनमजं शिवसत्स्वरूपं
नो ज्ञातृ तन्निखिलकोशविहीनमीड्यम् ॥१९॥

ध्यानस्थितं भवति नो विहितेऽपि यत्ने
विज्ञानमस्ति च नितान्तमहन्महोऽपि ।
तद् ब्रह्म सर्वविधिना नितरामगम्यं
माया वशे वसति तस्य च सेविकेव ॥२०॥

नो सम्पदा न च कृतैर्बहुलैश्च यागैः
नो चान्यकर्मविविधैरधिगम्यते तत् ।
तत् स्थायि तद् ह्यमितमेव परं प्रकामं
भक्त्यैव तद् भवति लभ्यमनन्त सत्यम् ॥२१॥

आध्यात्मिकं भवति तन्महनीयभव्यं
ज्ञानात्मकं परमशान्तिसुखास्पदं तत् ।
मुक्तिस्तु मेलयति तत्र हरौ कदाचिद्
उच्छिन्नकर्म सकलं हतसर्वकामम् ॥२२॥

आत्माऽमराजरविकारविहीन एव
सोऽन्तं न गच्छति सदा कुरुते निवासम् ।
कर्मानुयाति च शरीमतो बिभर्ति
तज्जीवनं सततशाश्वतमेव नित्यम् ॥२३॥

सर्वाः कला अपि भवस्य समुद्भवे ताः
स्थित्यां लयं न च कदापि पृथग् भवन्त्यः ।
सद्ब्रह्मणो भगवतो निवसन्त्यभीक्ष्णं
ध्येयं प्रधीन्द्रजगतो नितरां तदेव ॥२४॥

आस्ते स्वरूपशुभमङ्गलचेतनत्वं
सद्ब्रह्मणोऽखिलदशास्वत एव सर्वे ।

सार्धं हि तेन न पृथक् सकलाः पदार्था:
भूत्वा स्वजीवनभृतो विलसन्ति सम्यक् ॥२५॥
भूते भविष्यति च वस्तु हि वर्तमाने
कालत्रयेऽपि निखिलं सकलस्थलेषु ।
अन्यन्न चात्मन इति प्रविभक्तमास्ते
आत्मैव भात्यतितरां तु भवंश्च तत् तत् ॥२६॥
रूपे च नाम्नि सकलेऽपि विकारजाते
ब्रह्मैकमेव विलसत्यतिचेतनत्वम् ।
गुह्णत् ह्यनन्तसुषमां परमाभिरामां
व्यक्तां भृशञ्च विदधत् समयत्रयेऽपि ॥२७॥
कुत्रापि नो किमपि वस्तु कदापि भूत्वा
तद् ब्रह्मणो भवति भिन्नमिदं हि सत्यम् ।
सन्तिष्ठते जगति यन्निदधाति सत्त्व-
मेतच्च सर्वसुधियो न तु विस्मरन्तु ॥२८॥
तन्निर्गुणञ्च सगुणं प्रतिपादयन्ति
सर्वाः सदोपनिषदो निरुपाधिकं सद् ।
ब्रह्मेति लक्षण-विशेषविहीनमस्ति
ज्ञानञ्च सत्यमपि चित् सुखमेव पूर्णम् ॥२९॥
ब्रह्माण्डसर्वभुवनग्रहमण्डलानां
धात्रस्ति तद् भरणपोषणकृत् तदेव ।
संहारकञ्च समवस्तुकलापहेतु-
र्वेदा ब्रुवन्ति तदनन्तमनादि सत्यम् ॥३०॥
रूपाणि तस्य विलसन्ति सहस्रशो हि
तेषां कदापि गणना भवितुं न शक्या ।
तेजोऽधियान्ति सकलानि सदैव तस्मात्
तेजोमयादमितपौरुषपूर्णधाम्नः ॥३१॥

मायायुतन्तु सगुणं प्रणिगद्यते तत्
तन्निर्गुणञ्च भुवनत्रयभर्तृकर्तृ ।
मायेति यास्ति परमेश्वरबीजशक्ति-
रादाय तां हि कुरुते रचनां समस्ताम् ॥३२॥

तस्मादजात् सगुणनिर्गुणनाथसच्चिच-
दानन्दरूपपरमेश्वरतो यथा हि ।
पिण्डात् तथोद्भवति चेतनताविहीनात्
प्राणीति वृश्चिक इहाथ च गोमयात्तु ॥३३॥

संवर्ततेऽखिलजगत् परमेश्वरस्य
जाड्यान्वितं प्रमुखकारणशक्तिभाजः ।
भेदे न सत्यपि हि वस्तुत एव तत्र
भेदश्चकास्ति जगति व्यवहारदृष्ट्या ॥३४॥

संसारवस्तुनिहवा उदयं व्रजन्ति
ते चानुभूतिमपि यान्ति विराजमानाः ।
सद्ब्रह्मधाम्नि वसतिञ्च भजन्ति सम्यक्
बोधं विशिष्टमपि चारुतरं वहन्तः ॥३५॥

ऐक्यं विभात्यतितरामुभयोरखण्डं
ब्रह्मात्मनोः सुमधुरं प्रियरम्यदिव्यम् ।
एतत् स्फुटं वदति यत् सुतरां तदस्ति
वेदान्तदर्शनमहोज्ज्वलभूरिभव्यम् ॥३६॥

आभाति भारतभुवः श्रुतिमूलमह्याः
स्रोतस्तु संस्कृतिलता सुषमाश्रितायाः ।
पूज्यर्षिवृन्दमुनिमण्डलसेविताया
वेदान्तदर्शनमिदं शुभशान्तिशुभ्रम् ॥३७॥

वेदान्तदर्शनमिदं सुधियो विदन्तु
भूमण्डलस्य जनजीवनमेव भद्रम् ।

तद् दिव्यभारतमही महिमाभिरामं
श्रेयो विधातुमिह भाति वसुन्धरायाम् ॥३८॥
प्राचीनगौरवविशालशुभस्मृतीनां
शिक्षा नितान्तरुचिरासु परम्परासु ।
सम्प्रेक्ष्यते विदितभारतभव्यभूमेः
वेदान्तशास्त्रहितधाम्नि विराजमाना ॥३९॥
कस्मिन्नपीह हि भवेदथ सम्प्रदाये
किं वा मते वसुमतीजनसर्वं एव ।
विश्वासमानसगतेऽपि च धर्मभेदे
वेदान्तदर्शनमिदं तु धनं समेषाम् ॥४०॥
आत्मा पृथक् समुदितं वपुषो यदेति
ज्ञान भवेदभिमता शुभजीवनश्रीः ।
वेदान्तशास्त्रसुखदप्रियशर्मधाम्नो
व्यक्ता तदा सपदि लोकहितैकनिष्ठा ॥४१॥
दूरे न वक्ति भवितुं सदनान्मनुष्यान्
हातुं च मानवसमाजसमस्तसेवाम् ।
वेदान्त दर्शनमिदं हि कदापि शर्म-
शान्तिप्रदाखिलजगत्सुहृदेकमात्रम् ॥४२॥
सत्ये निधातुमवदातपवित्रशुद्धां
भक्तिं भृशं भणति शास्त्रमिदं प्रकृष्टम् ।
वेदान्तदर्शनमिदं सकलोपकार-
संलग्नमीश्वरपदाम्बुजलीनचित्तम् ॥४३॥
स्नेहेन यच्छति सुहृज्जगतीजनानां
वेदान्तदर्शनमिदं कृत आत्मशक्तिम् ।
तां प्राप्य यान्ति विलयं निखिलाश्च कामाः
स्वार्थस्थिता विकृतयोऽप्यवलेपयुक्ताः ॥४४॥

सञ्जायते सपदि जीवनमस्मदीयं
सत्कर्मसेवनपरं सुदृढं विनीतम् ।
विश्वासनिश्चयपवित्रविचारयुक्तं
वेदान्तदर्शननितान्तकृपासकाशात् ॥४५॥

वेदान्तशास्त्रनिहितो हि रहस्यवादः
सम्बद्धमेव कुरुते जनजीवनञ्च ।
ज्ञानेन साकमथ भौतिकविद्ययापि
संघर्षवह्निशमनं विदधाति सद्यः ॥४६॥

ज्ञानं विरक्तिसहितं समुदेति यत्र
सम्प्राप्नुते स मनुजस्त्वरयैव मोक्षम् ।
तस्मात् प्रयस्यतु जनो दिशि तत्र विद्वान्
उक्तं फलं हि वपुषः सुजनैस्तु पुंसः ॥४७॥

शत्रुर्महान् जनशरीरभृतोऽभिमान
उच्छिद्य तं झटिति विज्ञपुमान् जगत्याम् ।
ज्ञानासिना श्रयतु शान्तिसुखं पवित्रं
कर्तुं मनः सुविमलं च धियं हि तीक्ष्णाम् ॥४८॥

शब्दादिभिर्मृगगजौ च पतङ्गमत्स्य-
भृङ्गाः स्वभाववशतो निधनं प्रयान्ति ।
ग्रस्तस्तु पञ्चभिरयं पुरुषो गतिं कां
शोच्यां लभेत सुधियेति विचारणीयम् ॥४९॥

वैराग्यशास्त्रमुपयुज्य जनो विवेकी
हन्याद् द्रुतं विषयनक्रकठोरदुष्टम् ।
कृत्वा तथैष्यति हि संसृतिसागरस्य
प्रत्यूहकष्टमकरादियुतस्य पारम् ॥५०॥

कर्माणि मङ्गलमयानि विधाय मर्त्यो
लोके करोति हि निजोदयमत्र सम्यक् ।

मृत्युर्भनक्ति तरसोन्नतिमेव तस्य
आगामिजन्मनि परं विहितानि तानि ॥५१॥

सम्यक् तनोति विधिना स्वगुणान् समस्तान्
सिद्धान्त एष भरतस्य भुवोऽस्त्यमोघः।
धर्मानुगामिमहनीयविशिष्टतावान्
नीत्यन्वितो नियमशक्तियुतः स भाति ॥५२॥

देहावसानसमयेऽपि जनं न मृत्यु-
र्हीनं करोति विधिना निखिलेन देया-
ऽऽदेयत्वकर्मसकलं स्वगतिं निधत्ते
चाग्रेऽपि सत् समुचितं नितरामभग्नम् ॥५३॥

सामाजिकीं स्थितिमुदग्रतरां नयंश्च
स्वार्थं विहाय सुजनःसततः ह्यलिप्तः।
साम्ये मनोऽपि निदधत् सुखदुःखयोः सन्
कुर्वीत कार्यमनिशं हि हरौ स्वभक्तिम् ॥५४॥

त्यागं श्रितस्यात्र भवे पवित्रं
दानं तपश्च सततं मनुजस्य सेवाम्।
सञ्जायते हि विमलं सुदृढं चरित्रम्
आत्मा महान् भवति दिव्यबलान्वितश्च ।५६।

प्रीणाति सर्वजगतीं विमलः पवित्र
आचार एव शुचितामृदुताभिरामः।
स्यान्मानवो वसुमतीभुवनेऽत एव
संश्लाघनीयचरितान्वितशीलरम्यः ॥५६॥

अज्ञानमेव कुरुते न च केवलं नः
प्रत्यूहकूपपतितान् विषमेषु लीनान्।
आसक्तयोऽपि विषयेषु हि कामनाश्च
मग्नान् जनानिह भवे बहुकष्टजुष्टे ॥ ५७॥

चित्तस्य मोहरहितत्वमपेक्ष्यतेऽत्र
सर्वैर्विकारनिचयैश्च विमुक्तताऽपि ।
तृष्णाकृशत्वमनिशञ्च विधातुमेव
यत्नं करोतु मनुजः सततं नितान्तम् ॥५८॥

आत्मानमीक्षितुमहो धिषणास्ति नैव
ज्ञातुञ्च वस्तुनिकरं विविधं हि कांक्षाः ।
नालं विदन्तु मनुजा इह सत्यमेतद्
द्रष्टुं तु तं हरिकृपा समर्दाशतेष्टे ॥५९॥

कालो न सोऽस्ति भगवान् जगतां विधाता
नो भाति यत्र सततं करुणालुरीशः ।
आनन्दसस्सुललितो हरिशान्तिदाता
भक्त्या भजेत् प्रभुमतो मनुजः सदैव ॥६०॥

कृत्स्नं जगत् सकलधामविशाललोकाः
तस्यैव सन्ति परमेश्वरशक्तितेजः ।
संशोभितस्य च कृपोल्लसितस्य हेतो-
राद्यस्य रक्षणपरस्य च सर्वभर्तुः ॥६१॥

आस्ते जगत् सकलमेव नितान्तसत्य-
माचार्यवृन्दजगती निजजीवनं तु ।
विश्वम्भरे निवधती नयते, निनाय
सा नेष्यतीति सुखशान्तिकरे ह्यजस्रम् ॥६२॥

सत्यं जगत् सकलकर्मविधानमेतत्
आभाति जीवनमिदं यदि तत् पवित्रम् ।
न्यायप्रकर्षमवलम्ब्य च धर्ममेव
कर्त्तव्यरक्षणपराः सुजनाः स्युरत्र ॥६३॥

अभ्यन्तरे वसति दीनदयालुनाथो
जीवात्मनां विधिशिवेन्द्रसुरादिसेव्यः ।

आत्मा भवन् विलसतीश्वर आत्मनां सः
ब्रह्मेति तं श्रुतय आहुरनन्तमीशम् ॥६४॥

विश्वं चराचरमयं विविधैरिदं यद्
जीवैर्विचित्रबहुलैरमितैश्च युक्तम् ।
संवीक्ष्यते भगवतो वपुरेव वेद्यं
तत् सर्वमेव मतिमद्भिर्मनुजैरवश्यम् ॥६५॥

ज्ञानं निधाय विमलं तरसा विहाय
चासक्तिमत्र यदि कोऽप्यधियाति साम्यम् ।
सर्वत्र जीवनिवहे स च शीघ्रमेति
आनन्दवद्भगवदीश्वरभक्तिभव्याम् ॥६६॥

विज्ञा हि यं तु विषयं प्रतिपादयन्ति
कामं भृशं बहुविधो निविडश्च सः स्यात् ।
वेदान्तसम्मतगिरं सुधियो वदन्ति
भक्ता हरेः रहसि तत्र विभावयन्तु ॥६७॥

आचारसंज्ञकधनं सविधे निधेय-
मुद्योगसंपदनिशं परिरक्षणीया ।
वैधानिकं तु निदधाति च कर्मपत्रं
धातुर्हि शक्तिरिति संस्मरणीयमेव ॥६८॥

कार्यैश्च तैरनुशयैर्विविधैर्विचारै-
र्यन्निर्मितं हि पुरुषस्य चरित्रमत्र ।
तज्जायते सहचरो मरणावसाने
आगामिजीवनपथे न तु संशयोऽस्ति ॥६९॥

आगामि जीवनपथं जगतीह नूनं
कुर्मो वयं विरचितं निजकर्मजातैः ।
वेदान्तदर्शनमिदं कुरुते तदापि
अस्मद्धितं सुरुचिरं मनसैव शुद्धम् ॥७०॥

आत्मा वपुर्न स ततः सकलेन्द्रियेभ्य
आस्ते पृथग् जगति यत्र जने यदैव ।
ज्ञानं ह्युदेति स इदं भवसागरात्तु
सञ्जायते नु तरसोद्धृत एव भीमात् ॥७१॥

लाभं विहाय निजमानसकांक्षितं हि
सामाजिकं हितसमस्तमपि स्वचित्ते ।
प्रीत्या निधाय मनुजैः सततं विधेयम्
उत्साहपूर्वकमिहावनिलोकमध्ये ॥७२॥

ईड्यं सच्चित् परब्रह्म जनुर्गृह्णाति भूतले ।
तत्र किं सम्भवं नास्ति सर्वशक्तिधरे प्रभौ ॥७३॥

कुण्डलादिगतं रुक्म विकारं याति नो यथा ।
जगत्त्वं च तथा प्राप्तं विकारं ब्रह्म याति नो ॥७४॥

आरोपणं भवस्यास्य निष्प्रपञ्चे परात्मनि ।
अध्यारोप इति प्रज्ञैः सादरं सुजनैर्मतः ॥७५॥

आरोपितपदार्थस्य निराकृतिर्निगद्यते ।
अपवाद इति प्रज्ञैर्विद्वद्भिः सद्विचारिभिः ॥७६॥

आत्मज्ञानोद्भवे मतं साहाय्यकृत्सुधीजनैः ।
नित्यकर्मेति तत् प्रोक्तं मोक्षस्यास्त्यपि साधकम् ।८७।

परिवृत्तिरतात्त्विकी विवर्तः सेति सम्मता ।
रज्जौ सर्प इति प्रज्ञा तस्योदाहरणं मतम् ॥७८॥

ब्रुवन्ति सुधियः सर्वे विकार इति सादरम् ।
पयसो दधिरूपत्वं परिवृत्तिर्हि तात्त्विकी ॥७९॥

आहुरतस्मिंस्तद्बुद्धिरध्यास इति कोविदाः ।
स्थूलोऽयं दुर्बलो देह एतस्यास्ति निदर्शनम् ॥८०॥

आनन्दोऽव्ययचिद्विकाररहितब्रह्मेति सन्निर्गुणम्
मायायां प्रतिबिम्ब एति हि यदा बिम्बस्य चैतन्यभृत् ।
चैतन्यं प्रतिपद्यते झटिति तन्नामेश्वरः सर्वथा
किञ्चान्तःकरणे करोति पतनं तज्जीव इत्युच्यते ।८१।

वेदान्ताभिमतं यद् यत् कार्यं कर्म हि तत् सदा।
शुभकाङ्क्षि जना भूम्यां कुर्वन्ति सुधियोऽनिशम् ।८२।
वेदान्तं सुजनाः सर्वे पठन्तु मनसान्वहम्।
अत्र तत्र सुखं चेष्टं चेत्प्रधीत्वसुशोभिताः ।।८३।।
सत्यं तपः सरलजीवनपावनत्वं
ज्ञानं नितान्तपरमोज्ज्वलसच्चरित्रम्।
एते विभान्ति मनुजे हि गुणा मनोज्ञा
यस्मिन् स एव वसुधाभुवनेऽभिवंद्यः ।।८४।।
ईशः करोति वसति हृदये समेषां
संसाररक्षणरतो महिमाभिरामः ।
शास्ता समस्तजगतां परमेश्वरोऽसौ
भक्त्या भजन्तु सुधियः सकलास्तमीड्यम् ।८५।
शिक्षा गुरोरतिरां हि पितुश्च मातुः
पुंसां तु जीवनकृते नितरामभीष्टा।
नो पुस्तकाद् भवति पूर्णहिताय लब्धा
सा जायतेऽलमिति विज्ञजना विदन्तु ।।८६।।
नद्यो वनानि गिरयस्तरवः समुद्राः
सर्वश्च भेषजगणो धरणी च तत् तत्।
अस्मद्धिताय परिपोषक मेव पित्रा
दत्तं हि तत्त्वमखिलं करुणामयेन ।।८७।।
ब्रूते जनो य इह भूभुवनेऽखिलेऽहं
विद्वान् महानिति महीभुवने स एव।
अज्ञानवानमितमांद्यधरो मनुष्यो
विद्वांस्तु नो वदति तद्विधवाचमेव ।।८८।।
श्रेयांसि प्रददातिकोमलमनाः क्षोणीश्वरो माधवो
येन स्युस्तनुधारिणो हि सकलाः कल्याणभाजः सदा।
सर्वैश्चापि सुखैः समृद्धिविभवैः संसेव्यमाना भृशं
ज्ञानेनापि च विद्यया प्रियधनैः स्वस्था जनाः सर्वथा ।८९।

उद्दिश्याखिललोकनायकहरेर्ज्ञानं भवन्तोऽमलाः
मर्यादामवलोकयन्ति मनसः पुंसाञ्च मान्द्यं हि ये ।
स्वीकुर्वन्ति च वस्तुतस्तु मनुजा ज्ञानस्य पार्श्वे स्थिताः
तस्येशस्य दयाम्बुधेरतितरां बन्धोः समेषां पितुः ॥९०॥

वैदुष्येण न केवलं भवति स ज्ञातो जगत्पालकः
ईशः सन्नसुरेव भाति हृदये ज्योतिःस्वरूपेश्वरः ।
सञ्जातेऽनुभवे विमुञ्चति जनो बाह्याश्रयं सर्वथा
शुद्धेऽन्तःकरणे हरेश्च कुरुते तस्य द्रुतं दर्शनम् ॥९१॥

ज्ञानस्याध्वनि वासवेश्मबहुला आभान्ति पुंसां कृते
प्रीत्या ते श्रमहारिणः शुभपथे स्वान्ते स्मरन्तो हरिम् ।
दीनानां विपदो व्यथाः विदधतो नष्टाश्च सामाजिकीं
शुश्रूषामनुवासरं हि मनुजा जीवन्तु शान्त्यन्विताः ॥९२॥

कर्त्तव्ये मनसा रता अनुदिनं सर्वे जना जीवने
भूत्वार्थार्जनतत्परा इह भवे प्राज्ञा भवेयुः सदा ।
मत्वाऽऽत्मानमहर्निशं दृढतया वार्धक्यहीनं मुदा
शश्वच्चाप्यमरं समीपमरणं चिन्वन्तु धर्मं पुनः ॥९३॥

सर्वत्रैव हरिः स्थितोऽत्र जगतीधामप्रिये सन्ततं
दत्तं तेन सुखेन यद् ह्यधिगतं कुर्वन्तु तत् कस्यचित् ।
लोभं वस्तुनि नो जना विदधतु श्रेष्ठोऽस्ति पन्था अयं
सस्नेहं प्रियभारतोपनिषदः शंसन्ति भद्रश्रिताः ॥९४॥

ब्रह्मेति जीव-जगतो सकलानि सन्ति
तान्येकमेव न च तत्र विभिन्नताऽऽस्ते ।
तस्मिन् स्थितौ रहसि योगमयी तु वेद्या
मुक्तिर्जनैः सुमतिभिः शुभसिद्धिशुभ्रा ॥९५॥

माया विभाति महदादिकहेतुभूतो-
पाधिश्चराचरपतेः परमेश्वरस्य ।
जीवस्य सोऽस्ति विदितः किल पञ्चकोशो
भेदः प्रधीविदित एष उपाधिहेतोः ॥९६॥

नो वस्तुतो भवति कोऽपि हि तत्र भेदो
जाते ह्युपाधिनिहते न च तत्र जीवः ।
नैवेश्वरो भवतु बोधितमत्र तत्त्वम्
एतत्सुधीजनकृते शुभशान्तिनिष्ठम् ॥९७॥

मन्दो न पश्यति पतिं जगतां समेषां
श्रेयःप्रदातृसुखसत्यनिधानमीशम् ।
गर्ते निपातवशतः सुखदुःखयोश्च
सांसारिकेषु विषयेष्वपि पातहेतोः ॥९८॥

कार्यः प्रयासनिशितातिकठोरशुद्धः
स्याद् येन दोषरहितं छलमन्युचिन्ता-
मात्सर्यकामकपटादिकरागशून्यं
द्वेषेण लोभपरुषेण मनश्च हीनम् ॥९९॥

चित्तं च यद् भवति दोषसमस्तशून्यं
शुद्धं पवित्रममलं परमप्रसन्नम् ।
वासं करोति करुणालुपिता हि तत्र
नारायणोऽखिलजगद्भरणे निलीनः ॥१००॥

भक्तः पितु र्हि जगतोश्वरवल्लभस्य
विघ्ने पुरः सति कठोरनितान्तभीमे ।
उत्साहशक्तिसहितः शुचिसाहसेन
युक्तो भवत्युचितकार्यपरो मनस्वी ॥१०१॥

साधारणोऽस्मि मनुजो न मुनिर्महर्षिः
त्यक्त्वा विचिन्तनमिदं निदधच्चरित्रम् ।
कार्ये भवेत् सततमेव नितान्तलग्नो
धर्मप्रिये सुजनपोषितसत्यनिष्ठे ॥१०२॥

एषा कृतिश्चरणयोः परमेश्वरस्य
तस्यार्प्यते सविनयं हि मया नतेन ।

रामो भवन् जगति वा च कदापि कृष्णो
भारं भुवो हरति योऽत्र निधाय धर्मम् ॥१०३॥

जयति जयति पूज्यो लोककल्याणकर्ता
निखिलनृहितदृष्टिं त्वं निधायः ह्यकार्षीः ।
शुचिसरसमनोजाः ज्ञानपीयूषवर्षी
सुललितकृतिरम्याः कल्मषध्वंसकर्त्रीः ॥१०४॥

विविधकृतिषु तासु ब्रह्मसूत्रं प्रकृष्टं
धृतमवहितचित्तस्त्वं चकर्थानवद्यम् ।
व्यधित मतिविहीनो मन्द एषोऽर्थकार्य-
मतिशयमिदमागस्त्वं महर्षे क्षमस्व ॥१०५॥

—: शुभमस्तु :—

काव्ये सब्लाइमनामधेयम् उदात्तम्

[डा० रमाशङ्करतिवारी, २०, लक्ष्मणपुरी कालोनी,
फैजाबादः (उ० प्र०)]

(क)

कारिकाः

उदात्तमलङ्कार एको विशेषः,
गणितः साहित्यशास्त्रेऽस्मदीये,
लोकातिशयवर्णनं तस्य शीलम् ॥१॥
सब्लाइमनाम्नाऽभिधीयते तत्,
खलु रोमनाचार्य-लोञ्जाइनसेन ॥२॥
मनश्चालनं लक्षयत्यस्य शीलम्,
प्रमोदोपदेशौ किल वर्जयित्वा,
प्रहर्षत्यावेशयति तु सहृदयम्,
विस्मापयति चमत्कुरुते तथैव,
उत्थापयति तूच्छ्राये हि सहजम्,
खलून्मादयति संसर्गेण तस्य,
प्रस्तुतवस्तुनश्च वर्णनमुखेन ॥३॥

विवृतिः

'उदात्तम्' वर्तते एकोऽलङ्कारविशेषः भारतीयसाहित्यशास्त्रे। भामहदण्डिप्रमुखालङ्कारचार्याः सर्वे गणयन्ति उदात्तम्, सन्निहितं लोकातिशयवर्णने हि, अन्ततोगत्वा, मिषता तेषां लक्षणानिरूपणस्य आपाततः भिन्नाभिन्नत्वस्य। उदात्तमिदमेव अभिधीयते 'सब्लाइम' इति संज्ञया प्राक्तनरोमनाचार्येण लोञ्जाइनसेन। तदनुसारेण, उदात्तमस्ति एकं बहुमूल्यं तत्त्वं काव्ये यस्य स्वभावो भवति प्रचालनं भावकस्य पाठकस्य वा चित्तस्य। लोञ्जाइनस-काले (तृतीये ईसवीय-शताब्दे), प्रदानं प्रमोदस्य उपदेशस्य वा विगण्यते स्म काव्यस्य धर्मः।

उल्लेखनीयोऽयमत्र यत्प्रयोजननिरूपणे काव्यस्य भारतीयशास्त्रेऽपि इमे द्वे स्वीकृते—"सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे" इति मम्मटः। लोञ्जाइनसेन, प्रत्याख्यायते बहुप्रथितमान्यतेयम् अथ च अन्विष्यते 'सब्लाइम'—तत्त्वं काव्ये यत् प्रहर्षयति, आवेशयति, विस्मापयति, चमत्करोति सहृदयपाठकान् प्रचुरम्। सः अनुबभूव यत् ते उत्थापिताः, क्षुत्पिपासादिलघुजीवनवृत्तिसीम्नः कस्मिंश्चि-दूर्ध्वतले काव्यानुशीलनेन। इयं लब्धिः भावकानां नो गृहीता तत्समये साहित्यसमीक्षाक्षेत्रे।

तद्युगीययूनानदेशे वर्तमानेषु नगरराज्येषु, राजनेतारः प्रयतित-वन्तः अधिगन्तु नैपुण्यं वक्तृत्वकलायाम् येन जनसामान्यो भवेत् प्रभावितः तेषां प्रतिपादनेन राज्यकार्यविषयेषु। ततो वाग्मिताऽभ्यासः बभूव तेषां प्रधानव्यवसायः। अनेनैव, समायातमस्तित्वे वक्तृत्व-शास्त्रम्, "रेटरिक" इति नामधेयेन। भाषणकलायाः सर्वश्रेष्ठा सिद्धिरभवत् प्ररोचयितुं, प्रोत्सारयितुं सुहेतुवादिना। लोञ्जाइनसः स्वयमेव अध्यापकः एकस्याम् अकादम्याम्, शिक्षयन् काव्यशास्त्रं वक्तृत्वशास्त्रं च छात्रवर्गान्। सुतराम्, भाषणकलायाः सर्वश्रेष्ठो-पलब्धिः, अर्थात्, प्रहर्षणं, प्ररोचनं, विस्मापनं श्रोतृवर्गस्य येन ते अधिगच्छेयुः उन्माददशामेकां, उपनीता तेन काव्यानुशीलनक्षेत्रेऽपि। मनोदशेयम् अभिहिता "एक्सटैसी" किं वा "ट्रैन्सपोर्ट" इति संज्ञया। लोञ्जाइनसो मन्यते स्म यत् इयं प्रकाम्यमनोदशा अधिगन्तव्या भावकैः उपस्थितया "सब्लाइम"-तत्त्वस्यैव काव्यप्रबन्धे। सः उप-धारयति यत् "सब्लाइमम्" अवतरति काव्ये प्रस्तुतवस्तुनः, वक्तव्यस्य वर्णनस्य कौशलेन। इह प्रसङ्गे –

लोञ्जाइनसः संवदति भारतीयालङ्कारचार्याणां निरूपणेन "उदात्तम्" इत्यलङ्कारस्य।

(ख)

कारिका:

बरकल्पनास्तु सबलमनोरागा:
त्वलङ्कारयोगो भाषाभिजात्यम्,
गौरवगर्भा समुत्कृष्टरचना,

इदं पञ्चकमभिधीयते स्म,
मूलमुदयस्य सब्लाइमस्य ॥४॥
अथ कल्पना रागा ह्यात्मप्रसूताः,
अलङ्कारादित्रितयं कलायाः सृष्टिः ॥५॥
उन्मादो जायते भाषागौरवाच्च,
लोञ्जाइनसो मन्यते, भावकेषु ॥६॥

विवृतिः

लोञ्जाइनसो निरूपयति हेतुपञ्चकम् उदात्तस्याविर्भावे काव्ये —यथा, श्रेष्ठकल्पनाः वा श्रेष्ठविचाराः वा; सहजबलशालिमनोरागाः (Inspired vehement passion); अलङ्कारयोगः; अभिजात-भाषा-नियोगः; एवम् समुत्कर्षमयी गौरवगर्भा संरचना। एतेषां हेतूनाम्, प्रथमौ द्वौ भवतः कवेरन्तरात्मनः औदार्यस्य प्रसूतिः यदा अन्ये त्रयो वर्तन्ते कलाया सृष्टिः। अर्थात्, एते संबद्धाः कवेः रचनानैपुण्येन, तस्य सम्यग्ज्ञानेन शब्दार्थप्रतिपत्तिरहस्यस्य। अत्रैव विवक्षामो यदिदं समग्रं हेतुपञ्चकं प्रकाश्यते कविहृदये अन्तर्मानसे वा प्रतिभायाः प्रस्फुरणेनैव यथोच्यते राजशेखरेण। लोञ्जाइनस-मते तु, "उन्मादः", अर्थात् आवेशमयी विस्मयानुभूतिः समुपजायते पाठकानां चित्तेषु, मुख्यतः, सुचयनितसमुत्कर्षमयभाषाप्रयोगेणैव। प्राह सः "ऑन दि सब्लाइम" इत्याख्ये तस्य प्रसिद्धे ग्रन्थे—"उदात्तम् वर्तते एकस्यां निश्चितश्रेष्ठतायां निर्दुष्टभाषायाः; एवमनेनैव कारणेन सर्वश्रेष्ठाः कवयः गद्यलेखकाश्च प्राप्तवन्तः अतिशयमहत्त्वम्, शाश्वतिक-प्रसिद्धिञ्च।" अग्रे भण्यते तेन—"कोऽपि समग्रः ग्रन्थः, यत्र अस्ति केवलमुद्भावनाचातुरी तथा परिश्रमजन्यप्रतिपादनम्, नो प्रभवति उद्दीपयितुं तद्विषयम्। परन्तु, 'सब्लाइमम्' उद्गच्छति, निर्वहणकाले एवम् विदारयति सर्ववस्तुजातम् वज्राशनिरिव अथ च समुन्मीलयति प्रणेतुः सर्वशक्तिम् एकस्मिन् प्रस्फुरणे।"

लोञ्जाइनसः विश्वसिति यत्काव्यस्य प्रभावोऽस्ति प्रापणीयः न तर्कणया, अपितु सहजानुभूत्याऽथवा अन्तस्दीप्ति-स्फुरणेन यत्र कल्पना किंवा विभावनैव सिध्यति भावकस्य सहायिका। प्रभावोऽयं

भावकमानसेऽस्ति तात्कालिकः नेत्रयोः क्षणप्रभायाः प्रस्फुरणस्य इव। स्पष्टयितुकामा वयं यत् लोञ्जाइनसः अवधारयति विश्वासमिमं यत् काव्ये समुपलब्धं सौन्दर्यगौरवम्, अर्थात् 'उदात्तम्' समाह्वयति अतिशयसंयमं, सातिशयशिल्पाभ्यासं प्रतिफलनहेतोः। प्रतिभायाः पारमार्थिकीम् "अनवधानताम्" स्वीकुर्वाणोऽपि, स नो क्षमणतत्परः महाकवीनामपि रचनात्मकप्रमादस्य। अनेनैव, सः अन्विष्टवान् बह्वीः च्युतीः होमरप्रमुखकवितल्लजानां रचनासु या भर्त्सिताः तेन।

लोञ्जाइनसस्य स्थितिः वर्तते परमार्थतः इयम्—तेन युज्यते वरीयता, अन्तिमविश्लेषणे, सम्यक्-समन्वयेन कवेः अन्तःस्फुरित-भावविचाराणां तथा च रचनाकलानैपुण्यस्य मध्ये, तथापि, स विश्वसिति यत् तस्य प्रकाम्यः प्रहर्षको भावावेशः, दैवीप्रतिभयोत्पाद्यः प्रवहति सवेगम् पदावल्याम् याऽस्ति अनुप्राणिताऽन्तरेण— "Phrases that are inspired।" सः निनिन्द प्रसिद्धकविहोमरः तस्य कर्तृत्वाय 'ओडिसी' इत्याख्य उत्तरकाव्ये। तस्यानुसारेण 'इलियड' इत्याख्या प्राथमिकी रचना होमरस्य सिध्यति महत्त्वपूर्णा तस्य नाटकीयगाढतया, तस्य वेगमयतया, तस्य यथार्थबिम्बरचनया, अथ च तस्य राशीकरणेन पिण्डीकरणेन वा मनोरागाणामुर्पा मनोरागाणाम्। 'ओडिसी' इत्युत्तरकाव्यं प्रदर्शयति होमरस्य वार्धक्यं विशेष्यमाणं मनोरागाणामुपक्षयेण यदा सः निवघ्नाति नीरस-वस्तु-परकचित्राणि जीवनस्य लोकव्यवहारस्य च। लोञ्जाइनसो विगण्यते प्रथमो "रोमाण्टिकः" समीक्षकः यूरोपीय-काव्यालोचनजगतिः उररीकरोति तदपि प्राच्यानां शिल्पानुशासनम्।

कारिका : **उदात्तमस्ति चारुतायाः मौलिः,**
ललितचारुसुन्दरभव्योत्कर्षः,
समुद्भवति कविबोधस्य व्यक्तौ,
वर्णनवैदग्ध्यशिल्पक्षयेण हि ॥७॥

विवृतिः

'उदात्तम्' सुविगणेयं चारुताया एव सर्वोत्कृष्टस्वरूपम्' इ प्रसिद्ध आङ्गलसमीक्षकः ब्रैडले इति नामकः प्रतिपादयति 'ऑक्सफ

लेक्चर्स ऑन पोयट्री' इति ग्रन्थे। प्रस्तूयते तेन एकाऽधिरोहिणी चारुतायाः यस्या उच्चतमे सोपाने तिष्ठति 'उदात्तम्'। एतानि सोपानानि सन्ति आरोहक्रमे—"प्रेटी", "ग्रेसफुल", "ब्यूटीफुल", "ग्रैण्ड" तथा च "सब्लाइम" इति। संस्कृते तानि शक्यन्ते अभिधातुम् क्रमशः—"ललितं", "चारु" "सुन्दरं", "भव्यं" तथा "उदात्तम्" इति। सब्लाइममस्ति 'उदात्तम्'। 'चरति चित्ते, चर्+ञुण, इति 'चारु'। अनया व्युत्पत्त्या, चारुत्वस्य मुख्यो धर्मः भवेत्तस्य योग्यता चरितुं प्रमातुः चित्ते। इदानीम्, विवेच्यमाननिःश्रयण्याम् आललितात् उदात्तपर्यन्तम्, चित्तचरणस्य क्षमता विद्यते भिन्नभिन्नवर्गेषु चारुतायाः क्रमशो वर्धमाने परिमाणे। स्तनन्धयशिशोः आकृतिः ललिता, किशोरस्याकृतिः चारुः लब्धयौवनव्यक्तेः आकृतिः सुन्दरा; स्वस्थशान्तचेतसः पुरुषस्य आकृतिः भव्या एवम् स्थितप्रज्ञविरक्तसंन्यासिनः आकृतिः उदात्ता—इति प्रकारेण, चारुतायाः विभाजनम् इदं ग्राह्यम् अस्माकं धिषणया।

परम्, काव्ये चारुतास्वरूपं वर्णनानिर्भरम् अर्थात्, प्राकाश्यतः ललितवस्तु समर्हति अधिगन्तुम् आयामं चारुतायाः सुन्दरतायाः वा यद्यपि विभावस्य स्वरूपम् प्रभावयति कवेर्वर्णनम्। तथापि, वर्णनकौशलं प्रतिभादीप्तिदीप्तं प्रभवति उत्थापयितुं कमपि विभावम् उच्चतरोच्चतमसोपानपर्यन्तम्। अत्र विषये भक्तप्रवरहिन्दीकविसूरदासेन निबद्धानि बालकृष्णस्य रूपचित्राणि निभालनीयानि। चित्रमेकं प्रदीयते अधस्तात्—

"देखौ, माई, सुन्दरता कौ सागर।
बुधि-बिबेक-बल पार न पावत, मगन होत मन-नागर॥
तन अति स्याम अगाध अंबुनिधि, कटि-पट पीत तरंग।
चितवत चलत अधिक रुचि उपजत, भँवर परति सब अंग॥
नैन मीन, मकराकृत कुंडल, भुज सरि सुभग भुजंग।
मुक्तामाल मिलीं मानौ ह्वै, सुरसरि एकै संग॥

कनक-खचित मनिमय आभूषण, मुख स्रमकन सुख देत।
जनु जलनिधि मधि प्रगट कियौ ससि, श्री अरु सुधा समेत॥
देखि सरूप सकल गोपीजन, रही बिचारि बिचारि।
तदपि सूर तरि सकीं न सोभा, रहीं प्रेम पचि हारि॥"

अत्र स्वल्पायामो विभावः एकः चित्र्यते भक्तकविना एवंविधिना संयोज्य तस्य प्रतिमाप्रभवशिल्पम्, येन बालकृष्णस्य रूपसम्पत् प्राप्नोति 'उदात्तस्य' आयामम्। स्मरणीयोऽयमत्र यत् 'उदात्तम्' विस्मापयति, प्रह्लादयति चमत्करोति एवम् उन्नमयति प्रमातृ चेतःतलेषु यत्र सः विस्मरति जीवनस्य क्षुद्रवृत्ति-चिन्तनम्। सूरदासस्य रूपचित्राणि प्रायशः भजन्ते गौरवमुदात्तस्य।

उल्लेख्योऽत्र यत् सुरतप्रसङ्गा अपि वर्ण्यन्ते सूरदासेन एवंविधिना येन सहृदया भावकाः, अननुभवन्तः स्थूलस्य विप्रियङ्करं गन्धं यः विकर्षति सचेतसां चित्तम्,—भूरिशः चमत्कृता भवन्ति।

इयं स्थितिर्नो विद्यते कालिदासस्य सम्भोगचित्रणे 'कुमारसम्भवे' तु। तदापि, विवक्षामो यत् कवेः विभावनम्, विषयग्रहणम् उपरञ्जयति तस्य शिल्पमपि यत् विरचयति तस्य चित्राणि, बिम्बानि।

उपरिनिरूपितानि चारुतायाः रूपाणि शक्यन्ते प्रदर्शयितुं नाटककारकालिदासे च काव्यकारकालिदासे चापि।

'शाकुन्तले' सप्तमाङ्के, दुष्यन्तस्य विस्मयाभिभूतंकथनं, संदृश्य सिंहशावकं कर्षन्तं बालकम्—"आलक्ष्यदन्तमुकुलानि" प्रभृति-श्लोके —यस्मिन् ईषल्लासितमुकुलस्पर्धिदन्तपङ्क्तप्रभृति अङ्गानि बालसुलभ-व्यवहारश्च तम् आकर्षन्ति, प्रस्तौति दृष्टान्तं ललितस्य। तत्रैव, प्रथमाङ्के, दुष्यन्तस्योद्गारः, "शुद्धान्तदुर्लभमिदं" इत्यादि यत्र तस्याकलने वनलता-रूपाश्रमवासि-कन्याः पराजयन्ते राजहर्म्यवास्तव्य-शृङ्गारगुम्फितललनाः तासाम् सहजसौन्दर्येण, प्रस्तौति उदाहरणं 'चारुतायाः'। "अनाघ्रातं पुष्पम्" इत्यादि श्लोकः प्रयच्छति उदाहरणं 'सुन्दरस्य'। "न जाने भोक्तारम्" इत्यादि कथनं यदि न भवेत्तत्र, तर्हि चित्रमिदमर्हति ग्रहीतुं स्वरूपमुदात्तस्य। विवक्षा-

यत् व्यक्तिगत-गृध्योल्लेखः अपकर्षति 'उदात्तम्' । "अस्याः सर्गविधौ प्रजापतिरभूच्चन्द्रो नु कान्तिप्रदः" इत्यादि रूपकीर्तनम् उर्वश्याः 'विक्रमोर्वशीये' उपगच्छति समीपमुदात्तस्य। तथापि, विवक्षामो यत् उपबृंहित-संश्लिष्ट-सावेश-वर्णनमेव प्रायशो जनयति 'उदात्तम्'। सीमितपदयोजनया, संक्षिप्त-परिमाणे, तस्याभिव्यक्तिः सिध्यति विषमा, सामान्यतः।

"अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः" इत्यादि उपकीर्त्तनम्, 'कुमारसम्भवस्य' प्रारम्भे, पर्वतराजहिमालयस्य गौरवस्य प्रस्तौति दृष्टान्तं "भव्यस्य"। 'मेघदूतस्य' वर्णनसाकल्यं भवति अविकलोदाहरणम् मनोहारि-सुन्दरस्य। अस्मन्मते तु, अव्याहतस्योदात्तस्य निरूपणं नोपलभ्यते महाकविकालिदासस्य सौन्दर्य-चित्रेषु। किन्तु, नाटककारकालिदासे मनोरमणीय-स्वरूपमुदात्तस्य प्राप्तव्यं, सहृदयानां कृते, 'शाकुन्तले' कतिपय-वस्तुप्रतिपादने। दुष्यन्त-शकुन्तलयोः पुर्नमिलनं प्रक्षालित-कल्मषदम्पतीरूपेण, अपमानमनस्तापप्रज्वालायाम् दीर्घकालपर्यन्तम प्रदीपनोर्ध्वम्, सिध्यति मनोग्राहिनिरूपणम् 'उदात्तस्य' यतो हि सहृदयाः सहजमतिक्राम्यन्ति भावनायाः समुच्छ्रिततलान्, पश्यन्तः समुदारां चरमपरिणतिं रूपस्य मांसलस्याकर्षणस्य। प्रसिद्धमनीषि-गेटेमहाभागस्य बहुप्रथितोद्गारः प्रमाणयति अस्माकं निवेदनमिह-विषये। भवभूतेः करुणरसनिबन्धनम् 'उत्तररामचरिते'ऽपि समुपस्थापयति दृष्टान्तम् 'उदात्तस्य'। तत्रोपन्यस्तः करुणरसः (न तु करुण-विप्रलम्भः यथा मन्यते कतिपयैः) निश्चप्रचमेव समश्नुते गौरवम् उदातस्य। तथापि, अन्ततोगत्वा विवक्षामः यत् संस्कृतकाव्ये, सम्भवतः गद्यकवि-बाणं विहाय, उदात्तम्' नो प्रापणीयम् बहुधा यतो हि राजाश्रयभोगिनां सूरीणाम् मानसिकता ववृते अनुकूला एवंविध-चित्रणानाम्।

परन्तु लोन्जाइनसनिरूपितम् 'उदात्तम्' दरीदृश्यते आदिकाव्ये रामायणे। रामस्य वनगमनम्, सुमन्त्रस्य पश्चात्तापः, दशरथस्य

निपातः, कौशल्यायाः क्रन्दनम्, तारायाः विलापः, रामस्याश्रुपातः लक्ष्मणमूर्च्छायाम्, मन्दोदर्याः विलापः इत्यादीनि स्थलानि पूरयन्ति दृष्टान्तान् कारुण्यगर्भस्योदात्तस्य । कतिपयोदाहरणानि प्रदीयन्ते अध तात्—

"जानकी तु महाराज निःश्वसन्ती तपस्विनी ।
भूतोपहतचित्तेव विष्ठिता विस्मिता स्थिता ॥
अदृष्टपूर्वव्यसना राजपुत्री यशस्विनी ।
तेन दुःखेन रुदती नैव मां किञ्चिदब्रवीत् ॥
उद्वीक्षमाणा भर्तारं मुखेन परिशुष्यता ।
मुमोच सहसा वाष्पं प्रयान्तमुपवीक्ष्य सा ॥
तथैव रामोऽश्रुमुखः कृताञ्जलिः
स्थितोऽब्रवील्लक्ष्मणबाहुपालिताः ।
तथैव सीता रुदती तपस्विनी
निरीक्षते राजरथं तथैव माम् ॥

—अत्र वनान्निवर्तनानन्तरम्, सुमन्त्रः श्लोकयति सीतारामादि-व्यवहारम् । समग्रदृश्यं प्रभावयति पाठकम् भूरिशः, समानयति लोकातीततलेषु ।

रावणस्य रूपवर्णनमपि समश्नुते शीलम् 'उदात्तस्य'—

"महार्हक्षौमसंवीतं रक्तचन्दनरूषितम् ।
स्वनुलिप्तं विचित्राभिर्विविधाभिश्च भक्तिभिः ॥
विचित्रं दर्शनीयैश्च रक्ताक्षैर्भीमदर्शनैः ।
दीप्ततीक्ष्णमहादंष्ट्रं प्रलम्बं दशनच्छदैः ॥
शिरोभिर्दशभिर्वीरो भ्राजमानं महौजसम् ।
नानाव्यालसमाकीर्णः शिखरैरिव मन्दरम् ॥
नीलाञ्जनचयप्रख्यं हारेणोरसि राजता ।
पूर्णचन्द्राभवक्त्रेण सबालार्कमिवाम्बुदम् ॥
बाहुभिर्बद्धकेयूरैश्चन्दनोत्तमरूषितैः ।
भ्राजमानाङ्गदैर्भीमैः पञ्चशीर्षैरिवोरगैः ।

—सिंहासनस्थ-रावणस्य रूपमिदं कियन्न मनोहारि, कियद्भयङ्करोऽपि एककाले ! तस्य विस्मयोत्पादकं रूपं संदृश्य हनूमान् "विस्मयं परमं गत्वा रक्षोधिपमवैक्षत" एवम् तर्कयति मनसि—

"अहो रूपमहो धैर्यमहो सत्त्वमहो द्युतिः ।
अहो राक्षसराजस्य सर्वलक्षणयुक्तता ॥

—'अहो' इतिपदस्य पौनःपुन्येन कथनम् अभिव्यनक्ति कपेः विस्मयं, कुतूहलं, आश्चर्यमेवं संभ्रमम् यौगपद्येन । इयं भावशवलता उपगच्छति 'उदात्तम्', गृह्णाति 'उदात्तस्य' लोकातिक्रान्तम् आयामम् ।

अरण्यकाण्डस्य त्रयोविंशतितमे सर्गे, खरस्य मार्गे समागतानाम् अपशकुनानाम् उपवर्णनम् अतिशयम् आतङ्कोत्पादकम् अथ च गृह्णाति शोलम् 'उदात्तस्य'! एवमेव सीतायाः विरहे सन्तप्तरामस्य क्रोधाविष्टत्वोपकीर्तनम् निभालनीयम्—

"ममास्त्रबाणैः सम्पूर्णमाकाशमपि लक्ष्मण ।
असम्पातं करिष्यामि ह्यत्र त्रैलोक्यचारिणम् ॥
संनिरुद्धग्रहगणमावारितनिशाकरम् ।
विप्रणष्टानलमरुद्भास्करद्युति-संवृतम् ॥
विनिर्मथितशैलाग्रं शुष्यमाणजलाशयम् ।
ध्वस्तद्रुमलतागुल्मं विप्रणाशित-सागरम् ॥
त्रैलोक्यं तु करिष्यामि संयुक्तं कालकर्मणा ॥"

—रामचन्द्रस्य नरशार्दूलस्य क्रोधोऽयम्, प्रस्फुरितवीर्यभावावेगः, समर्हति जनयितुम् आतङ्कम् संवेदनशीलेषु भावकेषु । पर्वतानां शृङ्गाणां विखण्डनम्, देवराक्षसपिशाचादीनां लोकानां शकलीकृत-पातनम्, सागरस्य उच्छोषणम्, ग्रहाणां गतेरवरोधनम्—सर्वमिदं सिध्यति भृशलोमहर्षकम् अभिव्यञ्जनम् सात्त्विकस्य क्रोधस्य । रामस्य क्रोधोऽयं व्याप्नोति सकलं विश्वम्, संविहाय व्यक्तिवस्तु-विशेषम् एवम् समाश्लेषयति भावकान् तस्मिन् लोकातीतप्रभावे । सुतराम्, उदात्तमवतरति अत्र ।

एकमपरं पटलमुदात्तस्य उपलब्धं आदिकाव्ये अपेक्षते उद्धरणम् । लङ्कादहनस्य भयोत्पादक-दृश्यस्य प्रत्यक्षीकरणमध्ये, महाकविना

प्राप्तानि मनोभिरामाणि ईषद्दर्शनानि । किंशुकप्रसूनानां सौन्दर्यमपि दृश्यते तेन प्रलयङ्करस्वर्णशुक्लस्य ज्वालासमुदायस्य मध्ये। अग्निशिखाः दृश्यन्ते कुत्रापि शाल्मलीपुष्पमिव; कुत्रापि कुङ्कुमदीप्तिरिव। समग्रां लङ्कानगरीम् आवेष्टयन् तस्य ज्वालाप्रकरे सः प्रचण्डाग्निः प्रज्वलति कोटिसाहस्ररश्मय इव। शब्दैरनेकैः जनितैः भवनानां पर्वतानां च विस्फोटैः, पराजितोऽशनिः अपि। तदानीम्, सः विपुलमहाग्निः प्रकाशते भिन्दन् ब्रह्माण्डमिव। अम्बरपृथिव्यौ व्याप्यमानस्य रोहिताश्वस्य प्रभा प्रतिभाति अतीवरूक्षा। तस्य शिखाः दृश्यन्ते रक्ताभावेष्टिताः किंशुकप्रसूनमिव। गगने प्रसृतधूमराजयः, विच्छिन्नाः पृथिव्याः संसर्गेण, प्रभासन्ते नीलोत्पलस्य प्रभां धारयन्त्य इव निभालयन्तु अधस्तात्—

"आदित्यकोटीसदृशः सुतेजा, लङ्कां समस्तां परिवार्य तिष्ठन्।
शब्दैरनैकैरशनि-प्ररूढैर्भिन्दन्निवाण्डं प्रबभौ महाग्निः॥
तत्राम्बरादग्निरतिप्रवृद्धः, रूक्षप्रभः किंशुकपुष्पचूडः।
निर्वाणधूमाकुलराजयश्च, नीलोत्पलाभा प्रचकाशिरेऽभ्राः॥"

—दर्शनीयमत्र वाल्मीकेः काव्यचेतनायाः गौरवम् या मिश्रयति लङ्कादहनविकरालताम् किंशुकनीलसुमनानां मनोहारिशोभया। "निर्वाणधूमाकुलराजयः" इति पदे धूमपङ्क्तीनां निर्वाणमुच्यते। अनेन अभिप्रेतम् तासाम् विच्छिन्नत्वम् धरित्र्याः। कवेः सूक्ष्मावलोकनम् श्लाघनीयम्। इदानीम्, प्रस्तुतकीर्तनं समर्हति विमष्टुम् समग्रत्वेन। आदित्यकोटीसदृशहिरण्यरेतसः विध्वंसलीला विभावयति भावकेभ्यः शिवस्य ताण्डवनृत्यम् यस्य मध्ये-मध्ये पुष्पाणां सुकुमारकान्तिः प्रतिभाति लासस्य छविरिव। अत्र 'उदात्तस्य' भयोत्पादकं स्वरूपं, मिश्रितम् मनोहारित्वेन, अभिलक्ष्यते पाठकानां प्रमोदाय, विस्मयाय च। सामान्यदृष्ट्या किंशुकप्रसूनशिखायाः दर्शनं, मध्ये विनाशलीलायाः, प्रतिभाति अनौचित्यपूर्णम्। किन्तु, आदिकवेः अलौकिके दर्शने, इदमापातिकानौचित्यम् गृह्णाति अपूर्वां शोभाम् अपूर्वं मनोहारित्वम् सहृदयानां कृते। चित्रणमिदं प्रदर्शयति

लोकातोतसाहसं कविप्रतिभाया:, कविविभावनविषयग्रहणस्य। उल्लेखनीयोऽयमत्र यत् उदात्तमिदमपि, अर्थात्, 'उदात्तम्' संलग्नं अप्रीतिकरबिम्बैरपि सिध्यति, चरमविश्लेषणे, सौन्दर्यमेव यतो हि तदपि समाकर्षति, प्रमातारम्—समाकर्षणमस्ति सौन्दर्यस्य प्रधान-लक्ष्म। तदपि, सामान्यमनोगोचरसौन्दर्यचित्रणेन उद्भूतम् 'उदात्तम्' समधिकं, सहजतरं, सुग्राह्यम्। उदाहरणत:, सूरदासस्य रासवर्णनं, यत्र प्रत्येकं गोपकन्यकया, प्रत्येकं गोपबध्वा सार्धम् एक: कृष्ण: नृत्यरतो दृश्यते, भजते शीलम् 'उदात्तस्य', 'मधुरोदात्तस्य'। परन्तु मिश्रणं भयानकस्य च सुन्दरस्य च, यत् जनयेत् 'उदात्तस्य', शीलं कठिनं लभ्यम्। विदाङ्कुर्वन्तु सुविज्ञपाठका: अत्रप्रसङ्गे यत् 'उदात्तम्' नो भ्रान्तयितव्यम् केवलं स्थूलबुद्धिगोचरेण सौन्दर्येण हि।

स्मारयामो यत् प्रत्येकं भावस्य, प्रत्येकं वस्तुन: चित्रणम्—शक्नोति अधिगन्तुम् आयामम् उदात्तस्य सफलसिद्धसरस्वतीककवे: पाणिस्पर्शेन यतो हि 'सब्लाइम'-नामधेयम् 'उदात्तम्' विशेष्यते, समवतरति च, सातिशयवर्णनेन, समर्थेण उन्नमयितुं भावकचित्तवृत्तिम् लोकसामान्याधिषणोर्ध्वम्। इहप्रसङ्गे शेक्सपियरस्य प्रसिद्धत्रासद्य: समाह्वयन्ति चर्चनम्। तासां प्रतिपाद्यवस्तूनि नो प्रह्लादयन्ति सामान्यपाठकवर्गम्। पुनश्च, नाधिगच्छामो वयं किमपि जीवन-दर्शनं किंवा किमपि जिजीविषोद्दीपकं तत्त्वं तासामनुशीलनेन। तदपि 'उदात्तम्' अधिगन्तव्यम् तत्र यतो हि भावका: वर्तन्ते उपनीता, लोकातोतधरातले तासामध्ययनात् अथ च भवन्ति विस्मयान्विता:, चमत्कृता: मनुष्यस्य आन्तरप्रेरणाबलस्य अलोकसामान्यपरिणत्या। तस्मात्, इमा: त्रासद्य: प्रस्तुवन्ति 'उदात्तम्' यत् आस्ते श्लाघ्यमाणं पाश्चात्यसाहित्यसमीक्षकप्रवरै: अद्यावधि।

(ग)

कारिका :

उदात्तमधिगम्यते विश्वकाव्ये,
खलु नानारूपेषु कथ्यानुरूपम्।
अश्नच्छीलं चमत्कारजननस्य,
विह्वलयच्चित्तं पाठकानां विपुलम् ॥८॥

विवृतिः

उपरिगतसन्दर्भेषु प्रदर्शितानि अस्माभिः नानारूपाणि 'उदात्तस्य' यथा—'सौन्दर्योदात्तम्', 'मधुरोदात्तम्', 'भयङ्करोदात्तम्', 'त्रासदोदात्तम्'। स्मरणीयोऽत्र यत् उदात्तमस्ति एकः सूक्ष्मः अपरिभाषेयः पदार्थः उपलभ्यमानः काव्येषु च नाट्येषु च, उत्पाद्यः मुख्यतः वर्णनेन, किन्तु, कविनभ्यविषयग्रहण-माहात्म्य-प्रणोदितेन प्रत्येकं दशायाम्, यो जनयति विस्मयं, विस्मरणं, चमत्कारम्, आवेशम् विह्वलनम् भावकानां चेतस्सु।

(घ)

'उदात्तम्' समश्नुते प्रायेण अस्माकं 'रसदशाम्'। स्थायिभावस्य साधारणीकरणबलेन सामान्यीकृतस्य निर्विघ्नप्रतीतिः, "सत्त्वोद्रेकप्रकाशानन्दमयसंविद्विश्रान्ति"-मयी, अभिधीयते 'रसः'। उदात्तानुभूतिरपि संविद्विश्रान्तिगर्भा चरमविश्लेषणे। लोञ्जाइनसो मन्यते अन्तःप्रकाशम् ("इल्लूमिनेशन") आविर्भूतम् 'उदात्तस्य' साक्षात्कारे। 'आनन्दं', गण्यमानं समुपलब्धं काव्यानुशीलनात्, अर्थवाद एव अस्मन्मते। तदपि, अभिनवगुप्तस्य ''सर्वेषामनादिवासनाचित्रीकृतचेतसा वासनासंवादात्। सा चाविघ्ना संवित् चमत्कारः।" इति निरूपणम् रसानुभवस्य तथा च "भोगावेशः" निर्वचनं रसानुभूतेः 'अभिनवभारत्याम्' संवदति इत्यपि उदात्तस्य प्रतिपादनेन लोञ्जाइनसेन।

अन्ते, वदामो यत् लोञ्जाइनसाभिप्रेतम् 'उदात्तम्' उद्भवति प्रारम्भे कथितपञ्चहेतूनां सुष्ठुसंयोगेनैव यत्र "अर्थस्य" औन्नत्यम् अपि समपेक्षते अभिव्यञ्जनं प्रभावशालिवर्णनरीत्या हि उत्पादयितुम् 'उदात्तम्'। रसोऽपि, ध्वनिरपि वर्णनाधीनौ, अन्ततोगत्वा। एवम्, प्राच्याचार्याणाम् प्रणिधानं लोकातिशयवर्णने, उदात्तम्' इत्यलङ्कारनिरूपणे, रेखाङ्कयति 'सब्लाइम'स्य घटकमेकं महत्त्वपूर्णम्।

॥ इतिशम् ॥

★

देववाणी-परिषद्वार्ता

(१) १ -२-१९८८ ई० तारिकायां नवदिल्यां ६ वाणी-विहारे देववाणी-परिषत्पक्षतः 'शारदा'-काराणां पं० वसन्त अनन्त गाडगील - महाभागानां अभिनन्दनमभूत् । परिषन्महासचिवो डा० रमाकान्तशुक्लः श्रीगाडगील-महाभागेभ्य उत्तरीयं सम्मानपत्रं च समर्पयंस्तेषां निर्भीकसंस्कृतपत्रकारितां संस्कृतजगतोऽनितरसाधारणीं विशेषतामाह ।

अस्मिन्नवसरे पं० गाडगीलमहाभागैः 'संस्कृत-पत्रिकाः' अवलम्ब्य सारगर्भितं भाषणमकारि । तैः सूचितं यत् सर्वप्रथम संस्कृतपत्रिका १२० वर्षाणि पूर्वं प्रकाशिता बभूव । तत आरभ्य अद्यावधि नियतकालिकाः संस्कृत-पत्रिकाः प्रवर्तन्ते । तैरिदमपि सूचितं यत् २४-३-१९८८ तारिकायां नेपालदेशे संस्कृतसम्मेलने तैः 'शारदा' पत्रिकाया विशेषाङ्कः प्रकाशयिष्यते ।

संस्कृत-जगद्वार्ता

(१) १८—२१-१-१९८८ तारिकासु सागरनगरे डा० हरिसिंह गौर विश्वविद्यालयस्य संस्कृतविभागेन विश्वविद्यालयानुदानायोगसाहाय्येन 'राष्ट्रैकात्म्यार्थं संस्कृतस्य योगदानम्' इति विषयमवलम्ब्य चतुर्दिवसीया विचारगोष्ठी समायोजिता यत्र पञ्चचत्वारिंशत्प्राया विद्वांसः सहभागित्वं निरवहन् ।

(२) १९-१-१९८८ तारिकायां सागरनगरे डा० हरिसिंह गौर विश्व-विद्यालयस्य सांस्कृतिककेन्द्रे संस्कृतविभागेन एका संस्कृतकविगोष्ठी समायोज्यत यत्र एकादशकविभिः स्वरचनाः प्रस्तुताः ।

पं० वसन्त अनन्त गाडगीलेन 'श्रृणुत रे भारतस्य पुत्राः' इत्युद्‌बोधनात्मकं गीतं, डा० महाराजदीनपाण्डेयेन मुक्तकानि, डा० रहसबिहारीद्विवेदिना 'पदस्थितप्रज्ञोपनिषद्' 'न भारतं वितीर्यताम्' इति च कृतिद्वयम्, डा० केदार नारायणजोशिना नवीनशिक्षापद्धतिमवलम्ब्य व्यङ्ग्यात्मिका रचना, डा० राधावल्लभत्रिपाठिना 'धरित्रीदर्शनं' नाम सद्यःप्रणीतं काव्यं, 'ज्ञानोपाह्व'-डा० बच्चूलालावस्थिना 'वसन्त'मधिकृत्य रचनाः, डा० भवानीशंकरत्रिवेदिना च शिखरिण्यां शिवस्य वररूपवर्णनं प्रस्तूय श्रोतारः प्रसादिताः ।

गोष्ठ्याः सञ्चालकेन डा० भास्कराचार्य त्रिपाठिना 'मृत्कूटः' इतिशीर्षक-युतं दीर्घकाव्यं श्रावितम् यत्र आजन्मनो मृत्युपर्यन्तं जीवयात्रा तेन वर्णिता । गोष्ठ्या अध्यक्षेण डा० रमाकान्त शुक्लेन 'रौति ते भारतम्' 'क्रूरहृदय मेघ !' इति रचनाद्वयं प्रस्तुतम् ।

(३) २९—३०-१-१९८८ तारिकयो. दिल्ल्यां श्रीविश्वनाथ-संस्कृतमहाविद्यालये 'किं राजनीतौ धर्मनिरपेक्षता उचिता ?' — इति विषयमवलम्ब्य वाद-विवादप्रतियोगिता 'जननी जन्मभूमिश्च स्वर्गादपि गरीयसी' इति विषयमवलम्ब्य च भाषणप्रतियोगिता आयोजिते।

(४) ७-२-१९८८ ई० तारिकायां मैनपुर्यां सुरभारतीसेवासंस्थानेन श्रीएकरसानन्दसंस्कृतमहाविद्यालयप्राङ्गणे सारस्वत-समारोहः सम्मानितः। अस्मिन्नवसरे डा० सी०आर० स्वामिनाथमहाभागानां मुख्यातिथित्वे विद्वदभिनन्दनं संवृत्तम्। पं० वेणीमाधवद्विवेदिस्मारक-व्याख्यानमालायास्तृतीयपुष्पस्वरूपं डा० रमाकान्त शुक्लस्य भाषणं जातम्। डा० कृष्णकान्तशुक्लमहाभागानामाध्यक्ष्ये डा० शम्भुनाथ आचार्यमहाभागानां सञ्चालकत्वे च संस्कृत-कविसम्मेलनं सम्पन्नम्। संस्थानस्य महासचिवेन डा० इच्छारामद्विवेदिमहाभागेन प्रगतिविवरणमुपन्यस्तम्। संरक्षकैः आचार्यश्रीलालविहारीद्विवेदिमहाभागैर्विदुषां स्वागतं कृतम्। संस्थानाध्यक्षैः श्री सन्तोषनारायणमिश्रमहाभागैः संस्कृतस्य प्रचारप्रसारार्थं सततप्रयत्नानामावश्यकता रेखाङ्किता।

(५) १२-२-१९८८ ई० तारिकायाम् आकाशवाण्याः दिल्ली-केन्द्रात् 'शारदा'-सम्पादकानां पं० वसन्त अनन्त गाडगील-महाभागां साक्षात्कारवार्ता प्रसारिता जाता यत्र तैः संस्कृतस्य सावधिकपत्राणां विषये पं० गंगानाथचतुर्वेद महाभागैः साकं चर्चा कृता।

(६) १७-२-१९८८ तारिकायां कानपुरे आचार्यनरेन्द्रदेव महिलामहाविद्यालयेन स्वरजतजयन्ती-समारोहावसरे 'साहित्यिक सन्ध्या' आयोजिता यत्र नैकैः कविभिः सस्कृत-हिन्दी-उर्दू-आंग्लभाषासु कविताः प्रस्तुताः। डा० रेवाप्रसाद-द्विवेदी, डा० रमाकान्त शुक्लः डा० कैलासपति त्रिपाठी च संस्कृतकविताः प्रस्तुतवन्तः। आयोजनस्योद्घादनं सांसदः श्री नरेशचन्द्र चतुर्वेदमहाभागः अकरोत्। सञ्चालनं डा० सुमनराजे-महाभागा कृतवती।

(७) २३-२-१९८८ तारिकायां दिल्ली-संस्कृतअकादम्या 'संस्कृतश्लोका-न्त्याक्षरी' आयोजिता।

(८) ८-३-१९८८ दिनाङ्के श्रीरणवीरकेन्द्रीयसंस्कृतविद्यापीठस्य नवमो दीक्षान्तसमारोहः डा० कर्णसिंहमहोदयानामाध्यक्षे सुसम्पन्नतामभजत्। मुख्यातिथित्वेन जम्मूविश्वविद्यालस्योपकुलपतयो डा० मुकुन्दलाल लखनपाल-महाशयाः विशिष्टातिथित्वेन च जम्मूकश्मीरराज्यस्य स्वास्थ्यमन्त्रिणः श्रीराजेन्द्रसिंहचिबमहाशयाः आसन्। अवसरेऽस्मिन् नवदिल्लीस्थराष्ट्रिय-संस्कृतसंस्थानस्य निदेशकाः डा० मण्डनमिश्रवर्याः स्नातकेभ्य उपाधिवितरणमकुर्वन्।

विद्यापीठस्य प्राचार्याः डा० जगन्नाथपाठकवर्याः समेषां स्वागतं विधाय विद्यापीठस्य भवनाभावसमस्यां स्पष्टीचक्रुः । स्वास्थ्यमन्त्रिणः चिब्बमहाशयाः समुद्घोषयन् यद्विद्यापीठस्य भवनादिकृतेऽपेक्षितं साहाय्यं राज्यशासनं प्रदास्यतीति । अवसरेऽस्मिन डा० बलजिन्नाथपण्डितद्वारा सम्पादितः "नागार्जुनो" इति ग्रन्थः एवं च डा० उमारमणझा द्वारा अनूदितः तर्कप्रवेशः (पाश्चात्यतर्कशास्त्रग्रन्थः) इत्युभौ जम्मूविश्वविद्यालयस्य उपकुलपतिमहोदयैः समुन्मीलितौ । डा० प्रियतमचन्द्रशास्त्रिणां मार्गदर्शने विद्यापीठस्य छात्रैः छात्रीभिश्च नागानन्दनाटकस्य अभिनयो विहितः ।

(९) १६-३-१९८८ तारिकायां नवदिल्ल्यां फिक्कीसभागारे दिल्ली-संस्कृत-अकादम्या संस्कृतकविसम्मेलनमायोजितम् यत्र विंशतिप्रायाः कवयः स्व रचनाः प्रस्तुतवन्तः । सम्मेलनस्योद्घाटनं दिल्लीमुख्यकार्यकारिपार्षदःश्रीजगप्रयेशचन्द्रः, आध्यक्ष्यं श्रीकुलानन्द भारतीयः, सञ्चालनं च अकादमीसचिव कविरत्न-श्रीकृष्णसेमवालः अनुष्टितवान् । १-४-१९८८ तारिकायां दिल्लीदूरदर्शनतः अस्य सम्मेलनस्य केचन अंशाः प्रसारिता अभूवन् ।

(१०) १८-३-८८ तारिकायां बरेलीनगरे बरेलीकालेज-सभागारे संस्कृत-विभागस्य तत्त्वावधाने स्नातकोत्तरछात्रपरिषदो वार्षिकाधिवेशनं सम्पन्नम् । मुख्यातिथित्वं डा०रमाकान्तशुक्लेन आध्यक्ष्यं च कालेजप्राचार्येण डा० पशुपतिसिंहमहाभागेन निर्व्यूढम् । संस्कृतविभागाध्यक्षेण डा० कृष्णकान्त शुक्लमहाभागेन विदुषामभिनन्दनं कृतम् । अस्मिन्नवसरे मुख्यातिथेः काव्यपाठः छात्राणां मनोरञ्जककार्यक्रमाः, पुरस्कारवितरणं, प्राचार्यप्रबोधसन्देशश्चा-नुष्ठीयन्त ।

(११) २४—२७-३-१९८८ तारिकासु उज्जयिन्यां कालिदास-अकादेमी 'कल्पवल्ली' त्याख्यं चतुर्दिवसीयमनुष्ठानमायोजितवती ।

वेद-दर्शन-साहित्य-कलानां संहितारूपेण आयोजितायां 'कल्पवल्ली' तिगोष्ठ्यामस्यां विविधशाखानां वेदपाठः, 'भारतीयदर्शने कर्मवादः' इति 'समकालीन साहित्ये कर्मवादः' इति च विषयमवलम्ब्य विचारगोष्ठीचतुष्टयम्, कुमारीभ्याम् उमामहेश्वरी-विजयलक्ष्मीभ्यां पारम्परिकान्ध्रनाट्यशैल्यां कृतं साभिनयं नृत्यं पद्मश्रीकुमारगन्धर्वस्य शास्त्रीयं गायनं चेत्यादिकान्यनुष्ठानानि सम्पन्नानि ।

(१२) ९—११-४-१९८८ ई० तारिकासु लक्ष्मणपुर (लखनऊ)-नगरे अखिलभारतीय संस्कृतमहासम्मेलनस्य त्रिदिवसीयमायोजनं सम्पन्नम् यत्र संस्कृतस्य विविधाः समस्याः अधिकृत्य विचारविमर्शोऽभूत् ।

(रमा शुक्ला)

कथामृतम्*

(डॉ० प्रभाकर नारायण कवठेकरः, इन्दौरः)

संस्कृते कथालेखनम् यथारीत्या श्रीशुक्लमहोदयैरकारि तया तु बाल-साहित्यं समृद्धं भविष्यतीति मन्यामहे। संस्कृतसाहित्यस्य महती परम्परापि प्रयासेनानेन बलवती भविष्यतीति आशास्महे।

अपरञ्च संस्कृतकथानाम् सरलानुरूपेण राष्ट्रभाषायामपि अवतरणं सामान्यजनकृते संस्कृतबोधाय समीचीनमेव। कथामृतं पठित्वा मनसि चिन्तयामः यत् बालसाहित्यम् नोपेक्षणीयम्। यदि बाल्ये वयसि वयस्यैः सह सहपाठिनो विद्यार्थिनः कथानदीमुखेन संस्कृतिसंगमं प्रविशन्ति तर्हि निश्चित-मेव तेषां बुद्धिः प्रगल्भा भवति, अन्यैश्च सा समाद्रियते। नीतिरेव तद् रत्नम् यद् देशकालादिसीमामुल्लङ्घ्य मूल्यमहत्त्वम् स्थापयति। सर्वैरेव रत्नं समाद्रियते।

कथामृते सन्ति शिक्षाप्रदाः २५ कथाः। न केवलं राज्ञाम्, धनिनाम्, विदुषाम् देशसेवकानाञ्च कथाः अपितु पञ्च रोचकलोककथाः अपि वर्तन्ते। 'सत्यमेव जयते' कथायाम् वहुलाधेनुः, 'श्रमे लक्ष्मीः प्रतिष्टिता' कथायाम् कृषकपुत्राः, 'महत्त्वम् नैव नामनि' कथायाम् ग्रामवधूः राधा च सत्य-श्रम-गुणादिमहत्ताम् प्रतिपादयन्ति। रामभरत-कथायामपि पारिवारिकराष्ट्रियैकता सन्देश पठनीय एव—

तात एकः राज्यमेकम् भिन्नाः सन्ति च मातरः।
राज्यम् रक्ष्यम् मिलित्वा हि एकता शक्तिर्वर्धिनी॥

सुवर्णपुष्पां पृथिवीमिति कथायाम् पठामो वयम्—"पदमुक्तः सन् जनसेवां यथा सुचारुरूपतया संपादयति तथा पदारूढः सन् न" इति कृष्णस्य नीतिः आसीत्। यदा वयं सर्वे भोगवादप्रभावम् लोकजीवने राजनीतिक्षेत्रे च पश्यामः, तदा श्रीकृष्णस्य चरितवैशिष्ट्यम् अद्यापि लोकनीतिम् विशुद्धां कर्तुम् प्रभवति इति बालकानां कृते लेखकस्य आशयोऽपि प्रशंसनीयः एव। बुद्धमहावीरकथाद्वयमपि त्यागस्य अहिंसायाश्च महत्त्वम् संस्काररूपेणोत्पाद-यितुम् समर्थम्।

विंशशताब्द्या देशसेवकविभूतीनाम् तिलकगान्धि-विनोबा-नेहरू-लालबहादुरशास्त्रि-प्रभृतीनाम् प्रेरकचरितवर्णनमपि संस्कृतस्याधुनिकताम् जीवितभाषत्वञ्च प्रतिपादयति।

कथानामयम् संग्रहः संग्राह्यः। विद्यालयीयपाठ्यक्रमेष्वपि निर्धारण-योग्यः इति शुभाशंसनम्।

---

* लेखकः प्रकाशकश्च—श्रीगणपति शुक्लः, समता-सदनम् बड़वाह (म०प्र०) 451115 मूल्यम् १०.०० रु० 1987।

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१५-१-१९८७ तः)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्यय : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजोकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं 'अर्वाचीनसंस्कृतम्' (Arvacheensanskritam/*Arvācinasaṁskṛtam* इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)

'देववाणी-परिषद, दिल्ली'-कृते डा० रमाकान्तशुक्लेन देववाणी प्रिंटर्स उत्तम नगर, नयी दिल्ली-११००५९ इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१०/२)
प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५.४.१९८८

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१. भाति मोरीशसम् (डा० रमाकान्त शुक्लः) रु० ६.००
२. सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः) रु० २०.००
३. श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा०स्वामिनाथन्) रु० ४०.००
४. कूहा (काव्यम्) (डा० उमाकान्त शुक्लः) रु० २०.००
५. सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः) रु० १५.००
६. आभाणकमञ्जरी („ „) रु० १५.००
७. जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ३०.००
८. अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) („) रु० ३०.००
९. „ „ „ (द्वितीय खण्डः) („) रु० ४०.००
१०. राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः) रु० ४०.००
११. निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः) रु० २०.००
१२. अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः) रु० २०.००
१३. भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः) रु० ४०.००
१४. संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित) रु० १५०.००
१५. साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा० सुलेखचन्द्र शर्मा) रु० ५०.००
१६. अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० २०.००
१७. रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया) रु० ६०.००
१८. साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः) रु० ४०.००
१९. पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः) रु० २०.००
२०. स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी) रु० ३०.००
२१. रसदर्शनम् (डा० रमेशचन्द्र शुक्लः) रु० ५०.००
२२. श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः) रु० २०.००
२३. सुरभिकाश्मीरम् („) („) रु० २०.००
२४. पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः) रु० १०.००
२५. श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्) रु० १०.००
२६. पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः) रु० २०.००
२७. नियतिचक्रम् (ध्वनिनाटकम्) („ „) रु० २०.००
२८. श्रीगरुडध्वजसपादशतकम् (डा०रामकिशोर मिश्रः) रु० १२.००
२९. लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्) रु० २०.००
३०. अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल) रु० ४०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकपत्रम्)

दशमवर्षे तृतीयोऽङ्कः

१५ जुलाई, १९८८

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

विं० २०३३ स्थापनाब्द १९७६ ई०

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली-११० ०५९

शोकवृत्तम्

(१)

२८.४.१९८८ तारिकायां कुरुक्षेत्रे पं० स्थाणुदत्तशास्त्रिणो दिवंगताः। भारतराष्ट्रपतिपुरस्कृताः स्व० शास्त्रिपादाः मनोवाक्कर्मभिः संस्कृतप्रचारकाः, यज्ञकर्मविधाननिपुणाः वेदपाठविचक्षणाः, ऐतिह्यविदः, दैवज्ञशिरोमणयः रसकर्मविधानज्ञा आयुर्वेदपारंगताः, मातृकासंग्रहसंशोधनदक्षाः, सम्पादनविचक्षणाः, संस्कृतजगतोऽलंकारभूताश्चासन्। तैः स्वसन्ततिरपि निष्ठया संस्कृतमध्यापिता। स्व० शास्त्रिपादानां दिवंगमनेन संस्कृत-जगतोऽपूरणीया हानिः संवृत्ता।

(२)

उज्जयिनीस्थ-विक्रमविश्वविद्यालयसंस्कृतविभागाध्यक्षस्य, प्रसिद्धसंस्कृतकवेः किञ्च देववाणी-परिषदो वर्तमानाध्यक्षस्य आचार्यश्रीनिवासरथस्य धर्मपत्नी श्रीमती लीलारथ-महाभागा १.५.१९८८ तारिकायाम् (२०४५ तमे वैक्रमाब्दे वैशाखपूर्णिमायां) उज्जयिन्याम् अनवबोधिन्या निद्रया दिवं प्रययौ। अखण्डसौभाग्यशालिनी स्व० श्रीमती लीला औदार्यस्य प्रतिमूर्ति संस्कृतप्रचार-प्रसारार्पितसर्वस्वा, मानवीयगुणानां संघातस्थली चाभीत्। कालिदाससमारोह-कार्यक्रमेषु व्यापृतस्याचार्यश्रीनिवासरथमहोदयस्य सा शवितरासीत्। प्रयाग-विश्वविद्यालये कृताध्ययना सा नैकवर्षेभ्य उज्जयिन्यां प्राध्यापिकासीत्। पुत्ररत्नत्रयप्रसूः सा स्वजीवनस्यान्तिमं दिनं यावत् कर्तव्यं कर्म कुर्वाणा आसीत्।

(३)

३.८.१९८८ तारिकायां मथुरायां पं० रघुनाथप्रसादश्चतुर्वेद ऐहिकयात्रामुपसंहृतवान्।

स्वर्गीयश्चतुर्वेदमहोदयः षोडशसहस्रप्रायसंस्कृतश्लोकानां कर्ता आसीत्। तत्प्रणीतेषु प्रकाशितेषु ग्रन्थेषु 'गान्धिगरिमकाव्यम्', 'जवाहरज्योतिः', 'श्रीमदाचार्यवल्लभ-तच्छिष्य-सूरशतकम्', 'आदिकविवाल्मीकिव्यासकालिदासादिशतकाष्टकम्', 'मुक्तकमौक्तिकम्'—इत्यादयो ग्रन्था: प्रामुख्यं भजन्ति। अप्रकाशितेषु ग्रन्थेषु प्रमुखा इमे सन्ति—१. महाकविबिहारीलालयुगलशतकम्, २. मुक्तकाञ्जलिसाहस्री, ३. आद्याचार्यनिम्बादित्यपरम्परासप्तशती, ४. आद्याचार्यनिम्बादित्यकालनिर्णयशतकम्, ५. आद्याचार्यनिम्बादित्यपरम्परायुगलशतकम्, ६. स्वामिहरिदासचरितावली, ७. स्वामिकरपात्रचतुःशती, ८. संस्कृतनिबन्धमणिमाला, ९. श्रीमाथुरचतुर्वेदसंहिता, १०. श्रीमदखण्डानन्दशतकम्, ११. मैक्सिममगोर्कीपञ्चशती च। पुण्यश्लोकं पं० चतुर्वेदमधिकृत्य नैके शोधार्थिनः डा० वासुदेवकृष्णचतुर्वेदमहाभागस्य निर्देशने शोधं कुर्वाणा आसते। देववाणी-परिषदायोजितेषु अखिलभारतीयसंस्कृतकविसम्मेलनेषु नैकवारं स्वचतुर्वेदमहाभागेन काव्यपाठः कृतः। स देववाणी-परिषद आजीवनसदस्योऽप्यासीत्। तस्य संस्कृतसेवा सदैव स्मरणीया स्थास्यति।

देववाणी-परिषत्परिवारः परमेश्वरम् दिवंगतात्मनां शाश्वतशान्तिं प्रार्थयते, तत्परिवारजनेभ्यश्च समवेदनाः समर्पयति।

रमाकान्त शुक्लः
महासचिवः
देववाणी परिषद्, दिल्ली

१० ५.१९८८ ई०

अर्वाचीनसंस्कृतम् (१०/३)

(R. N 34554/79)

(१५ जुलाई १९८८ ई०)

विषय-सूचिः

विषयः	लेखकः	पृष्ठांकः
१. सम्पादकीयम्		१५०
२. देववाणीहुंकारशतकम्	डा० राजेन्द्र मिश्र, बाली	१५३
३. दयानन्दसूक्तिसप्तशती	श्री शिवकुमार मिश्रः, हरदोई	१६१
४. स्वागतं पयोद ते !	डा० रमाकान्त शुक्लः, दिल्ली	२२७
५. देववाणी-परिषद्वार्ता	रमा शुक्ला	२२९
६. संस्कृत-जगद्वार्ता	,, ,,	२२९
७. नवप्रकाशनचर्चा	श्रीसदाशिवकुमार द्विवेदी, वाराणसी	३३२

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम—नयी दिल्ली ।

२. प्रकाशनकालावधिः—त्रैमासिकम् ।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९ ।

डा०रमाकान्त शुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति ।

१५-७-१९८८

—डा० रमाकान्त शुक्लः
प्रकाशकः, सम्पादकः

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य दशमवर्षीये तृतीयेऽस्मिन्न् पद्यमयेऽङ्के 'देववाणीहुंकार-शतकम्', 'दयानन्दसूक्तिसप्तशती', 'स्वागतं पयोद ते' चेति रचनात्रयं देववाणी-परिषद्वार्ता, संस्कृत-जगद्वार्ता नवप्रकाशनचर्चा च प्रकाश्यन्ते।

अद्यत्वे त्रिभाषासूत्रे संस्कृतस्य स्थितिमवलम्ब्य नैके संस्कृताध्यापकाः संस्कृतानुरागिणः, छात्राः, लेखकाः, सम्पादकाः संस्कृतसेविनश्च चिन्ताचुम्बित-चित्ताः सन्ति।

संस्कृतस्य कृते निःस्वार्थं सर्वस्वं समर्पयितुं सन्नद्धाः कष्टसहिष्णवो जनाः यदवधि देशे विश्वस्य कस्मिन्नपि भागे वा तिष्ठन्ति तदवधि संस्कृतस्य नाशं कर्तुं कोऽपि न समर्थः। सर्वकारीयशिक्षानीतौ संस्कृत सर्वथा विलुप्तं चेत्तिष्ठेत्, अनिवार्यस्थितिं वा लभेत—एतेन न कापि हानिर्न वा कोऽपि लाभः। ये संस्कृतं निष्कारणं पठन्ति, लिखन्ति, अनुशीलयन्ति, अध्यापयन्ति ब्रुवते, अभ्यस्यन्ति, बुद्धयन्ति, आचरन्ति, प्रचारयन्ति—एतादृशेषु त्रिषु चतुर्षु वापि जगति तिष्ठत्सु अमरवाण्या मृतिं कर्तुं को नामेशः?

तथापि प्रजातन्त्रे यदा कोऽपि वर्गो जनताया अध्ययनाधिकारं छिनत्ति तदा संयमिनोऽपि संस्कृताराधकाः पीडामनुभवन्ति। तस्या पीडाया अभिव्यक्ति-र्भवत्येव। एतादृशी एवाभिव्यक्तिः संस्कृतकवे प्राध्यापकस्य च डा० राजेन्द्र मिश्रस्य 'देववाणीहुंकारशतके' परिलक्ष्यते। केनचिन्मित्रेण बालीद्वीपस्थस्य डा० राजेन्द्रमिश्रमहाभागस्य सकाशे भारते संस्कृतस्यावमानस्य सूचना प्रहिता भवेत्। तां निशम्य क्षुब्धेन तेन विगते जूनमासे भावशाबल्यसिद्धा कविता देववाणीहुंकारशतकरूपेण लिखिता। सा च अस्मत्सकाशे प्रकाशनार्थं प्रेषिता। अस्माभिश्च सा यथावत् प्रकाश्यते। देशाद्दूरे वसन् मात्रसूचनयापि यो ह्येवं क्लिश्नाति सोऽत्रागत्य कथं करिष्यति? नात्र डा० मिश्रस्य असमीक्ष्य-कारित्वं क्षिप्रकारित्वं वाशंकनीयम्, सन्देहपदेषु वस्तुषु सतामन्तःकरणप्रवृत्तेः प्रमाणत्वात्। तेन यदनुभूतम् तत्प्रमाणम्। तस्यां मनःस्थितौ यदनुभूतं तदक्षरीकृतम। तच्चास्माभिः स्व पाठकानां कृते प्रकाश्य समर्प्यते।

अत परं श्रीशिवकुमारमिश्रप्रणीता 'दयानन्दसूक्तिसप्तशती' प्रकाश्यते।

श्रीमिश्रमहाभागस्य वंशपरिचयस्तत्प्रणीतेषु अष्टादशपद्येषु ग्रन्थान्ते

दीयते। तदनुसारमस्य पितुर्नाम श्रीप्रभुदयालमिश्रः, मातुर्नाम श्रीमती कौशल्या च। 'हरदोई' जनपदान्तर्गते 'पिहानी'-संज्ञके ग्रामे अयं महानुभावः कान्यकुब्ज-विप्रान्वये जनिं लेभे।

उत्तरप्रदेशस्थराजकीयइण्टरकालेजेषु पञ्चत्रिंशत्प्रायवर्षाणि यावदध्यापन-वृत्तिमनुष्ठाय अद्यत्वेऽसौ 'चौहान थोक, हरदोई (उ०प्र०)' - इति स्थाने स्थायिरूपेण वसन् आर्यसमाजस्य प्रचारार्थम् उत्तरप्रदेशस्य नैकस्थानानि पर्यटति।

वाराणसीस्थराजकीयसंस्कृतकालेजस्य 'साहित्याचार्य' परीक्षां, आगरा-विश्वविद्यालयस्य हिन्दी-संस्कृत-विषययोः एम०ए०-परीक्षे तथा च ज्वालापुर-गुरुकुलस्य 'विद्याभास्कर'-परीक्षां समुत्तीर्यानेन स्ववंशस्य विद्यार्जनप्रीतिः प्रथिता। छात्रावस्थात एव श्लोकनिर्माणेऽस्य रुचिराविरासीत्।

आर्यसमाजसंस्थापकमहर्षिस्वामिदयानन्दसरस्वतीमहाभागानां सन्देशेष्वस्य भूयसी आस्था। स्वामिवर्यः भारतीयसमाजस्य रूढिग्रस्ततां विलोपयितुं ये ये प्रयत्ना आचरिताः, वेदानां महत्त्वप्रतिष्ठापनार्थं यानि भाषणानि कृतानि, विधवानां दलितानां च समुत्थानार्थं यः सन्देशः प्रदत्तः, अपराणि च यानि देशभक्तिवर्धकानि कार्याण्यनुष्ठितानि—तैः भारतीयेतिहासविद सुपरिचिता एव सन्ति। स्वामिभिः जीवपरमेश्वरौ, वेदान्, वेदाध्ययनं, धार्मिकान् विदुषः, कर्तव्यं, दुःखनाशं, सुखप्राप्तिं, दीर्घायुःसाधनं, पुण्यं, पापं पतिं, पत्नीम्, अधार्मिकान्, निर्भयजनान्, विद्यां, वेदाधिकारिणं, तीर्थं, तपस्त्यागौ, अतिथिम्, आचार्यम्, आप्तजनम्, सूक्ष्मबुद्धिं, भूतं, मूर्खखलौ, मित्रं, लोभम्, आलस्यं, भारतं, विद्याविद्ये, यज्ञम्, आचारानाचारौ, राजानं, प्रजां, मातापितरौ, मद्यपानम्, आत्मप्रशंसां, नव्यर्षीन्, परोपकारं, पुत्रं, विजयिनं, संन्यासिहृदयं, धर्मं, गोरक्षां, कर्मफलं, पुरुषार्थं, वर्णाश्रमव्यवस्थां, प्रवचनं, सहभक्षणं, नीतिवचनं, मुक्तितः पुनरावृत्तिं, सृष्टिनिर्माणप्रयोजनं, कृषिप्रशंसां, पुराण-विरोधं, श्रेष्ठजीवनं, मौनं, स्वदेशवेशं, निवृत्तिमार्गं, विद्यार्थिनं, प्रारब्धम्, आधुनिकान् आर्यान्, सूतकनिषेधं, मनुस्मृतिम्, आस्तिकान्, मूर्तिपूजनं, गङ्गाम्, अवतारान्, बालविवाहम्, आधुनिकसाधून् गायत्रीप्रणवजपप्राणाया-मान्, आर्यसमाजं धार्मिकभेदनिवारणं, समारोहेषु योगशिक्षाकारणं, पातिव्रतं, वेश्यागमननिषेधम् अन्यांश्च तांस्तान् विषयानवलम्ब्य समये समये ये विचाराः स्वग्रन्थेषु प्रदत्तास्तेषां सरलसंस्कृतश्लोकेषु प्रस्तुतिः श्रीमिश्रमहाभागेन 'दयानन्दसूक्तिसप्तशत्यां' विहिता, तथा च महर्षिदयानन्दस्वामिनां व्यक्तित्व-सम्बन्धेऽपि विचारा अभिव्यक्ताः। 'दयानन्दसूक्तिसप्तशती' निश्चप्रचं सप्तशती-परम्परायां कामपि नूतनां विच्छित्तिं निदधाति। यथा संस्कृत-

हिन्द्यादिभाषासु प्राचीनैः कविभिः सप्तशत्यो विरचितास्तथैव अद्यत्वेऽपि विरच्यन्ते—एतस्य तथ्यस्य परिचयोऽस्माभिर्यथा अर्वाचीनसंस्कृते इतः पूर्वं प्रकाशितया डा० शिवदत्तचतुर्वेदप्रणीतया 'स्फूर्तिसप्तशत्या' लब्धस्तथैव श्रीशिवकुमारमिश्रप्रणीतया 'दयानन्दसूक्तिसप्तशत्या'पि लभ्यते। पूर्वकविप्रणीत-विविधग्रन्थामृतास्वादनक्रीडादुर्ललितान्यपि धीमतां हृदयानि हर्तुं प्रभवेयुरस्याः पद्यानीति काम्यतेऽस्माभिः।

अस्माभिः विगतेऽङ्के 'अकालजलद'इतिशीर्षकेण असमये करकानिपानतार्थं मेघ उपालब्ध आसीत्। अन्तिमे पद्ये च कथितमासीत् —

"यथासमयमस्तु ते जलद! गर्जनं वर्षणम्
यथासमयमस्तु ते समुदयस्तथा विश्रमः।"

संयोगतः अस्मिन् वर्षे आषाढस्य प्रथमदिवस एव मेघोदयः संजातः। जूनमासस्य २८—३० तारिकासु मध्यप्रदेशे मया दृष्टं यत्सुकाले समागतं मेघं कर्षकाः प्रमुदितेन मनसा अभिनन्दन्ति। इयं सुवृष्टिः देशस्य कृते अत्यन्तं लाभप्रदा। जुलाईमासस्य सप्ताहद्वये देशस्य विभिन्नभागेषु सुवृष्टिर्भूता। श्रावणे भाद्रपदेऽपि सुवृष्टिः स्यादिति परमेशः प्रार्थ्यते।

अस्माभिश्च सुकालवारिदाय 'स्वागतं पयोद! ते'-इतिशीर्षकेण स्वागतं व्याह्रियते। यदि कञ्चित् अनर्थकारिणं जनं वयमधिक्षिपामस्तर्हि सदर्थकारिण-मुपश्लोकयितुमप्यस्माभिस्तत्परैर्भाव्यमेव! इयं रचना १.७.१९८८ तारिकायां प्रारब्धा, १५.७.८८ तारिकायां च प्रकाशितरूपे पूर्तिं गच्छति।

देववाणी-परिषद्वार्तायां संस्कृत-जगद्वार्तायां च विगतमासत्रये अनुष्ठिताः केचन गतिविधयो दीयन्ते।

नवप्रकाशनचर्चायां श्रीमदाशिवकुमारद्विवेदिना 'सनातनोपाह्व' डा० रेवाप्रसादद्विवेदि-कृतं 'श्रीरेवाभद्रपीठं' नाम सद्यः प्रकाशितं काव्यं संक्षेपतः समीक्ष्यते।

मुद्रणगताः केचन दोषाः पाठकैः मर्षणीया एव।

विदुषामाश्रवः

(हस्ताक्षर)

(डा० रमाकान्त शुक्लः)
प्रधानसम्पादकः

१५.७.१९८८
६ वाणी-विहारः, नयी दिल्ली-११००५९

अभिराजराजेन्द्रविरचितम्

देववाणीहुङ्कारशतकम्

मदङ्कलालिता मूढाः कदर्या देशवासिनः ।
हुङ्कृतिं देववाण्या मे शृणुध्वं व्योमगामिनीम् ।।१।।
गर्ज गर्ज क्षणं मूढ ! मधु यावत्पिबाम्यहम् ।
पुरेति चाण्डिका संख्ये महिषं व्याहरद्यथा ।।२।।
तथैवाहं प्रवच्म्यद्य प्रमूढं भ्रष्टशासनम् ।
तवावसानकालोऽपि नेदिष्ठः परिलक्ष्यते ।।३।।
समाजाभिमतं पूतं यो जनः समुपेक्षते ।
विनाशस्तस्य दुर्वारो विधात्राऽपि न वार्यते ।।४।।
समाजश्चापि यो राष्ट्रभावनामवमन्यते ।
निश्चप्रचं प्रयात्येव शनकैर्नाशमेषताम् ।।५।।
नाद्रियते विश्वमतं राष्ट्रं यद्धि निरङ्कुशम् ।
तदप्येति क्षयं तूर्णं नैव नैवात्र संशयः ।।६।।
ज्येष्ठा गरिष्ठा वर्षिष्ठा मन्वन्तरसुसाक्षिणी ।
एतत्सर्वं मया स्वैरं प्रत्यक्षं परिलक्षितम् ।७।।
यूयं मुष्टिमिता मूढा वितथादूरदर्शिनः ।
यद्राष्ट्राभिमतं पूतमुपेक्षध्वे न तद् वरम् ।।८।।
समस्याः किन्नु राष्ट्रस्य समाधानमुपागताः ।
देववाण्या विरोधे यद् बद्धा कटिरिहोद्भटैः ?? ।९।
मेषा इव निहन्यन्ते नक्तन्दिवमनागसः ।
राज्येऽनुपञ्चनद्याख्ये[1] क्लैब्यं तत्र समाश्रितम् ।१०।

---

१. पञ्चनद्यं राज्यं पञ्जाबाख्यम् ।

बंगभूमिस्समाक्रान्ता गोरखोत्पातपीडिता ।
तत्र बुद्धिः कथं क्षीणा राजनीतिबलोद्धुरा ?? ।११।
यत्कार्यं तत्र नो शक्तिर्यच्चिन्त्यं तत्र नो मतिः ।
यद्ध्येयं तत्र नो निष्ठा यत्प्राप्यं तत्र नो गतिः ।१२।
भाषां पुरातनीं स्वीयां ज्ञानविज्ञानधारिणीम् ।
मातरं देववाणीम्मां गर्हमाणा न लज्जथ !! ।।१३।
शूरा विचित्रकर्माणो लोके शास्त्रे श्रुता मया ।
हन्त मातरिशूरास्तु पुनरद्यैव वीक्षिताः ।।१४।।
वत्सका राजनेतारः क्षेत्रपूरुषविक्रमाः ।
अलं शिलोच्चयाग्रे फेनकस्त्रशीर्षविधूननैः ।।१५।।
या मृता न तुरुष्काणां साम्राज्ये शतपञ्चके ।
देववाणी न सा भद्र ! त्वत्प्रयासैर्मरिष्यति ।।१६।।
आंग्लभाषाप्रभुत्वेऽपि या गता विजिगीषुताम् ।
देववाणी न सा तात ! त्वत्प्रयासैर्नशिष्यति ।।१७।।
अधमा सन्ततिः किन्तु कृतघ्ना दुर्यशस्विनी ।
क्षयं याति प्रसूशापात्सा गतिस्तेऽपि निश्चिता ।१८।
इतः परं न वक्तव्यं मया भारतवाचया[1] ।
मिश्रोऽभिराजराजेन्द्रो यद्यस्ति तद् वदिष्यति ।१९।
हुङ्कारश्चापि शापश्च मयोभौ सुप्रकाशितौ ।
विभीता यात कल्याणं शप्ता वाथ विनाशनम् ।२०।
ऊर्ध्वबाहुर्विरौम्येष जननीस्नेहगर्वितः ।
मिश्रोऽभिराजराजेन्द्रो देववाणीसमर्चकः ।।२१।।
अलं मौढ्येन नेतारः संस्कृतज्ञानभिक्षुकाः ।
अलं समग्रराष्ट्रस्य भूरिसौभाग्यखण्डनैः ।।२२।।
देववाणी न भाषेयं प्राकृता[2] शब्दसञ्चया ।
इयं सञ्जीवनी शक्तिर्भारतस्यामृतात्मनः ।।२३।।

---

१. देववाण्या ।

२. साधारणीति ।

दिव्या गीर्वाणवाणीयं दिव्यगाथा महीयसी ।
स्वर्धुनीव पुनानाऽसौ भूतलं भुवि राजते ।।२४।।
ऐरावतो न मातङ्गः कामधेनुर्यथा न गौः ।
उच्चैःश्रवा यथा नाश्वो वृषो नन्दी न वा यथा ।२५।
कल्पद्रुमो यथा शाखी नैव पेयं यथाऽमृतम् ।
ब्रह्मद्रवमयी दिव्या जाह्नवी न यथा सरित् ।।२६।।
तद्वदेव न सामान्या मानवो वागियं मता ।
प्रत्यभिज्ञायते लोके देववाणीपदेन या ।।२७।।
सृष्टिकल्याणरक्षार्थं यथा चन्द्रदिवाकरौ ।
यथाऽग्निश्च यथा वायुर्यथा वा जीवनं जलम् ।।२८।।
ईश्वरेण प्रदत्तानि जीवलोकाभिशंसिना ।
तथैव वाणी कल्याणी संस्कृताख्येयमादिमा ।।२९।।
यस्यां वेदामृतं पूतं पुराणं भूरिविस्तरम् ।
यस्यां शास्त्राणि काव्यानि पार्थिवामृतवन्ति च ।३०।
यस्यां गीता परब्रह्मसायुज्यामोदसोदरी ।
या स्वयं पद्मनाभस्य मुखपद्माद् विनिःसृता ।३१।
असौ किं प्राकृता भाषा भावमात्रैकवेदिनी ।
पृच्छाकुशलवाग्द्वारैर्वार्तामात्रप्रयोजना ?? ।।३२।।
कस्मिन् भाषान्तरे दृष्टं चरितं दिव्यसौरभम् ।
केन कुत्र कदा कीदृक् यादृशं ह्यधिसंस्कृतम् ।।३३।।
प्रथमा विश्ववारा या संस्कृतिर्भुवि भारते ।
मधुवादा मधुस्वादा सृष्ट्यादौ हि समुद्ययौ ।।३४।।
देववाण्या ऋते का तां विश्वमार्यं प्रकुर्वती ।
व्याततानोदयाद्रेश्च यावन्नु पश्चिमाचलम् ?? ।३५।
विश्वबन्धुत्वसन्देशः कुत्रादौ परिलक्ष्यते ।
आचारमहिमा कुत्र कुत्र धर्मो दशाङ्गकः ?? ।।३६।।

कुत्र साहित्यसङ्गीतकलासंवलनं स्मृतम् ।
अध्यात्मदर्शनं कुत्र रथरूपकमञ्जुलम् ?? ॥३७॥
स्वाध्यायदेशना कुत्र कुत्र विद्या विमुक्तये ।
कुत्र वा शंसितं ज्ञानं पवित्रं सर्वतोऽतिगम् !! ॥३८॥
संस्कृतं नाम देवी वागन्वाख्याता महर्षिभिः ।
इतीव दण्डिना कस्मै मधुपर्कं समर्पितम् !! ॥३९॥
देववाणी त्रयीवाणी संस्कृताख्या महीयसी ।
साक्षात् सरस्वती सैव शब्दार्थविग्रहोर्जिता ॥४०॥
क्वाद्य हर्षयशोधर्मभोजबल्लालसन्निभाः ।
नाममात्रेण राजानः कोविदाः परमार्थतः ॥४१॥
चिरायुषो न ते भूपास्तथा शौर्यसमृद्धिभिः ।
यथा विद्याकलाभक्त्या देववाणीसमर्चया ॥४२॥
किं भविष्यति हा हन्त लोकतंत्रे नु साम्प्रतम् ।
प्रतिशाखं विराजन्ते पूजिता दारुकौशिकाः ॥४३॥
अजानन्तोऽपि भूगोलं संस्कृतिं गणितादिकम् ।
तेषु-तेषु विभागेषु जायन्ते येऽद्य मंत्रिणः ॥४४॥
तेषां कृते वृथा वेदो वृथा शास्त्रं वृथा कला ।
वृथा सद्धर्मसंस्कारौ वृथा जीवनदर्शनम् ॥४५॥
संस्कृतं खलु नामास्ति कस्य दृष्टस्य पक्षिणः ।
इत्यहो ते न जानन्ति जरठाः क्रीतबुद्धयः ॥४६॥
भिन्नभाषं भिन्नवेशं भिन्नजातिपरम्परम् ।
भिन्नभक्ष्यं भिन्नपेयं भिन्नधर्मार्थचिन्तनम् ॥४७॥
वैभिन्न्यमहितं राष्ट्रं को नु बध्नात्यनारतम् ।
शासनं राजनीतिर्वा ? केवलं दिव्यसंस्कृतम् ॥४८॥
एकसूत्रेण बध्नाति भारतं वेदसंहिता ।
आर्षकाव्यद्वयं यद्वा पुराणचरितामृतम् ॥४९॥
एकसूत्रेण बध्नन्ति भारतं सर्वतोमुखम् ।
कालिदासादयो धुर्या राष्ट्रसत्कीर्तिगायनाः ॥५०॥

यावद्धि शङ्कराचार्य उत्तराशां विगाहते ।
महाप्रभुश्च गौराङ्गो यावद् वृन्दावनोत्सुकः ॥५१॥
यावद्रामेश्वरं तीर्थं गाङ्गमम्बु च नीयते ।
यावद्बदरिकाधाम्नि दाक्षिणात्यस्समर्चकः ॥५२॥
अयोध्यातो धनुष्कोटिं यावद्व्याप्ता यशस्विनी ।
पावनी जैत्रयात्रासौ यावद्रामस्य विश्रुता ॥५३॥
नित्यस्नाने समर्चायां मङ्गले च महोत्सवे ।
यावत्सप्तपुरीभूपनदीशैलानु[1]कीर्तनम् ॥५४॥
तावद्धि भारतं राष्ट्रं देववाणीसमन्वितम् ।
स्थास्यत्यखण्डितं नूनं नात्र कार्या विचारणा ॥५५॥
उत्तरोत्तरमुच्छिन्ना वर्धन्ते हि कुशा यथा ।
वृद्धिमेष्यति कल्याणी देववाणी तथैव नः ॥५६॥
कृपणा राजनेतारः स्वार्थकुण्ठितमानसाः ।
देववाणीतिरस्कृत्या किन्न राष्ट्रं तिरस्कृतम् ?? ५७
संस्कृताध्ययने नष्टे सर्वं नष्टं भविष्यति ।
निर्मूलो हि यथा शाखी निर्हिमाद्रिर्यथाऽपगा ॥५८॥
शब्दार्थसञ्चयज्ञानभावशैलीकथादृशा ।
सर्वा भाषा नु गृह्णन्ति संस्कृतस्याधमर्णताम् ॥५९॥
स्वीयं रिक्थं स्वकन्याभ्यो यौतकत्वेन दापितम् ।
वृन्दारकगवी हन्त प्रतिगृह्णातु चेत्पुनः ॥६०॥
सर्वा दारिद्र्यमेष्यन्ति भिक्षुक्यो निर्वराटिकाः ।
देववाण्यैव तासां हि यतस्त्रैकालिकी स्थितिः ॥६१॥
एतद्रहस्यं दुर्दर्शं कथं ज्ञास्यथ सांसदाः ।
चित्ते कुलालचक्राभे क्वान्यन्निर्वाचनादृते ?? ॥६२॥
दर्दुरा इव जल्पन्ति केचिन्मूर्खा अनर्गलम् ।
भाषेयं ब्राह्मणानां वा हिन्दूनामुत्तरस्य वा ॥६३॥

१. सप्तपुर्यः सप्तभूपाः सप्तनद्यः सप्तशैलाश्च ।

ऐतरेयो महीदासो जाबालश्चान्त्यजो वरः ।
यत् त्रयीमंत्रद्रष्टारौ द्विजभाषैव सा पुनः ?? ॥६४॥
विश्वामित्रश्च राजन्यः कक्षीवान् वैश्यवंशजः ।
यत्र ख्यातावनूचानौ द्विजभाषैव सा पुनः ?? ॥६५॥
हेमचन्द्रो वणिक्सूनुः कायस्थो वाग्भटः कृती ।
यत्र दुर्धर्षविद्वांसौ द्विजभाषैव सा पुनः ?? ॥६६॥
काव्यशास्त्रेषु निष्णाताः किं सर्वे कविपण्डिताः ।
केवलं ब्रह्माणा नान्ये ? स्वयं पश्यन्तु सूरयः ॥६७॥
एकदेशनदीसंघो यदि सिन्धुर्भवेदिह ।
गन्धवातोऽपि केषाञ्चित् प्रसूनानां समन्वयः ॥६८॥
देववाण्यपि तत्साधु स्वीक्रियेत विकस्वरा ।
भाषा राज्यस्य कस्यापि जातेर्वर्गस्य केवलम् ॥६९॥
विरामखानसूनुर्हि खानखानेति विश्रुतः ।
यस्यां लिलेख सश्रद्धं गङ्गाष्टकमतन्द्रितः ॥७०॥
मज़्मउल् बहरीने च यदौपनिषच्चिन्तनम् ।
विद्वान् दाराशिकोहोऽपि जग्रन्थ विनयान्वितः ।७१।
तुरुष्काणां न सा वाणी कथं तच्चरिताश्रया ।
जहांगीराऽसफौ यत्र काव्यसद्विषयीकृतौ ?? ॥७२॥
दक्षिणे भारविः प्राच्यां विश्वनाथो धुरन्धर. ।
उत्तरे व्यासवाल्मीकौ[1] प्रतीच्यां माघपण्डितः ॥७३॥
परिवेषे विराजेते कालिदासोऽथ शङ्करः ।
ईदृशी देववाणी सा कस्यां दिशि नियंत्रिता ?? ।७४।
अहो यैः क्वापि कर्णाभ्यां पूर्वं नामापि न श्रुतम् ।
विबुधास्तेऽपि पाश्चात्त्या देववाणीसमर्चकाः !! ७५
एकतस्ते महाप्राज्ञा विद्यामृतपिपासवः ।
कृतघ्ना अन्यतश्चेमे कृपणा अल्पमेधसः ॥७६॥

---

१. प्रयोगस्वातंत्र्यमिदम् ।

आचकांक्ष पुनर्जन्म भारते योऽस्मितादरः ।
संस्कृतार्पितसर्वस्वो जयतान्मोक्षमूलरः ॥७७॥
भारतं ज्ञातुकामैस्तु पूर्वं ज्ञेयोऽथ पाणिनिः[1] ।
इतिवादी जयेन्नित्यं ह्विटनी शब्दशास्त्रवित् ॥७८॥
भविष्यन्त्युपनिषदो परलोकेऽपि शान्तिदाः ।
एवम्मानी जयेत्प्राज्ञो विद्वान् शोपेनहॉवरः ॥७९॥
कस्य कस्याथवोल्लेखः संज्ञयाऽत्र क्रियेत च ।
पाश्चात्यबुधसाहस्री राजते संस्कृतानुगा ॥८०॥
पाश्चात्येषु च देशेषु सम्प्रत्यपि समादरः ।
भारतस्य यदि स्फीतः संस्कृतं तत्र कारणम् ॥८१॥
न धनैर्नच विज्ञानैर्नापि सैन्यबलैः पुनः ।
भूतले संस्कृतेनैव भारतं भारतं मतम् ॥८२॥
उत्कन्धरोऽपि पाश्चात्यः संस्कृतज्ञसमक्षगः ।
श्रद्धया विनतो दृष्ट आदरेण दरेण वा ॥८३॥
कम्प्यूटरोपयोगेऽपि सर्वाधिकमनोरमा ।
इत्यम्बरीष[2]देशीयैस्तत्रज्ञैस्साधु घोषितम् ॥८४॥
सरला सुगमा मृद्वी कान्तसौशब्द्यमण्डिता ।
असीमशब्दसामर्थ्या देववाणी विलक्षणा ॥८५॥
काव्यापगा च शास्त्राब्धिर्वेदविद्यात्रिविष्टपा ।
नाट्योपवनिका रम्या सुरवाक् भारतीधरा ॥८६॥
साक्षाद् वाचस्पतिर्वक्ताऽध्येता चापि शतक्रतुः ।
नान्तं जगाम विद्याया: पारं यस्यास्तथाप्यहो ॥८७॥
सैव विद्या सुधासध्रीचीना कालविपर्ययैः ।
स्वतंत्रे भारतेऽप्यद्य पङ्के गौरिव सीदति ?? ॥८८॥
यस्या प्रचारः कर्त्तव्यो ग्रामे-ग्रामे गृहे-गृहे ।
हन्त सैवाद्य सूचितोऽप्यर्धचन्द्रैर्बहिष्कृता ?? ८९

१. If you want to know India, try to know Pāṇini—Whitaney.
२. अम्बरीषदेशः अमेरिकेति लेखकोत्प्रेक्षितम् ।

संस्कृतज्ञा विषादं मा यान्तु भद्रा अनेन वै ।
कस्यापि भाविवृत्तस्य पूर्वमेतद् विधानकम् ।।९०।।
स्थिरा भाषा स्थिरो लोकः स्थिरा ज्ञानपरम्परा ।
शासनं न चिरस्थायि फेनबुद्बुदसन्निभम् ।।९१।।
नो मृता म्रियते नोऽद्य नो भविष्ये मरिष्यति ।
आकल्पं देववाणीयं भारते प्रभविष्यति ।।९२।।
त्रिभाषायोजनायां वा नव्यभाषाविधानके ।
देववाण्याः कृते कामं मा भवेद्दुचिरास्पदम् ।।९३।।
कण्ठशय्या बुधानां तु लक्षकोटिमिताः परम् ।
सुखस्वापाय सन्नद्धाः सन्ति देवगिरोऽनघाः ।।९४।।
हिमाचलदरीरन्ध्रा आश्रमा मन्दिराणि च ।
पूततीर्थमहोद्देशाः पर्वतोपत्यकाः पुनः ।।९५।।
गंगाकलिन्दजारेवाकावेरीतीरभूमयः ।
देववाणीविहारार्थं सावकाशा निरन्तरम् ।।९६।।
नावरोधवधू दिव्या देववाणी सनातनी ।
कान्तारवासिनी सेयं कान्तारेष्वेव मोदते ।।९७।।
अद्यापि निखिले राष्ट्रेऽमंदवात्सल्यमेदुराः ।
सहस्रशो विराजन्ते तल्लीलाशुकसारिकाः ।।९८।।
गीतैः काव्यैः प्रबन्धैश्च नाट्यैः शास्त्रैर्निरन्तरम् ।
संस्कृतं सेवमानास्ते यान्ति नित्यं कृतार्थताम् ।।९९।।
येषामन्यतमस्सोऽयं वाणीपादाब्जसेवकः ।
मिश्रोऽभिराजराजेंद्रो मातृहुङ्कृतिघोषकः ।।१००।

श्रुत्वा राष्ट्रेऽवमानं विबुधबुधगिरश्शास्तृवर्गैर्विमूढैः
क्षुभ्यत्पाथोधिकल्पो हृदयमधुवनोद्दामदावाग्निदग्धः ।
प्रायागीयोऽभिराजः प्रणयति कवितां भावशाबल्यसिद्धां
बालोद्वीपे वसानः स्ववसतिसुहृदां भावसम्भावनार्थम् ।।१०१।।

नागनागरसेन्द्वङ्के ख्रिस्ताब्दे जूनमासके ।
शुक्रेऽपराह्णे श्लोकानां शतीयं पूर्णतामगात् ।।१०२।।

।। इति श्रीदुर्गाप्रसादाभिराजीसूनुना त्रिवेणीकविनाऽभिराजराजेन्द्रेण बालीद्वीपस्थोदयनविश्वविद्यालयाभ्यागताचार्येण प्रणीतं देववाणीहुङ्कारशतकाख्यं काव्यं परिसमाप्तम् ।।

दयानन्दसूक्तिसप्तशती

(प्रणेता—श्री शिवकुमार मिश्रः)

जीवपरमेश्वरौ

ध्यायन्ति तन्मयधियः पुरुषार्थिनो ये प्रातर्विहाय शयनं पुरुषं पुराणम् ।
आलस्यलेशरहिताश्च तथैव सायं ते प्राप्नुवन्ति धनधान्यनिधिं महान्तम् ।१।

जले निमग्नाः पुरुषा विशुद्धा बहिर्यथा यान्ति तथैव जीवाः ।
नित्यं परब्रह्मणि ज्ञानमोदरूपे निमग्ना मुदिता भवेयुः ।।२।।

आसने दृढतां याते श्रमो नैव विजायते ।
उपासनाविधाने च शीतमौष्ण्यं न बाधते ।।३।।

चिन्तयन्त्यास्तिका हृत्सु सर्वसाक्षिणमीश्वरम् ।
रक्षितास्तेन निष्पापा धार्मिकाः सुखिनश्च ते ।।४।।

अवगत्य जगत्पतिं जना मरणागाधसमुद्रतः पृथक् ।
प्रभवन्ति सुखावहोऽस्त्ययं नहि पन्था अपरोऽस्ति मुक्तये ।।५।।

रक्षको विद्यते येषां जगतां रक्षकः स्वयम् ।
संभविष्यति संग्रामे कथं तेषां पराजयः ।।६।।

मूलं निखिलविद्यानामीशध्यानमतो यदा ।
विद्येयं ह्रसते यत्र स देशो याति दुर्गतिम् ।।७।।

सदैव सुखिनः सन्तु प्रभुभक्तिपरायणाः ।
धर्मविद्याप्रचारस्य कार्ये लग्नाः समे जनाः ।।८।।

गुणवत्पतिसेवने रता वरनारी वपुषा हृदा धनैः ।
अनुकूलतया दिवानिशं व्यवहारं कुरुते यथा सती ।।९।।

प्रभुभक्तियुतास्तथा समे मिलिताः सन्तु परस्परं जनाः ।
परमं सुखमाप्नुयुः सदा द्रुतमायान्तु मदीयबान्धवाः ॥१०॥
(युग्मकम्)

ईर्ष्याद्वेषादिका दोषनाँस्त्यक्त्वेश्वरसमं समैः ।
जीवैः साकं सुहृद्भावरक्षको वर्धते जनः ॥११॥

आरब्धुमिच्छति जनः समुपासनां यो
वैरं स केन चिदपीह नरो न कुर्यात् ।
प्रीत्या सदा व्यवहरेत् सकलैर्मनुष्यैः
सत्यं वदेदनृतवाक् च कदापि न स्यात् ॥१२॥

चौर्यं त्यजेन्न विदधीत कदापि दर्पं
स्याल्लम्पटो न विनयेन विभूषितः स्यात् ।
कुर्याद् वशे च सकलानि निजेन्द्रियाणि
जेयानि सत्यव्यवहारपरः सदा स्यात् ॥१३॥ युग्मकम्

उपासनासमुत्पन्नविवेकेन युतो नरः ।
शोकं क्षणिकवस्तूनामानन्दं विजहाति च ॥१४॥

सत्येन प्रेम्णा परमेश्वरस्य ध्यानं करिष्यन्ति सदैव भक्त्या ।
ये, ते कृपालोः परमेश्वरस्य प्राप्स्यन्ति मुक्तौ दयया प्रमोदम् ॥१५॥

शैत्यातुरस्य पुरुषस्य निवृत्तिमेति,
शैत्यं यथाग्निनिचयान्तिकमागतस्य ।
जीवस्यतद्वदखिलेश्वरसन्निधानात्
पूता भवन्ति गुणकर्ममयाः स्वभावाः ॥१६॥

तमेवेष्टदेवं विजानन्तु नम्यं समस्ता जनाः ! यं प्रशंसन्ति वेदाः ।
सदा योगिनो यं च ध्यायन्ति मुक्ताः, नराः प्राप्य यं मोदमग्ना भवन्ति ॥१७॥

कामं क्रोधं लोभं मोहं भयशोकौ निरस्य जगदीशः ।
भक्तेभ्यः प्रददाति गुणानां राशिमिन्द्रियजयप्रभृतीनाम् ॥१८॥

निद्रां विहाय रजनीप्रहरे चतुर्थे
ये प्रार्थनास्तुतिमुपासनमारभन्ते ।
इच्छन्ति चोत्तमगुणान् विभवांश्च यान् ते,
सम्प्राप्नुवन्ति पुरुषार्थपरायणास्तान् ॥१९॥

हित्वाखिलं यदि समे परमेश्वरस्य,
सेवापराः सुचरिताः पुरुषा भवन्तु ।
वित्तं यशः प्रतिवसेत् पुरुषेषु तेषु,
नित्यं समीहितनिरन्तरराज्यलक्ष्मीः ॥२०॥

जले निमग्नो वहिरेत्य भूयो
जले निमग्नः पुरुषो यथा स्यात् ।
मग्नं तथात्मानमलं विदध्यात्
मुहुर्मुहुर्ब्रह्मणि मोदरूपे ॥२१॥

यस्योपासनया यशः सुविपुलं पुष्टिर्विमुक्तिस्तथा,
वृद्धिर्हस्तगता भवत्यमरताप्राप्तिश्च संजायते ।
सर्वेषां जगदीश एव मनुजा आराध्यदेवोऽस्ति नः,
त्यक्त्वा तं समुपासनामिह वयं नान्यस्य कुर्वीमहि ॥२२॥

हेमन्ततौ यथा सर्वे पदार्थाः सन्ति शीतलाः ।
तथैव शीतलाः सन्तु समुपास्य समे प्रभुम् ॥२३॥

सेवन्ते सर्वसामर्थ्ययुक्तं ये परमेश्वरम् ।
अधिगत्य समा विद्याः सुखिनः सुधियश्च ते ॥२४॥

उपासनारताः सन्ति सत्यभावेन ये प्रभोः ।
करोति रक्षणं तेषां स सदात्मशरीरयोः ॥२५॥

विहितोपासनो नित्यं दयालुः परमेश्वरः ।
अनुगृह्णाति सततं स्वकीयसमुपासकान् ॥२६॥

मानवाः ! परमात्मा यः सत्याचरणप्रेरणाम् ।
विदधाति सुखं मुक्तेर्ददात्याराध्य एव सः ॥२७॥

दुष्टानि कर्माणि विहाय शुद्धं करोति न स्वं व्यवहारजातम् ।
यावन्न तावत् परमेश्वरं ना लब्धुं क्षमोऽशान्तमनाः कदापि ॥२८॥

जीवेश्वरयोरैक्यं मतमेतज्ज्ञानहीनानाम् ।
ऋषिमुनिविदुषामेतज्ज्ञानवतां विद्यते नैव ॥२९॥

जीवो विभुर्नास्ति विभुर्यदि स्यात्, जनिः कथं जागरणं कथं स्यात्।
कथं सुषुप्तिर्गतिरागतिः स्यात् स्वप्नं कथं स्यान्मरणं कथं स्यात् ॥३०॥
अल्पश्च सूक्ष्मोऽस्त्यत एव जीवः, न वेत्ति सर्वं परमेश्वरश्च ।
व्याप्तोऽखिले सूक्ष्मतरस्ततोऽपि जीवे प्रकृत्यामखिलस्य वेत्ता ॥३१॥
जीवो भवेद् ब्रह्म कथं न स स्यात् तद्वत् क्षमः सृष्टिविधौ प्रजानाम्।
मिथ्यास्ति मिथ्यात्वमतो जगत्याः, ऐक्यं च जीवस्य जगन्नियन्तुः ॥३२॥

भूतो न भावी च कदापि योगी, सृष्टेर्विधानं परिवर्तयेद् यः ।
पश्येत् श्रुतिभ्यां शृणुयाच्च दृग्भ्यामतो न जीवः परमेश्वरोऽस्ति ॥३३॥

देही न जीवो जगदीश्वरोऽस्ति स्वप्नेऽपि यो नैव बिभर्ति देहम्।
जगत्पतेः कर्मगुणस्वभावाः, जीवे घटन्ते न यतः कदापि ॥३४॥

विहाय ज्ञानं समुपासनां च ये केवलं कर्मरता मनुष्याः।
निजस्वरूपं न विदन्ति, ब्रह्म विदन्ति त्रय्यां निरताः स्वरूपम् ॥३५॥

नाम्नां प्रभोरर्थमवेक्ष्य नैजान् करोति ना कर्मगुणस्वभावान् ।
यदानुकूलान् परमेश्वरस्य तेषां स्मृतिः सा वरदास्ति नाम्नाम् ॥३६॥

आयान्तु बान्धवा कुर्मो दुःखानां क्षतये वयम् ।
मिलित्वा विजयावाप्त्यै प्रसन्नं परमेश्वरम ॥३७॥

विवेकशून्या अजितेन्द्रिया ये
धर्मेण हीना अबुधा जगत्याम् ।
भक्त्या विहीनाः परमेश्वरस्य,
वर्षैरसंख्यैर्न तमाप्नुवन्ति ॥३८॥

परितः परमेश्वरं विभुं वहिरन्तः स्वहृदावगत्य ना ।
रहितः खलु शंकया सदा पुरुषार्थी मुदितोऽभयो भवेत् ॥३९॥

महादयालुः परमेश्वरोऽतः ये तस्य लब्धयं विहितप्रयत्नाः ।
कायेन वित्तेन हृदा च भक्त्या तमाशु तेऽनन्तमवाप्नुवन्ति ॥४०॥

यथेश्वरोऽनुगृह्णाति परोपकृतिकारकान् ।
तथाऽस्माभिरनुग्राह्याः समस्ताः प्राणधारिणः ॥४१॥

यथा न जायते सूर्यदर्शनं रश्मिभिर्विना ।
सम्यग् ज्ञातैर्विना वेदैर्न तथा परमात्मनः ॥४२॥

अर्हन्ति मानवा एव सम्प्राप्तुं परमेश्वरम् ।
ज्ञानवृद्धिस्वभावा हि यतस्ते सन्ति भूतले ॥४३॥

स्वस्मै परस्मै शास्त्राणां विज्ञानसहिता मतिः ।
याचितव्या यथाकालं समस्तसुखसाधिका ॥४४॥

प्रार्थनीयः प्रभुः सर्वैरेवं हे जगदीश्वर ।
अधर्मान्मोचयित्वा नो धर्ममार्गे नियोजय ॥४५॥

स्वपूर्णपुरुषार्थस्य पश्चादुत्तमकर्मणाम् ।
सिद्ध्यै सामर्थ्यसाहाय्ययाचना मेऽस्ति प्रार्थना ॥४६॥

स्वप्रकाशयुतो हृत्सु रमतां नः प्रभो तथा ।
नरो यथात्मनो गेहे ज्ञानानन्दविवृद्धये ॥४७॥

इष्टदेवं नरो योऽन्यं विहाय परमेश्वरम् ।
मन्यते, भाग्यहीनः स लभते दारुणां व्यथाम् ॥४८॥

भाग्यहीना नरा येऽखिलैश्वर्यदम्,
वन्दनीयं यशोदं जगद्धारकम् ।
स्तुत्यमीशैरुपास्यं परित्यज्य तम्,
शिक्षकं कुर्वते हा ! परोपासनाम् ॥४९॥

वृत्तीरखिलदोषेभ्यो निवार्य मनसः स्थिराः ।
कृत्वा शुभगुणेष्वस्ति योगो मुक्तेरधिग्रहः ॥५०॥

योगाभ्यासनिमग्नानां नृणामात्मसु भासते ।
सत्यभावेन धर्मस्यानुष्ठानानन्तरं प्रभुः ॥५१॥

शिवनामास्ति कल्याणकारीशस्तमहं वृणे ।
न विश्वसिम्यहं किन्तु पूजिते पार्वतीपतौ ॥५२॥

साधुभिः पण्डितैश्चैवालस्यमग्नैर्निरन्तरम् ।
मायावादस्य दम्भोऽयं निर्मितो लोकवञ्चकैः ॥५३॥

धर्मकर्मविहीनास्ते संसारहितवर्जिताः ।
ब्रह्मानुभूतिरहिता वदन्ति वितथं सदा ॥५४॥

अहं ब्रह्मास्मि मिथ्यैतज्जगदस्ति परं न ते ।
ब्रह्मत्वं स्वस्य लोकस्यानुभवन्ति च स्वप्नताम् ॥५५॥

पूजा पिपीलिकानां से श्रेष्ठास्ति शिवपूजनात् ।
दत्तं पिपीलिकाऽदत्ते वटिकेयं शिवस्य न ॥५६॥

नान्यः कश्चिन्नियन्तास्ति विहाय परमेश्वरम् ।
संसृतौ विद्यमानस्य नियमस्यास्य सर्वतः ॥५७॥

सत्योऽभेदः यतः सर्वव्यापकः परमेश्वरः ।
सत्यो भेदो यतो जीव एकदेशस्थितोस्त्यणुः ॥५८॥

एवं स्थिते विवादो यो विद्यतेऽभेदभेदयोः ।
मिथ्यात्वं निश्चितं तस्य तमस्तोमस्य भाववत् ॥५९॥

पितृवत् सुखिनो भक्तान् करोति परमेश्वरः ।
केवलं हेतुरत्राऽस्ति तस्यंवाहैतुकी कृपा ॥६०॥

वियत् सूक्ष्मतरः सर्वव्यापकः परमेश्वरः ।
अगोचरोऽस्त्यतः सर्वजनानां चर्मचक्षुभिः ॥६१॥

अधिका यावतो प्रीतिर्भविष्यति परात्मनि ।
तावान् तस्याः प्रकाशस्तु सत्वरं व्यक्तिमेष्यति ॥६२॥

पापानां वर्धकः सिद्धः परमात्मा भविष्यति ।
क्षमां दास्यति पापिभ्यो दयार्द्रहृदयो यदि ॥६३॥

कुरुते न कृपां यावत् प्रीतिमान् परमेश्वरः ।
तावत् तस्मिन् न विश्वासो मानवस्योपजायते ॥६४॥

व्याप्ता यथा वियति धूलिकणा भवन्ति,
दृश्या गवाक्षगतभास्कररश्मिजालैः ।
पूर्णस्तथैव परितः परमेश्वरोऽपि
हृन्मन्दिरे भवति केवलध्यानदृश्यः ।।६५।।

खाग्निवाय्वादयो व्याप्ता एकस्मिन्नुपले यथा ।
तथैव परमात्मापि व्याप्तो निखिलवस्तुषु ।।६६।।

सूक्ष्मः स्थूलपदार्थेषु व्याप्तो भवति विश्वतः ।
अतः सूक्ष्मतमो व्याप्तः सर्वत्र परमेश्वरः ।।६७।।

वेदाः वेदाध्ययनं च

यथार्थविद्याभ्युदयः सुखानां लाभो बुधत्वं पठनेन येषाम् ।
यथार्थतो यैः सदसद्विवेको वेदा ऋगाद्याः कथितास्त एव ।।६८।।

वेदेषु विद्याः सकला यथार्था अतस्तदीयाध्ययनं श्रुतिश्च ।
तत्पाठनं श्रावणमस्ति श्रेष्ठो महीतले पावन आर्यधर्मः ।।६९।।

वेदविद्यां ग्रहीतुं यतन्तां समे मानवाः स्याद‌रीणां निवृत्तिर्यतः ।
मूर्खताया विनाशो भवेत् सम्भवेत् उन्नती राज्यवृद्ध्यै बुधानां सदा ।।७०।।

वाणी प्रभोर्वेदचतुष्टयी या ज्ञानाय तस्यास्तदनुग्रहस्य ।
वाञ्छा विधेया सकलैर्मनुष्यैः कार्यस्तथा सन्ततमेव यत्नः ।।७१।।

प्रजाजना राजजनाश्च ये स्युः, आज्ञां परित्यज्य प्रभोश्च वेदान् ।
इच्छानुकूलं निरताः प्रवृत्तौ, अधोगतिः स्यान्नु कथं न तेषाम् ।।७२।।

केवलं वेदवेत्तारो धर्माधर्मविदो जनाः ।
अधर्मत्यागतो धर्मात् सुखिनो भवितुं क्षमाः ।।७३।।

उपदिशत्यखिलान् मनुजान् प्रभुर्हितकरी वरदा मम भारती ।
सकललोककृतेऽस्त्यधिकारिणः मम मताः पठने श्रवणेऽखिलाः ।।७४।।

सकललोकप्रियोऽस्ति यथा सदा सकलगः समतासहित. विभुः ।
यदि भवन्तु समे समतायुतः भवतु सिद्धिरलं वशवर्तिनी ।।७५।।

कृपाकारकः पितृवत् प्राणिमात्रहितेप्सुः प्रभुः सर्वविद्यागमाय ।
सदा कल्पकल्पस्य प्रारम्भकाले करोति स्वयं सर्ववेदोपदेशम् ।।७६।।

सम्पूर्णसत्यविद्यानां प्रदात्री वेदभारती ।
मानवेभ्यः समस्तेभ्यः परमानन्ददायिका ।।७७।।

सुखान्यनेकानि प्रसारयन्ति ते मानवाः पूर्णवसुन्धरायाम् ।
भवन्ति वेदाध्ययने रता ये सेवाविधाने जगतीपतेश्च ।।७८।।

अध्यापनं चाध्ययनं श्रुतीनां विधाय सर्वे मनुजा जगत्याम् ।
विज्ञाः समुद्योगपरायणाश्च भूत्वा नितान्तं सुखिनो भवन्तु ।।७९।।

विद्याविहीनः पुरुषोऽन्धतुल्यो न चास्ति वेदाध्ययनं विना सा ।
शास्त्राण्यतो वेदयुतानि सार्थं पठन्तु सर्वे पुरुषाः सदैव ।।८०।।

वेदा न नश्यन्ति कदापि नित्या ज्ञाने स्थिताः सर्वजगन्नियन्तुः ।
बीजेऽङ्कुराः सन्निहिता यथा च पूर्वञ्च पश्चात्तरुतामुपेताः ।।८१।।

सृष्ट्यादिकालेऽपि जगद्विधाता वेदोपदेशं यदि नाकरिष्यत् ।
जनाय धर्मादि यथार्थज्ञानमद्यापि कस्मा अपि नाभविष्यत् ।।८२।।

सत्यमस्ति यदिहाक्षिगोचरं कर्णगोचरमथापि तत् समम् ।
यत्र तत्र श्रुतितोऽस्ति विस्तृतं नानृतं निखिलजीवनं हि तत् ।।८३।।

केचिद् वदन्ति मनुजाः श्रुतिषूपदिष्टा
पूजास्ति भास्करनिशाकरयोस्तथाच ।
अन्यस्य भूतनिवहस्य परं तदीयं
तथ्यैर्विहीनमिदमस्ति वचोऽप्रमाणम् ।।८४।।

वेदा अनन्तविद्यानामधिकरणान्यतो न ते ।
मनुष्यनिर्मिताः सन्ति सन्तीश्वरविनिर्मिताः ।।८५।।

सुगमा रचना भाषा लावण्यसमलंकृता ।
राहित्यं पक्षपातस्य सत्यता चैकवाक्यता ।।८६।।

सर्वविद्यानिधानत्वं यतो वेदेषु केवलम् ।
अतस्ते रचिताः सन्ति सर्वज्ञपरमात्मना (युग्मकम्) ॥८७॥

विचारिताः सन्ति मया समस्ता मन्त्राः श्रुतीनां सुसमाहितेन ।
सम्यक् परं युक्तिविरुद्धता न कुत्रापि मे दृष्टिपथं प्रयाता ॥८८॥

सूर्यादिकं यस्तु सहायतार्थं विनिर्ममे मानवलोचनादेः ।
ज्ञानं न दद्यात् स मतेर्नराणाम् सम्भाव्यमेतत् किमु सर्गकाले ॥८९॥

अहं शंखासुरं हत्वा प्रमादालस्यरूपिणम् ।
आनीतवांश्चतुर्वेदान् इमान् जर्मनदेशतः ॥९०॥

पुस्तकानि समस्तानि पूरितानि दुराग्रहैः ।
मतानां सन्ति संसारे नैकं विश्वासभाजनम् ॥९१॥

ज्ञानस्य पुस्तकं सत्यं मतौ मम तु तन्मतम् ।
पक्षपातस्य लेशोऽपि यस्मिन्नैव क्वचिद् भवेत् ॥९२॥

सृष्टिक्रमानुकूलत्वं पुस्तकस्येदृशस्य तु ।
अद्यावधि मया यावत् कृतमन्वेषणं खलु ॥९३॥

वेदा एव मया प्राप्ता ग्रन्था ईदृग्विधा भुवि ।
कस्यापि नैव देशस्य भाषायां सन्ति ते यतः ॥९४॥

ज्ञानपूर्णास्तथा ज्ञानभाषायां रचिताः समे ।
विश्वासयोग्या लोकानां सन्त्येषा मामकी मतिः ॥९५॥

धार्मिकाः; विद्वांसः

ये श्रेष्ठकर्मसु जना अलसा न लग्नाः
ये नाचरन्ति ऋतमेव बुधा विबुध्य ।
सत्यं तथा च यदसत्यमिदं समस्तं
धर्मेण ते विरहिता उभयेऽपि सन्ति ॥ ९६ ॥

अन्याययुक्ता न परान् निहन्ति स्वप्नेऽपि नान्यायमिहाचरन्ति ।
कीर्त्या श्रिया ते विभवेन युक्ता भवन्ति भूमौ मनुजाः समस्ताः ॥९७॥

ये मानवा निजशुभाचरणैर्भवन्ति
शिष्टास्तथोर्ध्वगतयो भुवि ते विमुक्ताः ।
अज्ञानपाशनिगडाज्जटिलाल्लभन्ते
आसृष्टिकालममलं यशसः समूहम् ॥६८॥

वचो ज्ञानानुगं यस्य क्रिया च वचनानुगा ।
धरण्यां मानवेन्द्रस्य तस्य ज्ञानं सुशोभते ॥६६॥

धर्मार्थकामानधिगत्य मुक्तिं लब्ध्वा च सम्यक् परिपूर्णकामः ।
आनन्दरत्नाकरसंनिमग्नो ना मोदते सोऽतिरां सदैव ॥१००॥

बन्धून् प्राप्य सहायतां भुवि परां लोका लभन्ते यथा
कूपं मिष्टजलञ्च प्राप्य तृषितास्तृप्ति लभन्ते यथा ।
वेदाज्ञां परमेश्वरस्य विधिना सम्पादयन्तो नराः
मुक्ति प्राप्य तथैव मोदभरिता मोदाम्बुधौ शेरते ॥१०१॥

श्रेष्ठा धर्मरता सत्यविद्यादिगुणसंयुताः ।
उपकारव्रता आर्या आर्यावर्तैकवासिनः ॥१०२॥

सर्वेभ्यः सुखवर्षां ये कुर्वन्ति घनवज्जनाः ।
उदारास्ते सदेप्सन्ति विद्यां द्रव्यं च शंकरम् ॥१०३॥

सर्वोपकारकरणाय यथा पदार्थाः
सन्तीश्वरेण रचिताः वसुधाद्यनन्ताः ।
तद्वत् सदा व्यवहरन्तु बुधाः समस्ताः
सर्वोपकारकरणाय विहाय स्वार्थम् ॥१०४॥

रविचन्द्रप्रकाशसन्निभो विदुषां कर्णगुहागतः शुभः ।
उपदेशचयः प्रकाशितं कुरुते मानससद्म निर्मलम् ॥१०५॥

ज्ञानवृद्धिर्मनुष्याणां नोपदेशं विनास्त्यतः ।
दानं तच्छ्रवणं कार्यं तस्मात् सर्वैरहर्निशम् ॥१०६।

यज्ञे हुतं यथा द्रव्यं शुद्धं वायुजलादिकम् ।
उपदेशः सतां तद्वदात्मानं कुरुतेतराम् ॥१०७॥

धर्मार्थकाममोक्षाणां मार्गान् जानन्ति ये जना ।
तेऽन्यानुपदिशेयुर्न ज्ञानहीनाः परे नराः ॥१०८॥

ये पाठका बुधजना उपदेशकाश्च,
धर्मावलम्बनपराः स्वयमेव भूत्वा ।
कुर्वन्ति धर्मनिरतानपरानपीह
तेभ्योऽधिकोऽस्ति भुवि मानवभूषकः क ॥१०९॥

विस्तारयन्निजप्रकाशमलं यथा खे
सूर्यः करोति विमलः सततं विहारम् ।
तद्वद् भवे भव विहारपरो विकासम्,
कुर्वन् सदा सदुपदेशक, धर्मबुद्धेः ॥११०॥

धर्माचरणसंयुक्ता विद्याविनयभूषिताः ।
उत्तमा मानवा ज्ञेयास्तेऽनेकेषु नरेष्विह ॥१११॥

अरादिभिर्यथाचक्रं शोभतेऽतितरां तथा ।
मनुष्या भुवि शोभन्ते विविधैरुत्तमैर्गुणैः ॥११२॥

ईशभक्तिरताः सर्वे सुखिनः सन्तु मानवा ।
प्रचारकार्ये संलग्नाः मार्गाणां ज्ञानधर्मयोः ॥११३॥

स्वयं कुर्यात् सदा विद्वान् परैस्तत् कर्म कारयेत् ।
निवृत्तिर्येन दोषाणां वृद्धिर्बुद्धिबलायुषाम् ॥११४॥

दुष्टबुद्धीन् सुबुद्धीन् ये कुर्वन्ति विबुधास्तथा ।
श्येनवद्दुष्टनाशं ते जनाः कल्याणकारिणः ॥११५॥

सत्यप्रकाशका धूमयोनिवत् पापनाशकाः ।
यशस्विनो नरा दुष्टरोदकाः श्रेष्ठपालकाः ॥११६॥

त एव सन्ति विद्वांसो संसारहितकांक्षिणः ।
प्रसारयन्ति ये विद्यां सर्वत्र जगतीतले ॥११७॥

ऐश्वर्यवृद्धिमन्येषां ये कांक्षन्ति समागतान् ।
दृष्ट्वैश्वर्यवतो हृष्टा दयावन्तो नराश्च ते ॥११८॥

सर्वेषां रक्षणं शक्त्या बुद्धिशक्तिधनान्विताः ।
मानवा ये प्रकुर्वन्ति पारेदुःखं प्रयान्ति ते ॥११९॥

मनसा कर्मणा वाचा बुधा ये सत्यपालकाः ।
ते देवा विपरीताश्च राक्षसाः परिकीर्तिताः ॥१२०॥
ईश्वरस्य च यज्ज्ञानं तदाज्ञानाञ्च पालनम् ।
देवत्वाख्यां तदेवास्मिन् भजते जगतीतले ॥१२१॥
ये बुधा धर्मकार्येषु प्रेरयित्वा जनान् समान् ।
बुद्धियुक्तान् प्रकुर्वन्ति ते धन्याः सन्ति भूतले ॥१२२॥
आचरन्ति सदा धर्मं ये ते सर्वत्र संसृतौ ।
भूत्वा यशस्विनो यान्ति प्रसिद्धिमतुलां पराम् ॥१२३॥

परोपकारे निरता जना ये
भवन्ति धर्मैकधना जगत्याम् ।
भवन्ति ते नैव भयाभिभूताः
कदापि कुत्रापि कथञ्चिदस्याम् ॥१२४॥

मनः शरीरं द्रविणं च येषां
समस्तसंसारसुखाय जातम् ।
स्तुत्याः समस्ते जगतीतले ते
परोपकारे निरता भवन्ति ॥१२५॥

कुर्वन्ति मानं विश्वासं धार्मिकस्यारयोऽप्यलम् ।
सुहृदोऽपि न स्वप्नेऽपि धर्महीनस्य कुर्वते ॥१२६॥

पथ्याशिनो धर्मपरायणांश्च
प्रभोः पदार्थाः सुखयन्ति सर्वे ।
पापं कुपथ्यं विदधत्यजस्रं
ये ते सदा दुःखमवाप्नुवन्ति ॥१२७॥

प्रकाशयति हर्म्याणि यथाग्निर्दीपकादिभिः ।
तथैव धार्मिका लोका धर्मेण स्वकुलान्यलम् ॥१२८॥
निवारणं विपत्तीनां धृत्या धीमत्तया तथा ।
आप्तानामस्ति कर्तव्यं नराणां विपदागमे ॥१२९॥
बुधानां धर्मयुक्तानां साहाय्येन नरा भुवि ।
कर्तुमर्हन्ति श्रेष्ठानि कार्याणि सुमहन्ति च ॥१३०॥

सत्याचरणसम्पन्ना उपकारपरायणाः ।
ये ते जगति गण्यन्ते धर्मात्मसु नराः सदा ॥१३१॥
शरीरे घोरकर्माणि रागद्वेषौ मनःसु न ।
सेवकानां प्रभोर्येषां ते न नश्यन्तु धार्मिकाः ॥१३२॥
कृपापात्राणि संभूय धार्मिकाः परमात्मनः ।
लभन्ते विजयं, दुष्टा मानवा नैव जात्वपि ॥१३३॥
कुर्वन्ति व्यवहारं ये मित्रवत् सर्वदा समैः ।
धर्मात्मनां त एवात्र प्राप्नुवन्ति पदं नराः ॥१३४॥
पाठमात्रविदः श्रेष्ठा अजानद्भ्यो नराः परम् ।
सर्वोत्तमस्तु वेदार्थवेत्ता तद् विधिकारकः ॥१३५॥
परोपकारं कुर्वन्ति यथार्केन्दुधरादयः ।
जायन्तां मानवास्तद्वत् सदा परहिते रताः ॥१३६॥
विरोधभावनां त्यक्त्वा परार्थनिरता नराः ।
यदा भवन्ति जायन्ते सपत्नाः सुहृदस्तदा ॥१३७॥
परोपकृतिकारिभ्यो नृभ्यो द्रुह्यति यो नरः ।
दुःखीयति सदा सोऽत्र यः स्निह्यति सुखीयति ॥१३८॥
परमार्थप्रियाः सन्तः सन्तप्ता अपि संसृतौ ।
विसृजन्त्युपकारस्य करणं जातुचिन्नहि ॥१३९॥
दुष्टाचारान् नरान् रोगान् शत्रूंश्च विनिवार्य ये ।
सुखं ददति सर्वेभ्यो जगत्पूज्या भवन्ति ते ॥१४०॥
अहंकारजितो नास्ति कदापि पुरुषो महान् ।
अहंकारविजेतैव मन्तव्यः पुरुषो महान् ॥१४१॥
विद्वद्भ्यो यः समादत्ते विद्याधनमनुत्तमम् ।
सुशीलतां तथा ज्ञेयः स एव पुरुषो महान् ॥१४२॥
दाता निरन्तरं योऽस्ति नादाता जातुचिन्नरः ।
सत्यस्य शिक्षको ज्ञेयो महान् न परपीडकः ॥१४३॥

धार्मिकेषु भवेच्छान्तो दुष्टेष्वग्निभयंकरः ।
नरो धर्मपरो यः स गण्यते शक्तिसंयुतः ॥१४४॥
मृद्भ्यः स्वर्णादिकान् धातून् श्रेष्ठान् भूगर्भविद्यया ।
निष्कास्य मानवाः कुर्युरनाथपरिपालनम् ॥१४५॥
विचारशीला वेदानां वेत्तारः पुरुषार्थिनः ।
ये त एव नरा लोके लोकालंकृतयो मताः ॥१४६॥
उपकारपराः सर्वसंसारस्योपदेशकाः ।
प्रभुवन्न्यायशीला ये ते नरा लोकभूषणाः ॥१४७॥
युक्ताहारविहारा ये मानवा विजितेन्द्रियाः ।
सर्वर्तुषु लभन्ते ते सुखं पञ्चेन्द्रियैः सदा ॥१४८॥
रोगप्रमादसंहारकारकं बुद्धिवर्धकम् ।
विद्वन् भक्ष सदान्नं त्वं तद्विधं च पयः पिव ॥१४९॥
बुधाः श्रेष्ठस्वभावास्ते यथार्थस्य च भाषकाः ।
श्रियं दत्त्वा परेभ्यो ये स्वयमश्नन्ति भोजनम् ॥१५०॥
बुधाः पठित्वैकान्ते ये तद्विचारं प्रकुर्वते ।
विद्वांसो बुद्धिमन्तस्ते सन्ति योगिसमा भुवि ॥१५१॥
नरा यथार्थवक्तारो गच्छेयुर्येन वर्त्मना ।
तेनैव वर्त्मना यान्तु भवन्तो भद्रकामिनः ॥१५२॥
स्त्रियो नराश्च विद्वांसो धार्मिका गृहवासिनः ।
मुक्तिमुक्ताफलप्राप्तिमनायासेन कुर्वते ॥१५३॥
आलस्यं ये परित्यज्य यतन्ते शुभकर्मणाम् ।
करणाय श्रिया युक्ता जायन्ते ते न संशयः ॥१५४॥
कामुका लम्पटा नैव वन्दनीया जनाः जनाः !
वन्दनीयाः सुसेव्याश्च धर्मस्याचरणे रताः ॥१५५॥
प्रसन्नचित्ताः सुभगा यथा स्त्रियो
निजान् पतीन् यान्ति प्रमोदनिर्भराः ।

तथैव विज्ञानविभूषिता युता
सुविद्यया वाक् विबुधं निषेवते ॥१५६॥

नियमेन सज्जनानामनृतपरित्यागकारिणीं वाणीम् ।
सन्मार्गगामिनीं ये सेवन्ते नैर तद्धानिः ॥१५७॥

कामधेनुर्यथा कामधुग् जायते
दुग्धदध्यादिना सर्पिषा प्राणिनाम् ।
विद्यया श्रेष्ठया शिक्षया संयुताः
कामधुग् वाक् तथैवास्ति विद्यावताम् ॥१५८॥

छिनत्ति मेघावयवान् यथाशु
विद्युद् विनायासमलं प्रदीप्ता ।
सुशिक्षिता वाक् सुशुभा तथैवा-
विद्यांगजातं समसंशयांश्च ॥१५९॥

लभन्ते विजयं नूनं ते नरा जगदाहवे ।
विरोधं ये न कुर्वन्ति धार्मिकैः मानवैः सह ॥१६०॥

संगोपदेशौ श्रेष्ठानां लब्ध्वा न्यायं निरन्तरम् ।
करोति धर्मयुक्तं यो जयं स लभते नरः ॥१६१॥

छलछद्मविहीना ये धर्माचरणकारिणः ।
विद्यां ददति गृह्णन्ति त एव सुखिनो नराः ॥१६२॥

उत्पतन्तो यथाशक्ति खे पक्षिणो
यान्त्यपारस्य पारं न व्योम्नः क्वचित् ।
एवमेवात्र लोके क्षमा मानवाः
सन्ति लब्धुं न ज्ञानस्य पारंपरम् ॥१६३॥

अधर्माचरणं कार्यं विद्वद्भिर्न कदाचन ।
दातव्यश्चोपदेशोपि परेभ्यस्तत्कृते च न ॥१६४॥

साधयन्ति सुखोत्कर्षौ सुहृदां सुहृदो यथा ।
तद् वत् सर्वसुहृद् विद्वान् स्यात् सर्वसुखदायकः ॥१६५॥

अग्निर्यथा दहति सर्वतृणानि तूर्णं
माद्रर्ण्यपीह ज्वलितात्मशिखोःचयेन ।
तद्वद् बुधा अपि विनाश्य समस्त दोषान्
कुर्वन्तु नो गुणगणैः सहितान् समस्तान् ॥१६६॥

सत्योपदेशैर्विद्वांसो कृत्वा सर्वान् जनान् पृथक् ।
असत्याचरणात् कुर्युर्धार्मिकान् सत्परायणान् ॥१६७॥
अनुगच्छति गां वत्सो यथा तद् वद् बुधान् समे ।
अबुधा यान्तु कुर्वन्तु वशगानोन्द्रियाणि च ॥१६८॥
नान्योन्यहानिं कुर्वन्तु कृत्वेर्ष्यां विबुधा जनाः ।
प्रोत्या परस्परं सर्वे स्युः समुत्कर्षकारकाः ॥१६९॥
कायेन वाचा मनसा धनेन करोति सेवां विदुषां जनो यः ।
अवाप्य विद्यां लभते स मुक्ति भुक्त्वा पृथिव्या असपत्नराज्यम् ॥१७०॥
सर्वस्य जगतो विद्वान् उपकारपरायणः ।
अपकारमरीणां स विदधाति न जात्वपि ॥१७१॥
विदुषां प्रशंसनीयं कार्यमिदं केवलं जगति ।
पापस्य खण्डनं यत् यन्मण्डनमस्ति धर्मस्य ॥१७२॥
व्यवहारं यथायोग्यं कृत्वा दुःखस्य सागरात् ।
तारायाज्ञानिनां विद्वान् दृढनौकासमो भवेत् ॥१७३॥
विरलः स जनो लोके विज्ञाय परमेश्वरम् ।
उपदेष्टास्ति सत्यस्य तदाज्ञामनुसृत्य यः ॥१७४॥
पावना बुद्धिमन्तो ये वेदशास्त्रविदश्च न ।
करिष्यन्ति कथं तेऽन्यान् सुधियः पावनान् बुधान् ॥१७५॥
त आर्या ये नरा नैव मन्दा आलस्य संयुताः ।
तस्कराश्च, प्रकाशन्ते ते भासा भास्करोपमाः ॥१७६॥
अन्यायेनान्यहिंसां ये न कुर्वन्ति नरा भुवि ।
धर्माधाराः सुपुष्टास्ते लभन्ते विजयश्रियम् ॥१७७॥

यो विनम्रः सुशीलश्च वृद्धानां विदुषां तथा ।
सेवको, वर्धते तस्य कीर्तिरायुर्बलं मतिः ॥१७८॥
धर्मोपदेशका यावत् क्षमावन्न क्षमान्विताः ।
सहिष्णवश्च तावत् ते न स्युर्धर्मोपदेशकाः ॥१७९॥
विरुद्धबुद्धिमुत्पाद्य भ्रमं च मनुसन्ततौ ।
मिथो विनाशकरणं स्वभावो विदुषां नहि ॥१८०॥
जितेन्द्रियो धर्मपरायणो यो विद्वान् सतां संगतिकारकश्च ।
योगी सुशीलः पुरुषार्थयुक्तो, लोके परेऽस्मिंश्च स मोदते ना ॥१८१॥

कर्तव्यम्

अनलसाः पुरुषाः पृथिवीतले विबुधसंगतिलाभपरायणाः ।
सुनिरताः शुभकर्मसु सन्तु चेत् विलयमेष्यति तर्हि दरिद्रता ॥१८२॥
कुर्वन्ति कर्माणि शुभानि नित्यं तथा च दुष्टानि परित्यजन्ति ।
सन्तो यथा सर्वजनास्तथैव कुर्वन्तु मूर्खाननु नाचरन्तु ॥१८३॥
ईर्ष्येत् जातु न कस्मैचिन्नरो वित्तमदान्वितः ।
वृद्धिं परस्य संवीक्ष्य स्यादानन्दयुतः सदा ॥१८४॥
संसारे वृद्धिमाप्नोति विविधां मानवो रतः ।
सर्वेषां हितकार्येषु नेर्ष्यायाः कारकः क्वचित् ॥१८५॥
संसारे वित्तवन्तो ये ते वित्तरहितान् नरान् ।
संयोज्य विविधोद्योगे पालयन्तु निरन्तरम् ॥१८६॥
ईर्ष्याद्वेषौ परित्यज्य सर्वैरेव नरैः सदा ।
अन्योन्यस्य सुखोन्नत्यै चेष्टितव्यं प्रयत्नतः ॥१८७॥
न केवलं निजोन्नत्या सन्तुष्टः पुरुषो भवेत् ।
समेषामुन्नतावेव ज्ञातव्या स्वसमुन्नतिः ॥१८८॥
विद्या तथोत्तमा शिक्षा सन्तत्यै हितकारिणी ।
यादृशी तादृशो नास्ति क्रियान्या कापि भूतले ॥१८९॥
धर्म्याणि कार्याणि यथा विदध्युः बुधास्तथैवाखिलभूतसंघाः ।
समे च भूत्वैकधियो धरित्र्यां विद्यासुखोत्कर्षविधायकाः स्युः ॥१९०॥

विद्वज्जनवदसत्यखण्डनं कृत्वा मानव धारय सत्यम् ।
हित्वाऽविद्यां विद्यां धृत्वा सततं पालय निजकर्तव्यम् ॥१९१॥

संपालय मानव ! विभोः परमेश्वर-
स्यादेशं समस्तशुभकामसुपूरकस्य ।
कृत्वा श्रमं कुरु शरीरबलस्य चेतःशुद्धेः
श्रियोऽतिमहतीं पठनस्य सिद्धिम् ॥१९२॥

सम्यक् विमृश्य कार्याणि कर्माणि मनुजैः सदा ।
यानि कान्यपि कार्याणि दृढोत्साहसमन्वितैः ॥१९३॥

श्रेयस्कराणि कार्याणि शिक्षितव्यानि मानव !
दुरुदर्काणि दुष्टानि न स्वप्नेऽपि कदाचन ॥१९४॥

यानि बन्धनकारीणि पापकर्माणि दूरतः ।
तानि हित्वा विधेयानि पुण्यकर्माणि सर्वदा ॥१९५॥

विधातुं यानि कर्माणि परमात्मा बुधोऽथवा ।
समादिशेत् विधेयानि तानि हेयानि सन्त्यजेत् ॥१९६॥

निष्फला याः क्रियास्ता न विधेया जातु मानवैः ।
धर्मार्थकाममोक्षाणां विधेया याश्च साधिकाः ॥१९७॥

यशोवर्धकं धर्मयुक्तं सदैव त्वया कर्म कार्यं विदग्धाग्रगण्य ।
भवेद् येन प्राप्तं भवे भूरि भूरि सुखं सर्वतो दुःखलेशेन हीनम् ॥१९८॥

आज्ञैषा परमेश्वरस्य मनुजो यावच्च जीवेद् भुवि,
तावत् श्रेष्ठक्रियाकलापनिरतो रात्रिन्दिवं जायताम् ।
जीवेद् वर्षशतं परं न महतोऽरातेर्वशं जातुचिद्,
आलस्यस्य भवेद्, भवेद् यदि भवे कल्याणकांक्षा हृदि ॥१९९॥

यथा स्वस्मै तथान्यस्मै सुखमिच्छेत् सदा नरः ।
दुःखेच्छा न परस्मै स्यान्न तदिच्छा यथात्मने ॥२००॥

बलवृद्धिं यथा स्वस्य कामयन्तेऽखिला जनाः ।
वृद्धिमन्यबलस्यापि कामयन्तां तथैव ते ॥२०१॥

कामना कमनीया या निजकल्याणकांक्षिणा ।
न जातु संपरित्याज्या सा सर्वहितकारिणी ॥२०२॥

कुपथ्यं न नरः कुर्यात् पापस्याचरणं तथा ।
शारीरो मानसो वापि रोगो जायेत येन न ॥२०३॥
अधर्मात्मभिः पक्षपातेन युक्तैः
जनैरल्पविद्भिः कृताः क्षुद्रधीभिः ।
असत्यं वदद्भिर्विरुद्धा श्रुतिभ्यो
न मान्याः प्रमाणैर्विहीनाश्च ग्रन्थाः ॥२०४॥
धृत्वा मनुष्यस्य शरीरमत्र विद्यां सुशिक्षां मधुरं स्वभावम् ।
धर्मं च भोगं विधिवद्गृहीत्वा यतस्व मुक्त्यै सफलश्च भूयाः ॥२०५॥
धार्मिकेषु पुरुषेषु विधेयो नास्त्रपातनविधिर्विधिवर्ज्यः ।
दुर्जनेषु पुरुषेषु विधेयः सौख्यवृद्धिकरणाय ध्रुवं सः ॥२०६॥
आचारमसतां त्यक्त्वा संगेन विदुषां नराः ।
आराधनेन धर्मे स्युः प्रवृत्ताः परमात्मनः ॥२०७॥
दुःखं दत्वा न कस्मैचित् सुखस्यानुभवं कुरु ।
सुखिनः सकलान् कृत्वा विद्ध्यात्मानं सुखैर्युतम् ॥२०८॥
मनुष्याः यत्र कुत्रापि गन्तुमिच्छथ गच्छथ ।
नीतित्यागः परं क्वापि विधेयो नायशस्करः ॥२०९॥
अर्जयन्ति यथा वित्तं धार्मिका मानवास्तथा ।
अर्जयेयुः समे धर्ममाचरन्तो जना धनम् ॥२१०॥
धनाढ्या मानवाः सन्ति ये केऽपि वसुधातले ।
धर्मस्तेषां दरिद्राणां पालनं परमः स्मृतः ॥२११॥
कृतं न जायते कर्म जगत्यां जातु निष्फलम् ।
एवं मत्वा रुचिर्धर्मेऽधर्मे धेयाऽरुचिः सदा ॥२१२॥
निजात्मनः समुन्नत्यै भीतोऽधर्मात् भवेत् सदा ।
स्थितश्च निश्चलं धर्मे श्रेयस्कामो भवेत् सदा ॥२१३॥
आचरन्तः स्वकं धर्मं त्यक्त्वा पापांश्च दूरतः ।
साधयेयुश्चतुर्वर्गमीशोपासनया भृशम् ॥२१४॥
ईशसृष्टौ यथा स्वीये मार्गे सूर्यादयो गतिम् ।
कुर्वन्ति कुर्वतां तद्वत् मानवा धर्मवर्त्मनि ॥२१५॥

साम्राज्यमिच्छेदनृतेन लब्धं स्वप्ने न धर्माचरणं विहाय ।
गच्छन्ति गच्छन्त्वसवः परं न त्याज्योऽस्ति धर्मः सुखदुःख हेतोः ॥२१६॥

कुर्यु रारोग्यविस्तारं यथायोग्याशनैर्नराः ।
श्रमैश्च विविधैः स्वीयपरोपकृतिसिद्धये ॥२१७॥

विधेयं हिंसनं नैव गवादिप्राणधारिणाम् ।
न च कारयितव्यं तद् दद्यान्नानुमतिं तथा ॥२१८॥

पशूनामुन्नतिं पुष्टिं ये प्रकुर्वन्ति मानवाः ।
अप्रयासं लभन्तेऽत्र विविधानि सुखानि ते ॥२१९॥

पानाशनवन्नित्यं व्यायामो मानवेन करणीयः ।
बली प्रसन्नो मुदितो निःसारो निर्बलो रुग्णः ॥२२०॥

नरा अकृत्वा बलिवैश्वदेवं यज्ञे गृहे येऽशनमाचरन्ति ।
ते मानवा नैव विदन्ति मूढा यत्ते गवां मांसमदन्ति नूनम् ॥२२१॥

बाल्यावस्थाविवाहेन यावान्नष्टो भवेन्नरः ।
ततोऽधिकतरा नष्टा नारी तावद् विजायते ॥२२२॥

केवलं नात्मनः कुर्यान्मानवो बलवर्धनम् ।
परेषामपि तत् कुर्याद् ब्रह्मचर्यादिसाधनैः ॥२२३॥

हिंसातास्कर्यविश्वासविघातसदृशैः समैः ।
कर्मभिः प्राप्य वस्तूनि यो भोगोऽभक्ष्य एव सः ॥२२४॥

अहिंसया तथा धर्मकर्मभिः प्राप्य मानवैः ।
वस्तूनां क्रियते भोगो यो ऽसौ भक्ष्यः प्रकीर्तितः ॥२२५॥

पदार्थैर्यैर्वृद्धिर्भवति बलबुद्ध्योरतितराम्,
विनाशो रोगाणां विलसति च स्वास्थ्यं सुखकरम् ।
भवत्यायुर्दीर्घं फलकुसुमकन्दाज्यपयसां
पदार्थानां भक्ष्यं मितमशनमन्नस्य कथितम् ॥२२६॥

अनादरं कोऽपि बटुर्बुधानां बुधा बटूनां न कदापि कुर्युः ।
भवन्तु सर्वे सुहृदो विहाय क्रोधं तथेर्ष्यादिसमस्तदोषान् ॥२२७॥

पर्याप्तता न वर्षाया रोगाणामल्पता च न ।
रक्षया वनवृक्षाणां विना जात्वपि जायते ॥२२८॥

रक्षकेभ्यो वनादीनां दद्युरन्नादिकं जनाः ।
उन्नतिं च सदा कुर्युरोषधोनां च भूरुहाम् ॥२२९॥
वनस्पतिद्रुमाणां च श्रेष्ठानां तु कदाचन ।
नाशः, कार्यो न कार्यश्च दोषनाशः शुभावहः ॥२३०॥
भो मानवाः ! जगति या त्रिविधास्ति वाणी,
सा सर्वदैव सकलैः पुरुषैर्वरेण्या ।
सत्या तथा सुमधुरातिसुसंस्कृता च,
सद्विद्यया विविधया वरशिक्षया च ॥२३१॥
मनुष्यो मनुष्यः स नैवास्ति लोके,
वशे मानसं चञ्चलं यस्य न स्यात् ।
न वा यस्य वाणी वरेण्या वशे स्यात्
सुधाधारया मानवाह्लादकर्त्री ॥२३२॥
न मानवेन केनापि गोपनीया कदाचन ।
विद्या प्रकाशनीया सा जगद्धितकरी सदा ॥२३३॥
विद्यामवाप्य नान्येभ्यो ये तां यच्छन्ति मानवाः ।
क्षुद्राशययुतास्तेऽत्र भवन्त्यत्यन्तपापिनः ॥२३४॥
सदैव सत्कारपरायणाः स्युः प्रभोर्बुधानां मनुजाः समस्ताः ।
लाभोऽस्तिविद्यासुखयोः परस्मात् यस्मान्न कस्मादपि जीवलोके ॥२३५॥
विद्वद्वदेव कार्याणि कुर्वन्तु निखिला जनाः ।
नाचरन्तु यथा मूर्खा आचरन्त्यविवेकिनः ॥२३६॥
अपृष्टभाषणं ज्येष्ठगोष्ठीषु च विनाज्ञया ।
भाषणं नार्यमर्यादानुकूलं वर्तते यथा ॥२३७॥
पृष्ठदानं तथा मान्यव्यक्तिभ्योऽभिमुखं तथा ।
तेषामनुचितं पादौ प्रसार्य शयनं महत् ॥२३८॥
नरा बाहुबलं पुष्टिमंगानां दुष्टताडनम् ।
न्यायप्रकाशनं चैव सदा कुर्वन्तु यत्नतः ॥२३९॥
असत्यश्रवणं मिथ्याप्रशंसाप्रार्थनास्तुतोः ।
दोषाणां दर्शनं कुर्याद् व्यभिचारञ्च जातु न ॥२४०॥

संगं विहाय मनुजा असतां सतां ये
संगं भजन्ति भुवि ते हि विभूतिमन्तः ।
सिद्ध्यै नरा अनलसाः सततं यतन्ते
ये ते भवन्ति सुखिनोऽसुखिनः प्रतीपाः ॥२४१॥

धर्मात्मभिः प्रीतिपरायणाः स्युः दुष्टैस्तथाऽप्रीतिपरायणाःस्युः ।
हृदा च तेषामपि कामयन्तां हितं नराणामसतां मनुष्याः ॥२४२॥

कर्मणा येन येन स्याद् वृद्धिः कायात्मनोः सदा ।
ऐश्वर्यस्य, विधेयानि तानि कर्माणि सर्वदा ॥२४३॥

निघ्नन्तु न नरा जातु गवादीनुपकारकान् ।
यापयन्तु न कालं च व्यर्थं श्रेष्ठैर्मिलन्तु च ॥२४४॥

नराः! सर्वमित्राणि भूत्वा भवन्तु
भवन्तः सदा सौख्यदाधेनुतुल्यम् ।
नदीवन्मलं चाशु कुर्वन्तु दूरे
सुबुद्धिप्रदाः कामनापूरकाश्च ॥२४५॥

देवमन्दिरनिर्माण विचारं परिहाय तु ।
धर्म-कर्मणि कस्मिंश्चित् कुरु स्वीयधनव्ययम् ॥२४६॥

नात्मनो न परस्याथ कल्याणं येन संभवेत् ।
अज्ञानगर्तनिर्माणं निर्माणं मन्दिरस्य हि ॥२४७॥

महर्षिरेकदा तन्तुवायमेकमुपादिशत् ।
सदाचारपरो भूत्वा यापय त्वं स्वजीवनम् ॥२४८॥

वयित्वा देहि तन्तुं त्वं तावत् यावत् समर्पितम् ।
केनापि व्यवहारोऽयं ते कल्याणकरः सदा ॥२४९॥

लघुतां लघवो कुर्युर्यदि त्याज्यं तथापि न ।
स्वमहत्वं महद्भिस्तु क्षम्यास्तु लघवः सदा ॥२५०॥

सन्तत्या वैमनस्यं तु सांसारिकसुखाध्वनि ।
कष्टं ददाति नितरां तीक्ष्णकण्टकवन्महत् ॥२५१॥

मदीयकथनं मत्वा स्वचरित्रं समुन्नतम् ।
परोपकारिणो यूयं यदि सर्वे करिष्यथ ॥२५२॥

शरीरेण वियुक्तोऽपि मनसा चात्मना तथा ।
समीपे भवतामेव भविष्यामि न संशयः ॥२५३॥ युग्मकम्

जडे देहे निजं कार्यं विदधाति जडं ज्वरम् ।
स्वीयं ज्ञानात्मकं कर्म त्यजेयं चेतनः कथम् ॥२५४॥

सत्यासत्यविवेकस्तु मन्दीभूतोऽस्ति साम्प्रतम् ।
तत्सुधारकृते कोलाहलमेतं करोम्यहम् ॥२५५॥

व्यायामः सर्वदा कार्यः सर्वैर्भक्षणपानवत् ।
बलिनः सुखिनः सन्ति बलहीनाश्च दुखिताः ॥२५६॥

जीवनं बलहीनानां सारहीनं निरर्थकम् ।
निकेतनञ्च रोगाणां मतं नरकसन्निभम् ॥२५७॥

द्वेषः शाम्यति न द्वेषैः नानलेन यथानलः ।
शान्त्या जलेन तौ शान्तौ यथाशु भवतः स्वयम् ॥२५८॥

तथापमानकर्त्ता ना नापमानेन जात्वपि ।
सन्मार्गमेति सम्मानदानेनैति न संशयः ॥२५९॥

मिथ्यापक्षमुरीकृत्य विग्रहः प्रतिपक्षिभिः ।
धार्मिकैः पुरुषैः कार्यो न स्वप्नेऽपि कदाचन ॥२६०॥

कस्मैचिदपि दातव्यं नामृतं विषमिश्रितम् ।
सत्यस्य गूहनं पापं सत्यमन्ते विजेष्यते ॥२६१॥

न मया निर्मितं सत्यं तत्सृष्टं परमात्मना ।
मृत्योरपि भयं कार्यं तस्य प्रकटने कथम् ॥२६२॥

वैरं विरोधमुत्सृज्य सत्यासत्यविनिर्णयः ।
विद्यते विदुषां धर्मो नासत्यकटुभाषणम् ॥२६३॥

भवेत् सर्वशुभाकांक्षी विमुक्तो फलचिन्तया ।
विनायासमवाप्नोति साफल्यफलमुत्तमम् ॥२६४॥

मनःस्थैर्यं मतेः शक्तेर्वृद्धिर्व्याधेः क्षयस्तथा ।
प्राणायामविधानेनानायासमुपजायते ॥२६५॥

कदाचिदेकापि कपर्दिकेयं न्यूना हि हानिं महतीं करोति।
अतो व्यये काणवराटिकाया नासावधानेन नरेण भाव्यम् ॥२६६॥

दयामिच्छन्ति कर्तुं ये मक्षिकामशकादिषु।
भीरवस्ते रणे प्राप्ते किं करिष्यन्ति मानवाः ॥२६७॥

नैकस्याः खण्डनं मूर्तेः सकले जीवने मया।
कृतं करोम्यहं किन्तु मूर्तिपूजनखण्डनम् ॥२६८॥

जीवितानां हि पितॄणां श्रद्धाभक्तिसमन्वितः।
समादरः परो धर्मः सर्वेषां विद्यते नृणाम् ॥२६९॥

कर्तव्यं निजकर्तव्यं मिश्रितैरेषु हिन्दुषु।
एषु वैदिकधर्मस्य प्रचारोऽपि विधीयताम् ॥२७०॥

निजा इमे न हातव्या घृणावैरपरा अपि।
स्वधर्मधारणानिष्ठैरन्ते युष्मत्स्वधर्मिणः ॥२७१॥

हृदयानि कठोराणि वयं भारतवासिनाम्।
मृदूनि कर्तुमिच्छामस्तथाकृष्टान् प्रधावतः ॥२७२॥

उदात्तोद्देश्यमालक्ष्य स्वीयं तेषामनीतयः।
अत्याचाराश्च सोढव्या अस्माभिः स्नेहसंयुतैः ॥२७३॥

तिलेषु तैलवद् व्याप्तमात्मनीशोऽस्ति सर्वतः।
आत्मज्ञाने ततो जाते ज्ञायते परमेश्वरः ॥२७४॥

पुरुषो न तिरस्कार्यो जगत्पतिकृतिर्हि सः।
शिष्टस्तेषु विशेषेण कदाचिदपि केनचित् ॥२७५॥

दुःखनाशः; सुखप्राप्तिः

जीवाः स्वभावेन सुखोपलब्धिं वियोगमिच्छन्ति च दुःखराशेः।
परं न तावत् सुखिनो न यावत् त्यजन्त्यघं धर्ममथाचरन्ति ॥२७६॥

विद्याशरीरशक्त्योश्च विनोन्नत्या न जायते।
कदापि सुखसम्पत्तिवृद्धिः संसारवर्त्मनि ॥२७७॥

बलबुद्धिनाशको व्यवहारः बहुविषयासक्तिर्व्यभिचारः ।
यादृशो विद्यते संसारे तादृशः कोऽपि नान्योऽपारे ॥२७८॥

शारीरामात्मिकां शक्तिं मानवा ये दिने दिने ।
वर्धयन्त्यरयस्तेषां पलायन्ते भयाप्लुताः ॥२७९॥

भाग्यहीना नरा येऽखिलैश्वर्यदं वन्दनीयं सुसेव्यं जगद्धारकम् ।
स्तुत्यमीशं सुशिक्षाप्रदं प्रेरकं कुर्वते हन्त हित्वा परोपासनाम् ॥२८०॥

आनन्दाम्बुधिमग्नोऽसौ सदा भवति मानवः ।
कठोरभाषणं हित्वा लोके यो मृदु भाषते ॥२८१॥

मद्यादिसेवनान्मुक्तिर्न स्वप्नेऽपि विजायते ।
दुःखावाप्तिर्विनाशश्च ज्ञानस्य भवतश्चिरम् ॥२८२॥

मया परीक्ष्यैव सुनिश्चितं यद् धर्मानुकूलव्यवहारशीलः ।
सुखं सदाप्नोति तथा विरुद्धो दुःखी स्वहानिं कुरुते सदैव ॥२८३॥

योगाभ्यासविधानाद् व्यायामौषधिनिषेवणाच्चैव ।
मनुजाः प्रणाश्य रोगान् सततं सुखिनो भवन्तु नीरोगाः ॥२८४॥

सांसारिकैः पदार्थैः सुखमनवाप्यं सदा विना विद्याम् ।
ईशाराधन—विद्वत्संगाभ्यां तामवाप्य तत् प्राप्यम् ॥२८५॥

विरोधपरिहारेण विना कोऽपि न मानवः ।
परस्परसुखं लब्धुं समर्थो जायते भुवि ॥२८६॥

परित्यज्य प्रभुं नान्यः रक्षकः कोऽपि विद्यते ।
सुखसाधनदाता च ज्ञेयमेतत् सदा जनैः ॥२८७॥

अन्योन्यवृद्धिकार्येषु भवन्ति निरता नराः ।
ये वृद्धिं ते लभन्तेऽत्र सर्वदा सर्वतोमुखीम् ॥२८८॥

ज्ञानस्य सत्याचरणस्य वाञ्छां त्यागस्य चाधर्मकृते जना ये ।
कुर्वन्ति, कुर्वन्ति परोपकारं, धन्या नरास्तत्सदृशा भवेम ॥२८९॥

त्वदीये हृदि यद्यस्ति निजकल्याणकामना ।
विधेहि त्वं ऋजुर्भूत्वा सन्मार्गस्यावलम्बनम् ॥२९०॥

गवां संरक्षणं वेदप्रतिपाद्यविधेस्तथा ।
आवश्यकः प्रचारोऽस्ति जगत्कल्याणसिद्धये ॥२६१॥
प्रणवस्य जपं कुर्यादहोरात्रमतन्द्रितः ।
मानवोऽनुक्षणं योऽयं बुभूषति जितेन्द्रियः ॥२६२॥
यावन्नाल्पीक्रियन्तेऽत्र स्वीयावश्यकता भवे ।
पूर्णस्वतन्त्रतावाप्तिः सम्भाव्या तावदस्ति न ॥२६३॥
आत्मीयैर्मित्रता जातु नैकधर्मादिकं विना ।
विना तां जायते नैव सन्ततं वाञ्छितं फलम् ॥२६४॥
शक्त्यारोग्यप्रदं खाद्यं खादेदन्यांश्च खादयेत् ।
पशूनां पुरुषाणाञ्च सुखशक्तिविवर्धनम् ॥२६५॥
कुर्यात्, येनेश्वरस्यास्याः सृष्टेर्योऽस्ति शुभः क्रमः ।
तदानुकूल्यतो सम्यक् स्यातां सर्वसुखोन्नती । २६६॥ युग्मकम्
मिथ्या जगदिति बोधस्वीकरणादुन्नतौ ध्रुवं जगतः ।
विद्यावाप्तिपरस्पररागे श्रद्धासमुद्योगौ ॥२६७॥
नाशं यातः सुतरां जगतः श्रेष्ठानि पुण्यकर्माणि ।
सर्वाण्येव च तस्मान्नष्टभ्रष्टानि जायन्ते ॥२६८॥ युग्मकम्
समर्थो मानवो नैव भविष्यति सुखाप्तये ।
गुणैर्विना भवे जातु स्वेन्द्रियाणां जयादिकैः ॥२६९॥
विद्यां श्रियं समधिगत्य सुहृद् वरांश्च,
संप्राप्नुवन्ति मनुजास्तु यथा सुखानि ।
तद्वद् बुधा अपि विदन्ति निजस्वरूपम्
ये ते सुखानि निखिलानि समाप्नुवन्ति ॥३००॥
आप्तेभ्यः सत्यवादिभ्यो धर्मिभ्यो ज्ञभ्य एव च ।
द्रुह्यन्ति ये नरा दुःखं महत्ते प्राप्नुवन्त्यलम् ॥३०१॥
यावन्तं जगतः कश्चिदुपकारं करिष्यति ।
स सुखं लप्स्यते तावत् परमेशव्यवस्थया ॥३०२॥

दानम्

लोकेऽस्मिन्नुत्तमो दाता ग्रहीता मध्यमः स्मृतः ।
चौर्येण लभते यस्तु सोऽधमः समुदीरितः ॥३०३॥
सद्विद्यादिपदार्थानां दातारोऽनुपमं यशः ।
अधिगत्यात्मनोऽन्यांश्च सुखिनः कुर्वते नराः ॥३०४॥
सुपात्रदानतः कीर्तिः संसारे यादृशी भवेत् ।
उपायान्तरतो नैव तादृशी ख्यातिरुत्तमा ॥३०५॥
संसारस्योपकाराय सुपात्रेभ्यो ददाति यः ।
तदीयकुलतो नाशं वसु नैति कदाचन ॥३०६॥
विद्यां यथा नरोऽन्येभ्यो लभते तां तथैव सः ।
अन्येभ्योऽपि स्वयं दद्यान्न धर्मोस्मात् परः स्मृतः ॥३०७॥
दानं यथार्थं च तदेव बोध्यं विद्याप्रसाराय कलाविवृद्ध्यै ।
यद्दीयतेऽनाथसुदीनरोगिकुष्ठार्तिसंपीडितमानवेभ्यः ॥३०८॥
दुर्भिक्षादिविपत्काले सर्वे सन्त्यधिकारिणः ।
जलान्नवसनस्थानचिकित्सादेश्च देहिनः ॥३०९॥
संसारे दानशीलो यः स एवास्त्यखिलप्रियः ।
विरोधं मानवः कोऽपि नहि तस्य चिकीर्षति ॥३१०॥
रागद्वेषविहीनाः परगुणविहितादरास्तथा दाने ।
आत्मसमानन्यानपि कुर्वन्तो जगति धनवन्तः ॥३११॥
दानं वस्त्रफलादीनां व्याख्यानेषु कलासु च ।
आर्षरीत्यनुकूलं न नोचितं त्याज्यमस्त्यतः ॥३१२॥
दानं न केवलं तस्मै ददात्याह्लादसन्ततिम् ।
यस्मै प्रदीयते दात्रे पुरुषायापि यच्छति ॥३१३॥

दीर्घायुःसाधनम्

ब्रह्मचर्यात् सदाचारनियमानाञ्च पालनात् ।
आयुः कर्तुं नरः शक्तस्त्रिगुणं च चतुर्गुणम् ॥३१४॥

युक्ताहाराविहारस्य ब्रह्मचर्यस्य वर्जनात् ।
व्यभिचारेण भोगेषु चासक्त्यायुर्न नाशयेत् ॥३१५॥
न्यायवान् यः सहिष्णुर्वशी मानवः सेवते भेषजं वर्तते शक्तितः ।
भोजने वा विहारे. शतायुर्नरो जायते सोऽत्र सन्देहलेशोऽपि न ॥३१६॥
यः प्रभुं सत्यवाचं तथाप्तं बुधं सेवते दुष्टसंगेन हीनो नर. ।
सच्चरित्रः स प्राप्नोति दीर्घायुषं धान्ययुक्तो धनैरक्षयैः संयुतः ॥३१७॥
प्रातः शयानस्य विभातवेला शनैः शनैरायुरपाकरोति ।
अतो विबुध्योषसि कार्यजातं धर्मस्य विद्योपकृतेश्च कुर्यात् ॥३१८॥
तुरीये प्रहरे बुध्वा निशायाः शयनावधि ।
क्षपयन्ति न ये कालं व्यर्थं ते सुखिनो नराः ॥३१९॥
सूर्योदयात् समुत्थाय प्रागेव बलवान्नरः ।
विदधाति परित्यागं दारिद्रस्य सुखावहम् ॥३२०॥
पूर्णेन ब्रह्मचर्येणाधीतविद्यान् सुधार्मिकान् ।
नरान् मध्ये न गृह्णाति कदाचिन्मरणं ध्रुवम् ॥३२१॥
यावत् शरीराणि दृढानि नैव,
न चाप्तसंगो मतयश्च पूताः ।
वशित्वपूर्णश्च न यावदायु-
स्तावत् कथं श्रीरतुला च विद्या ॥३२२॥

पुण्यं पापं च

न्यायस्याचरणं ब्रह्मचर्यं सत्यस्य भाषणम् ।
धर्मोऽधर्मश्च सत्यस्य त्यागोऽन्यायस्य सेवनम् ॥३२३॥
मानवैः सकलैः सार्धं परोपकृतये सदा ।
व्यवहारोऽस्ति चारित्र्यमौदार्यप्रीतिपूर्वकम् ॥३२४॥युग्मकम्
त्यागं यथा सपत्नानां सत्वरं कुरुते नरः ।
अन्यायाचरणं पापं तथा तूर्णं परित्यजेत् ॥३२५॥
उच्छेदनेन मूलानां नश्यन्ति तरवो यथा ।
तथा दुःखानि पापानां त्यागेनात्र न संशयः ॥३२६॥

स्वभावो धनस्यास्त्ययं यद् विवृद्धं
धनं मानवं कर्महीनं शयालुम् ।
तथालस्ययुक्तं विधत्ते, विधेयं
नरैः पौरुषं वित्तवद्भिः सदैव ॥३२७॥

सज्जानानां सदा सम्पत् परेभ्यः सुखदायिका ।
दुष्टानां च परेभ्योऽस्ति केवलं दुःखदायिका ॥३२८॥

न्यायेनोपार्जितं द्रव्यं सफलं तस्य विद्यते ।
न्याय्ये येन कृतस्तस्य व्यवहारे व्ययः शुभः ॥३२९॥

धर्मेण लभ्यते यस्तु स एवार्थो निगद्यते ।
यस्यावाप्तिस्त्वधर्मेण सोऽनर्थो नात्र संशयः ॥३३०॥

पतिः पत्नी च

परस्त्रीरतो यः परित्यज्य पत्नीं
सुखं क्वापि नाप्नोति ना सः प्रमादी ।
स्वपत्नीप्रियो यः परस्त्रीविरक्तः
इहामुत्र चाप्नोति सौख्यं परं स ॥३३१॥

धर्मपत्न्याः स्वकीयाया नानिष्टं चिन्तयेन्नरः ।
नानिष्टं चिन्तयेन्नारी पत्युः स्वस्य कदाचन ॥३३२॥

जायापती कुले यस्मिन् प्रीतिपूर्णौ परस्परम् ।
विषयेषु समस्तेषु कल्याणं तत्र जायते ॥३३३॥

या नार्यो ये नरा ईशं ध्यात्वा प्रीत्या परस्परम् ।
भाषन्तेऽनेकरूपाणि प्राप्नुवन्ति सुखानि ते ॥३३४॥

आन्योन्यमानं या नार्यो मानवा ये च कुर्वते ।
तत्कुले सुखमायाति दुःखं दूरं पलायते ॥३३५॥

सत्क्रियन्ते स्त्रियो यत्र तत्र विद्यायुता नराः ।
देवसंज्ञाः सदा क्रीडां सानन्दं कुर्वते गृहे ॥३३६॥

तिरस्कृतास्तु ता यत्र गृहे तत्र समाः क्रियाः ।
निष्फला एव जायन्ते नानन्दं कोऽपि विदन्ते ॥३३७॥युग्मकम्

धर्मपत्नी शुभाचारविधानविहितादरा ।
सौभाग्यसम्पदां वृद्धिं कुरुते नात्र संशयः ॥३३८॥
नरस्यैकस्य नार्येका स्त्रियश्चैक पतिर्भवेत् ।
वेदरीत्या विवाहश्च द्विजानां न पुनर्भवेत् ॥३३९॥
पतिं यथोत्तमा पत्नी करोत्यानन्दनिर्भरम् ।
ब्राह्मवेला जगत् सर्वं तद्वदत्र न संशयः ॥३४०॥
न्यायं कुर्वन्तु नारीणां न नरास्ता यतो भिया ।
लज्जया तत्पुरो वक्तुं पठितुं सन्ति न क्षमाः ॥३४१॥

अधार्मिकाः

संप्राप्तिं सत्यविद्याया ज्ञानं धर्मस्य जात्वपि ।
कर्तुं नैव क्षमाः सन्ति नराः कामातुरा भुवि ॥३४२॥
अधार्मिका नरास्तेऽत्र ये सन्त्यनृतवादिनः ।
धार्मिकाः सन्ति ते सन्तः सन्ति ये सत्यवादिनः ॥३४३॥
हानिर्मिथ्याप्रतिज्ञस्य यादृशी तादृशी भुवि ।
कस्यापि न परस्यातः पूरयेत् संगरं सदा ॥३४४॥

निर्भयः

परोपकारे निरता जना ये
भवन्ति धर्मैकधना जगत्याम् ।
भवन्ति ते नैव भयाभिभूता
कदापि कुत्रापि कथञ्चिदस्याम् ॥३४५॥
जन्मिना नैव केनापि कार्यं मृत्युभयं यतः ।
निश्चिते मरणे मौर्ख्यं मरणाद् भयमुच्यते ॥३४६॥
कारावासोऽस्ति सत्याय न लज्जाजनकः क्वचित् ।
धर्ममार्गसमारूढः संजातो निर्भयोऽस्म्यहम् ॥३४७॥

विद्या वेदाधिकारी

विद्यां प्राप्तुं तु संसारे सन्ति सर्वेऽधिकारिणः ।
विद्यायां मानवो विज्ञैर्न ज्ञेयाऽनधिकारिणो ॥३४८॥

स्त्रीशूद्रावपि किं वेदं पठेतां ? सकला नराः ।
स्वपितुः पावनीं वाणीमध्येतुमधिकारिणः ॥३४९॥
धर्मविद्याप्रचाराय ब्राह्मणा ज्ञानसंयुताः ।
प्रभवः केवलं सम्यक् ते तत्कार्याधिकारिणः ॥३५०॥
यदि पापविपाकास्ति विद्या सा पुरुषैरपि ।
अवश्यं संपरित्याज्या स्त्रीभिरेव न केवलम् ॥३५१॥
मूढा अशिक्षिता एव पापं कुर्वन्ति मानवाः ।
स्त्रीषु विद्याप्रचारोऽतः करणीयो जनः समैः ॥३५२॥
निषेधं यदि शूद्रेभ्यो ब्राह्मणेभ्यो विधिं यदि ।
वेदानामीश्वरः कुर्यात् पक्षपाती भवेन्न किम् ॥३५३॥
पाठनं पठनं वेदवाण्या इष्टं भवेन्न चेत् ।
शूद्रेभ्यस्तर्हि तत्काये वाक्श्रुत्योर्निर्मितिः कथम् ॥३५४॥
अग्निवाय्वादयः सर्वे पदार्था निर्मिता यथा ।
सर्वेभ्यः परमेशेन वेदा अपि तथा न किम् ॥३५५॥

तीर्थम्

प्राणादावतिनिष्ठया वितनुते जीवो गयासंज्ञके
ईशोपासनमाशु मुक्तिपदवीमाप्नोति तेनैव सः ।
प्राणेष्वेव वलं च सत्यमुभयं सम्यक् स्थितं विद्यते
प्राणानामपि प्राणताऽस्ति सुतरां यस्मात् परब्रह्मणि ॥३५६॥
तस्यास्ति प्रतिपादकोऽतिमुखरो मन्त्रो गुरुर्गौरवात्,
तन्नामाऽस्ति गयेति तस्य जपनं सार्थं तथा श्रद्धया ।
दुःखैर्भक्तिसमन्वितं बहुविधैरीशस्य जीवं पृथक्
कृत्वा मुक्तिसुखं ददाति महितं काम्यं समस्तैर्बुधैः ॥३५७॥
प्राणानाञ्च निघण्टुसूचिलिखिता संज्ञा गया विद्यते,
प्राणायामविधानतो नियमितान् कृत्वा च तान् पूर्णतः ।
भक्त्येशस्य भवन्ति दुःखरहिता विज्ञानवन्तो नराः
गायत्र्यस्ति गया सदा भवति सा मुक्तिप्रदा सौख्यदा ॥३५८॥

सुखस्योन्नतिः सज्जानां च रक्षा प्रजापालनं दुष्टसंदण्डनं च।
ऋतस्योद्गतिः सर्वविद्याप्रचारो गयाश्राद्धमेतत्पृथक्संगतं च ।।३४९।।
वेदादिशा त्राध्ययन तथा च तत्पाठनं सत्यमुदीरणश्च ।
सेवा गुरोरीश्वरसन्निधानं सुसंगतिः ब्रह्मविचारणा च ।।३५०।।
तीर्थान्यपारस्य नयन्ति पारं दुःखोदधेः सर्वनरानिमानि।
अन्यानि तीर्थानि नयन्ति यानि पारं समुद्रादिजलाशयानाम् ।।३६१।।
कस्मिंश्चिदपि तीर्थे न पापं नश्यति मज्जनात्।
योगेन तपसा शुद्धसंकल्पेनैव नश्यति ।।३६२।।

तपस्त्यागौ

सत्यांगीकरणं यथार्थकलनं सत्यस्य संभाषणम्
वेदादिश्रवणं मनोनियमनं पापाच्च श्रुत्यादिकम्।
रुध्वा श्रेयसि योजनं बुधजनैः संगं च क्रोधादिक-
त्यागं चाशु विधाय शान्तभवनं विद्यादिपूज्यान् गुणान् ।।३६३।।
पात्रेषु प्रणिधाय यज्ञकरणं भूम्यन्तरिक्षस्थितान्,
ज्ञात्वा सर्वपदार्थकान् निजधिया शक्त्या च योगे मतिम्।
कृत्वा यत् समुपासनं भवपितुर्नित्यं परब्रह्मणः
प्राणायामविधानमेतदखिलं पूतं तपः कथ्यते ।।३६४।।कुलकम्
स्व सुखानां परित्यागो जीवनस्यापि कथ्यते ।
त्यागः सर्वोत्तमः सत्यपरोपकृतये तथा ।।३६५।।

अतिथिः

सत्योपदेशैः परमोपकारं नृणां समेषां विदधत्यलं ये ।
धनान्नदानैः प्रियवाक्प्रदानैस्ते सत्क्रियार्हाः पुरुषा भवन्ति ।।३६६।।

आचार्यः

अत्याचाराननर्थांश्च त्याजयित्वा विवेकतः ।
ग्राहयेद् यः सदाचारमाचार्यः स निगद्यते ।।३६७।।
यः शिक्षां व्यवहारस्य शिष्येभ्यो धर्मसम्मताम्।
स्नेहेन महता दत्ते स आचार्यो निगद्यते ।।३६८।।

अकालजलद !

(डा० रमाकान्त शुक्लः, ६ वाणी-विहारः, नयी दिल्ली-११००५९)

अकालजलद ! त्वया किमिति निन्द्यमाचर्यते ?
कृषीवलपरिश्रमः कथमहो त्वया नाश्यते ?
निपात्य करकाचयं परिणतेषु सस्येषु हा
त्वया किमिति तुद्यते वद पयोद ! पृथ्वीमनः ॥ १ ॥

निदाघतपनज्वलद्वसुधया यदाकारित-
स्तदा त्वमगमः क्वचिद्वसुमती त्वया शोषिता ।
यदा च वसुधासुतैः श्रमभरैः प्रयासैर्निजै-
ररक्षि कृषिसन्ततिर्विषमहो त्वया पतितम् ॥ २ ॥

महाराजतशोभिनः परिणताः सुगोधूमकाः
यवाः कणिशालिनश्चणकसर्षपाश्चाहृताः ।
श्रमेण परिपालिता कृषिलता त्वया मर्दिता
धिगस्तु तव जीवनं ! चरति यद्भुवे वैशसम् ॥ ३ ॥

कृषीवलगणैः समैः कृषिफलं सदा पोषितुं
वृतस्त्वमसि रक्षकस्त्वमभवस्तु हा भक्षकः !
सुकालमवलोक्य नो समभवत्तवावर्षणम्
मुधाद्य तव दुःसहा वद वदान्यता कीदृशी ॥ ४ ॥

कृषीवलगणास्त्वया विषद ! वञ्चिता लुण्ठिता
स्तथापि कृषिदेवता भवसि कैर्गुणैः ब्रूहि रे ।
अकारणमिदं त्वया किमिति वैरमाविष्कृतम्
कलंकितमहो कथं प्रकुरुषे स्वकीयं यशः ॥ ५ ॥

यथासमयमस्तु ते जलद ! गर्जनं वर्षणम्
यथासमयमस्तु ते समुदयस्तथा विश्रमः ।
जगज्जनसुरञ्जनो भव न वै जगत्त्रासकः
परोपकरणव्रतं वृणु पयोद ! कल्याणदम् ॥ ६ ॥

ज्वलति हन्त पञ्चाप् प्रदेशः

(डा॰परमानन्दः शास्त्री, सिद्धार्थसदनम्, मन्दिरमार्गः, अलीगढम्)

ज्वलति हन्त ! पञ्चाप् प्रदेशः
प्रतिदिग् लग्नो वह्निः प्रसरति
जातोऽसह्यस्तापविशेषः ।

ऋषयो यत्र मन्त्रद्रष्टारः
अभवन् वेदानां स्रष्टारः
अभिसन्धातुं तत्र मनुजता-
मापातितो खलैर्विद्वेषः
ज्वलति हन्त ! पञ्चाप् प्रदेशः ।

यज्ञाज्यप्रज्वलितहुताशः
मिलितहविर्गन्धोत्करवासः
बत बताद्य नरमांसाहुतिभी
रचितो महाचितापरिवेषः
ज्वलति हन्त ! पञ्चाप् प्रदेशः ।

गता मतिः परहितकल्याणी
अनादृता सीदति गुरुवाणी
जीर्णवास इव महानुज्झित—
स्तस्या मिथः प्रीतिसन्देशः
ज्वलति हन्त ! पञ्चाप् प्रदेशः ।

हिंसकमनोवृत्तिरुत्ताला
हन्यन्ते वनिता अपि बालाः
निरागसो निःशस्त्रानपि च
घ्नतां तनुर्नो मनसि क्लेशः
ज्वलति हन्त ! पञ्चाप् प्रदेशः ।

मनो मतिः संविन्मानवता,
सकला गताः श्रिता दानवता,
पशु-पिशाच-रक्षसामप्यहो !
भवति न तादृग् हिंसोन्मेषः
ज्वलति हन्त ! पञ्चाप् प्रदेशः ।

भारत-वन्दना

(कविरत्नम् ओमप्रकाश ठाकुरः डी-७५७ सरस्वती-विहारः
दिल्ली-११००३४)

हिमकिरीटं राजते भाले त्वदीये
क्षालनां पदयोः पयोनिधिरातनोति
ऋतुगणो भव्यां विभूषां संविधत्ते
चित्रविहगालिः स्तुतिं मधुरां करोति

तुङ्गतां ते प्रथयतेऽसौ पर्वतेशः
निर्झरा गरिमाणमुच्चैः संगिरन्ति
अनुपलं संदृश्यते सुषमा नवीना
वैभवं भाति प्रकृतिदेवी किरन्ती

जन्म लब्धुं यत्र देवा अप्यलुभ्यन्
गौरवं तत् परममहनीयं दधासि
विविधविद्यानामसि क्रीडास्थली त्वं
संस्कृतीनां दिव्यया विभया विभासि

कलयसे भारत ! कलानां कलनिधानं
यान्त्रिकोत्कर्षश्च तेऽद्य विलोकनीयः
शान्तिमान्तरिकीमवाप्तुमिहोपयाति
कोऽपि वैभवभीतिमान् देशान्तरीयः

प्राङ्गणे प्रविचरति ते गीतार्थगन्धः
शौर्यगाथा यत्र दाशरथेः पुनाति
उपनिषद्भागीरथी प्रवहत्प्रवाहा
आकुलेभ्यो निर्वृतिं परमां ददाति

धर्मभाषाजातयो मैत्रीमुपेता
यत्र सानन्दं त्वदीयाङ्के लसन्ति
मठ-विहाराश्रमकुटी-प्रासाद-लक्ष्यः
संश्रिता एकायनं प्रेम्णा वसन्ति

शोभसे बहु धारयत् त्वं वीरवेषं
राजसे क्वचिदावहन्मुनिधीरभावं
उत्सुकं वाऽसि क्वचित्पञ्चाग्नितपसे
विविदिषसि देहे क्वचिद् ध्यानप्रभावं

साधनामार्गे क्रियायोगेऽसि मग्नं
भावप्रह्वं वा मनो भक्तौ निधत्से
अस्मि चकितस्तावकैः रूपैरनेकैः
त्वं विभूतीर्भगवतो विविधा दधासि

किन्तु दैवविडम्बनां सम्पश्यतो मे
मानसे विपुलां व्यथां भूयो ददासि
प्रखरशक्तिमतोऽपि ते दैन्यं किमर्थं
तव समन्ताज्जालमनेतारः किमर्थम् ?

क्षुद्रजम्बुकगणकृता ते धर्षणा किं ?
वैरिविहिता व्यंग्यवचसां वर्षणा किं ?
पतसि निजमौग्ध्याद् वशे दुरिताशयानां
क्रूरकुटिलस्वार्थबुद्धिप्रेरितानाम्

पिबसि तत्सङ्गादहो व्यामोहमदिरां
व्याहृतेष्टार्थप्रखिन्नो भवसि नितरां
यद्गतं हे भव्यभारत ! नानुशोच्यम्
वर्तमाने ह्येव चित्तं संनियोज्यम्

धारयस्व पुनः स्वपौरुषदीप्तिमुग्राम्
उग्रकर्मवतां विखण्डय हिंस्रमुद्राम्
सर्वतः समवेतधूर्तकुलं प्रतर्पय
मनुजतायै विगतमानधनं समर्पय

गौरवश्रीस्ते पुनर्गगने विभातु
मानसे मुदिता सदा पदमादधातु

○

राष्ट्रवन्दनम्

[डा० मलिकार्जुन: परड्डी संस्कृतविभागे प्रवाचक:, कर्णाटक विश्वविद्यालय:, धारवाड-५८०००३ (कर्णाटक:)]

(१)

हिन्दव: क्रिश्चियन् मुसलमान् बन्धव:
सन्ततं सोदरत्वेन ये सङ्गता:।
श्रद्धया वन्दनं यस्य ते कुर्वते
दृश्यतामस्मदीयं महद् भारतम्

(२)

कालिदासदिभिर्यत्तु संकीर्तितं
स्वीयकाव्येषु भूलोकसंचारिषु।
व्यासवाल्मीकिसद्ग्रन्थसंमानितं
राष्ट्रमस्माकमन्यादृशं भारतम्

(३)

आगता: दूरतो येऽपि दुष्टाशया
निर्गता: राक्षसास्तैर्न वास: कृत:।
येऽपि वाऽत्र स्थिता भारतीया कृता:
अस्मदीयं महासंस्कृतं भारतम्

(४)

गंगयानङ्गशत्रोर्जटामालया
यत्स्थली पावनेनाम्भसा पाविता।
तुङ्गभद्रादिभि: सस्यपूर्णा कृता
वीर्यवन्नाकमेवागतं भारतम्

(५)

शंकराचार्य-मध्वादिवेदान्तिनो
बुद्धमुख्या जगन्मोददाने रता:।
वीरशैवादयो यद्यदशोगायका
नीतिधर्मप्रसिद्धं क्षितौ भारतम्

(६)

प्राकृतं बङ्गला, कन्नडं हिन्दवी,
मागधी कोंकणीत्यादिभाषामयम् ।
किन्तु तासां भवेन्मातृवत्संस्कृतं
तत्सुसंस्कारयुक्तं भवेद् भारतम् ॥

(७)

वर्गतो वेषतो भाषयाहारतो
राष्ट्रमित्थं भवेत् भेदपूर्णं यदा ।
मूलतो भारतीया वयं सत्प्रजाः
एकता भिन्नतायां सदा भारते ॥

(८)

राष्ट्र भंगोद्यमे दत्तचित्तो जनो
आततायी च साफल्यवान् किं भवेत् ।
शान्तिमन्त्राप्तसौख्या वयं भूतले
विश्वकल्याणचित्तं सदा भारतम् ॥

(९)

अर्थशास्त्रं तथा नाट्यशास्त्रं पुनः
कामशास्त्रं तथा वैद्यकं विश्रुतम्
सर्वशास्त्राणि पुण्याणि यत्राभवन्
प्रज्ञया विश्वसंमानितंभ ारतम् ॥

(१०)

वित्तहीना नरा यत्र सत्यान्विताः
वित्तपूर्णा जना त्यागशीलान्विताः ।
हिंसनं यत्र सर्वैर्जनैः खण्डितं
शान्त्यहिंसामयं सन्ततं भारतम् ॥

भारतम्

[कवीशरामकैलाशपाण्डेयः १ बी/२४ बाघम्बरी रोड,
अल्लापुर, इलाहाबादः (उ०प्र०)]

यत्र गङ्गा सुराणां नदी विद्यते
यत्र काशी गजारेः पुरी वर्तते ।
यत्र रामेश्वरं तीर्थमुद्भासते
सोमनाथस्य दीप्तिः सदा राजते ॥
शर्मदं भारतं सिद्धिदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥१॥
यस्य रामोऽपि कान्तारदेशं गतः
व्यूहमध्येऽभिमन्युः स बालो हतः ।
रक्षितुं राजपुत्रं कृतज्ञा स्वकं
मृत्यवेऽदाद्धि पन्ना प्रियं पुत्रकम् ॥
शान्तिदं भारतं ज्ञानदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥२॥
भान्ति नद्यो यथासूर्यजा नर्मदा
यत्र गोदावरी ताम्रपर्णीजलैः ।
यत्र सिप्रा शतद्रुश्च मन्दाकिनी
प्रीतिमाप्ता वहन्तीव युक्ताः कलैः ॥
सस्यदं भारतं शान्तिदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥३॥
नित्यमाभाति मार्त्तण्डसम्बन्धिनी
यत्र कोणार्कदेवालयस्था प्रभा ।
लोकनेत्रव्रजान् मोहयन्ती हठात्
भाति बौद्धाग्रदूतीव सांची-विभा ॥
मुक्तिदं भारतं हर्षदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥४॥

देशभक्तिप्रभावप्रभोद्भासितः
यस्य वीरो व्रती बालगङ्गाधरः ।
गर्ह्यकारागृहस्यान्धकारेऽप्यसौ
लेखकोऽभूद्धि गीतारहस्यस्य वै ॥
श्रीनिधिं भारतं धीनिधिं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥५॥

आर्तवं गौरवं यत्र हर्षावहं
पुष्पमासस्य पुष्पावलीनां द्युतिः ।
प्रावृषेण्याः पयोदाश्च चेतोहराः
शारदश्रीरपूर्वा महानन्ददा ॥
सुन्दरं भारतं धैर्यदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥६॥

यस्य भूपान्वया वर्णनीयाः सदा
गुप्तवंशोद्भवक्ष्माभुजां त्विट्चयः।
पल्लवक्ष्माभृतां वैभवाडम्बर-
श्चोलभूभृद्वराणां समृद्धिस्तथा ॥
सर्वविद्यानिधिं बुद्धिदं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥७॥

यस्य साहित्यमास्ते श्रिया मण्डितं
कालिदासस्य काव्योपमाचन्द्रिका ।
विश्वविद्वच्चकोरैः सदा पीयते
लभ्यते नैव सौहित्यमद्धा कथम् ॥
पूज्यदेशं सुराष्ट्रं वरं भारतम् ।
भारतं तन्नमामि प्रियं भारतम् ॥८॥

★

उज्जयिनी

(डा० हरिहर त्रिवेदी, ३३ शंकर बाग, इन्दौर ४५२००६)

(१)

अस्ति प्रशस्तविभवोज्जयिनीति नाम्ना
बिख्यातविक्रमनराधिपराजधानी ।
सिप्रातरंगजलधावितपादपद्मा
सद्मान्धकासुररिपोर्नगरी विशाला ॥

(२)

यत्र प्रसिद्धकविमौलिमणिः पुरासीत्
काल्यां शिवे च निरतः स च कालिदासः ।
यत्कीर्तिगायनपराः प्रतिवर्षमत्रा
यान्ति प्रगल्भमतयो विविधस्थलेभ्यः ॥

(३)

अवन्तिदेशरत्नस्योज्जयिन्याः कीर्तिवैभवम् ।
एवमुक्त्वाधुना सर्वान् कोविदान्प्रणमामि वः ॥

(४)

अभ्रांगणे ज्वलति तारकदीपमाला
भूमौ विभाति शुभशारददीपपंक्तिः ।
एकादशी भवति कार्तिकशुक्लरम्या
देवप्रबोधनपरा भवतां समृद्ध्यै ॥

○○

उज्जयिनीमुपसर

(त्रिपाठी डा० सुधाकराचार्यः रीडरः, संस्कृतस्य मेरठविश्वविद्यालये
मेरठनगरे उ० प्र०, २५०००५)

उज्जयिनीमुपसरोज्जयिन्यामुत्सूयते समारोहः ।
कालिदासकविताकूजितदेशे सुकवीनामारोहः ।
तालवने परिसरे तडागे शिप्रालहरीव्यामोहः ।
महाकालदेवालयसोपानेषु सिद्धमुनिसन्दोहः ॥
उज्जयिनीमुपसर……॥१॥

यथा यथा निकषा विन्ध्याचलवनाञ्चलं शिप्रासलिलम् ।
यथा यथा पार्वतीसिन्धुसरितामेतत्स्रोतोऽविरलम् ।
यथा समीपे महाकालमन्दिरं पताकासंवलितम् ।
तथा तथेदं हन्त हृदयमपि गाढोत्कण्ठाकन्दलितम् ॥
उज्जयिनीमुपसर……॥२॥

अत्र क्रीडति मेघमालिका पुष्पलाविकाहृदयाशा ।
पश्चा मयराष्ट्रञ्च कनखलं याति हिमगिरिं धन्या सा ।
घटजलमनूच्छलन्ती लोके कादम्बिनी हि नृत्यन्ती ।
सुप्ते परावतानां गणे वलभीष्वेषा गर्जन्ती ॥
उज्जयिनीमुपसर……॥३॥

कृष्णमृत्तिका पलाशपङ्क्तिः पक्वशालिसुरभिक्षेत्रम् ।
विद्युद्दामस्फुरितकामिनीवशीकरणरञ्जितनेत्रम् ।
'माच' नृत्यमञ्चेषु वेल्लिता मालविकासङ्गीतिः ।
कस्य न चित्तं मदयति सद्यः स्वागतभङ्गिमरीतिः ॥
उज्जयिनीमुपसर……॥४॥

विक्रमकीर्त्या मण्डितविश्वजनीने विद्यालये प्रथा ।
कालिदाससंस्थाने विद्वत्परिषदि विदुषां शास्त्रकथा ।
मालवजनमेलापकसम्मर्देषु वीक्ष्यते सोज्जयिनी ।
या दृष्टा विक्रमेण चकितं कालिदासकविताजननी ॥
उज्जयिनीमुपसर……॥५॥

उज्जयिनीमुपसरोज्जयिन्यामुत्सूयते समारोहः ।
उज्जयिनीं चल, चलोज्जयिन्यामुत्सूयते समारोहः ॥

स्वप्नकन्यका×

रच० —वीणा पेरिन्तलमण्णा, केरलः अनुवादकः ई० पी० भरतपिषारटिः
'कामधेनु'-सम्पादकः, एनेल्लूरः, (केरलः)

(१)

कुतो न जानामि जनाः समस्ताः
मां स्वप्नकन्येति समाह्वयन्ति ।
यन्मेऽक्षिणी स्वप्नमये, स एव
हेतुर्भवेत् स्वप्नसहस्रभाजी ॥

(२)

स्वप्नेषु मे दृक्पथमाप्नुवन्ति
परःसहस्रा विविधाः पदार्थाः ।
अतथ्यभूता अपि तत्र भान्ति
विचित्रभावाश्च विलक्षरूपाः ॥

(३)

हिमोच्चयैः शुभ्रकिरीटभाजां
महीभृतां चारुतटप्रदेशाः ।
प्रान्तेषु चोच्चैश्शिरसां गिरीणां
जनाश्च शान्ताः कृतसन्निधानाः ॥

(४)

विहायसे निश्चलपक्षपालो
निरुद्धनादश्च पतत्रिवृन्दः ।
समक्षमायाति, स यत्न कुत्रा-
प्यास्तां, सदा वीतविचारभारः ॥

× केरलप्रान्ते कलाशालाछात्राणां कृते समाकलितायां आंङ्गलीभाषा-कविता-रचनास्पर्धायां प्रथमपुरस्काराहीयाः DREAM इत्यस्याः कविताया अनुवादः ।

(५)

विचारधारासु परं विलीना
स्वप्ने समीक्षेऽहममर्त्यलोकम् ।
क्लेशस्य लेशो विदितो न यत्र
दुःखानि चान्त्यश्वसितं श्वसन्ति ।।

(६)

समप्रदेशेषु सविस्तरेषु
बालारुणज्योतिषि सञ्चरन्त्याम् ।
आलीसकन्येव सुविस्मयानां
लोकेऽहमीक्षे कुतुकात् स्वमेव ।।

(७)

स्वप्ने यदि स्यामखिलाण्डनाथो
मदंगुलीनां शिखरेष्वमीषु ।
आनीतमक्लिष्टमनेककृत्वः
प्रवर्तयेयं ह्यखिलाण्डभाण्डम् ।।

(८)

स्वप्नान्तरेषु क्वचन भ्रमामि
मदीयराष्ट्रस्य विशालतायाम् ।
भाग्यं कियत् स्यात् मम भारतस्य
स्वातन्त्र्ययोधेषु तदाऽजनिष्ये ।।

(९)

गुणोत्तरं भारतमाकलय्य
स्वप्नेष्वहं निर्णयमेमि नित्यम् ।
विद्वेषमुच्छेदयितुं प्रधाव्य
कदापि काले विजयेय विश्वे ।।

(१०)

स्वप्नान्तरे यं ननु सन्दिदृक्षुः
स चन्द्रमा मामुपयाति पश्चात् ।
पृष्ठे धृतप्राणसमीरकोशां
बाह्यान्तरिक्षोचितवेषभूषाम् ।।

(११)

कियत् तदा स्यां परिहासपात्रं
सङ्कल्पसम्पूर्णविलोचनाऽहम् ।
शशाङ्कबिम्बे कृतसन्निधाना
दृश्येय वैदूषकवेषभूषा ॥

(१२)

धृताक्षियुग्मानुगुणोपनेत्रां
शाटीं वसानां शबलां विचित्राम् ।
तेजस्विनीं कामपि तत्र नारीं
पश्यामि सङ्कल्पतले दृशा मे ॥

(१३)

का स्यादियं ? विदृध्यनुमाय, सेय—
महं हि, तथ्यो भवतां ननूहः ।
साऽहं कराग्रे धृतवेत्रयष्टि—
रध्यापिका कापि वयोधिकाऽस्मि ॥

(१४)

अन्ते कदाचित्तु ममैव लोकं
विशामि दीर्घां विरचय्य यात्राम् ।
स्वप्नान् तदा यानवलोकयेय—
मवर्णनीया ननु ते वचोभिः ॥

(१५)

एकाग्रताशक्तिपरीक्षकेषु
मां गाढसङ्कल्पतलेषु लीनाम् ।
नैवाकुलीकर्तुमिहास्ति किञ्चित्
न चारवश्चोद्दलितुं विचारान् ॥

(१६)

स्वप्नाः सहस्रं परियन्ति, तेषां
न सन्ति चान्योन्यसमानधर्माः ।
अथैकथा वा परमन्यथा वा
परस्परं ते तु गुणैर्विभिन्नाः ॥

(१७)

स्वप्नेऽत्र मे स्युः कतिचिन्न तथ्याः
अन्ये तु केचिन्नितरामसाध्याः ।
साध्याः स्युरन्ये कतिचित् कदाचि-
दिच्छाबलं मे मनसो यदि स्यात् ॥

(१८)

दिनानि मे दुःखमलीमसानि
स्वप्ने मदीये तु यदा स्फुरन्ति ।
तदा तदाऽहं व्यथया व्यरोदं
विकारतैक्ष्ण्यान्ननु निस्सहाया ॥

(१९)

यथैव जीवाम्यहमद्य नित्यं
तथैव च द्वन्द्वशतैर्विमुक्ता ।
अतः परं चापि दिनानि नेतु—
मिच्छाम्यहं, तृप्तिकरं न मेऽन्यत् ॥

(२०)

इदं तु मे जीवितमत्र लोके
प्रहर्षभारैः परिपूर्णमेव ।
यतः प्रहृष्टानि दिनानि मेऽद्य
ततः प्रभो ते स्तुतिरस्तु नित्यम् ॥

(२१)

स सर्वसाक्षी जननं ददौ मे
सङ्कल्पसत्यैर्घटितेऽत्र लोके ।
सन्तोषनिःश्वासपरम्पराभि—
र्यः पूरयत्यन्वहमन्तरिक्षम् ॥

○

पल्लव ! कम्पसे किम् ?

(आचार्य वेदानन्द झा, दिल्ली)

(१)

छायान्तनोषि रुचिरां शरणं श्रितेभ्य-
स्तापं निरस्य परमां मुदमादधासि ।
कम्रां छटां मृदुतरां नयनाभिरामां
तन्वन् हितार्थमयि पल्लव कम्पसे किम् ?

(२)

काले प्रसूनसुरभिं प्रवितीर्य लोके
मूर्ध्ना किरन् सुमकुलं चरणे धरण्याः ।
वातेरितेन मधुना मदयन् प्रबुद्धां-
ल्लोकोपकारकर पल्लव कम्पसे किम् ?

(३)

दृष्टः फलेग्रहिरिहाविकलं त्वमेव
कोऽन्यः परार्थममृतं सुफलं बिभर्ति ।
संचिन्तयन्ननुपलं किल भूतसौख्यं
वन्दारुवृन्तभृत पल्लव कम्पसे किम् ?

(४)

ताम्रारविन्दललनाधरकान्तवर्णः
स्निग्धः स्वभावमृदुलः कलितानुरागः
लोकानुरञ्जनपरो हि वृतानुतापो
नन्दन् मिलिन्दभृत पल्लव कम्पसे किम् ?

(५)

न त्वं भवेस्तरुषु गुल्मलतौषधीषु
चछत्रायितः शिरसि चेद् भुवनं मरुः स्यात् ।
श्यामा विभा मरकतस्य वने समन्तात्
कीर्णा त्वया सुफल पल्लव कम्पसे किम् ?

(६)

धाराप्रपातमसकृत् करकानिपातं
शीतातपार्तिमपि मृष्यसि सर्वकालम् ।
झञ्झाप्रभञ्जनरयं सहसे सहेलं
सर्वंसहो विनत पल्लव कम्पसे किम् ?

(७)

कम्पोऽपि ते सुखद एव जनाय शश्व-
न्मन्दानिलानुहरणे व्यजनायितस्य।
पातेऽप्यहो भवसि पर्णकुटी मुनीनां
ध्यायन् किमप्यनघ पल्लव कम्पसे किम्?

पल्लवस्य प्रतिबोधनम्

"कम्पनमेमि धीमन्!"

(८)

मेषाजसेवनरताः कुधियो भवेऽस्मि-
न्नुद्यानपत्रनिचयं त्वदयं हरन्ति।
श्रेयो विदन्ति न रसौघफलोत्कराणा-
मित्येव वीक्ष्य ननु कम्पनमेमि धीमन्॥

(९)

तृष्णान्धिता अविधनाः परितो विशन्त-
श्छायार्थिनां सकलमेव हरन्ति मूलम्।
सच्छद्मवृत्तिकलया सुवने वसन्तो
लुम्पन्ति कूलमिति कम्पनमेमि धीमन्॥

(१०)

कामाकुलाः कलिभुवश्छलिनो बिडाला
मायूरिका जवनिकां विपिने दधानाः।
प्रच्छन्नगाः सुवयसां चरणावरोधं
कुर्वन्ति तेन ननु कम्पनमेमि धीमन्॥

★

निरन्तरं समुद्योगं ये कुर्वन्ति जना भवे ।
दारिद्र्यतिमिरं घोरं सूर्यवन्नाशयन्ति ते ॥५४६॥
वित्तेन वाचा वपुषा हृदा यः समुद्यमः शोभनकार्यसिद्ध्यै ।
स एव चोक्तः पुरुषार्थरूप आलस्यलेशोऽपि भवेन्न यत्र ॥५४७॥
प्रारब्धात् पुरुषार्थो हेतोरस्मान्महत्तरो लोके ।
तस्मिन् सिध्यति सिद्धिस्तस्य न सिद्ध्यत्यसिद्धिश्च ॥५४८॥
यदि स्यात् पुरुषो लोके पुरुषार्थपरायणः ।
लब्ध्वा विद्यां यशो लक्ष्मीं माननीयो बुधैर्भवेत् ॥५४९॥
पुरुषार्थपरेष्वेव दयालुर्भवतीश्वरः ।
नरेष्वालस्यमग्नेषु न स्वप्नेऽपि कदाचन ॥५५०॥
राज्यप्राप्तिः विनैश्वर्यं राज्यश्रीः राज्यकं विना ।
राज्यश्रिया विना भोगो नास्त्यतः स्यात्समुद्यमी ॥५५१॥
नरः करोति साहाय्यं धर्मार्थं पुरुषार्थिनः ।
यथा तथा विधातापि नरस्य पुरुषार्थिनः ॥५५२॥
साधयन्ति स्व कार्याणि नियमेन रवीन्दुवत् ।
व्यवहृत्य नरा ये तु ते भवन्ति सदोन्नताः ॥५५३॥

वर्णाश्रमाः

गृहाश्रमं विना यस्मात् सन्ततिर्नैव जायते ।
अन्याश्रमस्थितिः साध्या कथमस्ति तया विना ॥५५४॥
निन्द्यो जनः स एवास्ति यो गृहाश्रमनिन्दकः ।
स एवास्ति प्रशस्यश्च योऽस्ति तस्य प्रशंसकः ॥५५५॥
गृहाश्रमे चरन्ती या पातिव्रतपरायणा ।
यश्च पत्नीव्रतो लोके द्वाविमौ प्राप्नुतः सुखम् ॥५५६॥
करुणारससिक्तानि वचांस्युक्त्वा, प्रदाय च ।
अन्नादीन् प्राणिनः सर्वान् सुखयन्तु गृहस्थिनः ॥५५७॥
विचारपूर्वकं सर्वहितं कुर्वन्ति सर्वदा ।
ये गृहस्थाः सदा तेषामुन्नतिर्जायते ध्रुवा ॥५५८॥

प्रजापालनं सेवनं चातिथीनाम्
सुरक्षां तथा बुद्धिविद्याविवृद्धिम् ।
गृहस्थाः सदा द्वेषभावस्य हानिं
समे रागहीनाश्च कुर्वन्तु नित्यम् ॥५५९॥

ब्रह्मचर्येण वेदानामभ्यासेन बलं तथा ।
ज्ञानं विवर्धते वह्निरेधसा सर्पिषा यथा ॥५६०॥
पालयेद् ब्रह्मचर्यं यः कृत्वा चणकचर्वणम् ।
मांसाशिभ्यो नरः स स्यात् निश्चितं गलवत्तरः ॥५६१॥
सम्यक् सर्वाश्रमाधारे ब्रह्मचर्ये सुपालिते ।
आश्रमाः पालिताः सर्वे नष्टे नष्टा भवन्ति च ॥५६२॥
मानवाः ब्रह्मचर्यं ये लोपयन्ति न ते समैः ।
रोगैर्हीनाश्चतुर्वर्गं प्राप्नुवन्त्यप्रयत्नतः ॥५६३॥
ब्रह्मचर्यं गृहस्थं च संसेव्य पुरुषो भवेत् ।
वानप्रस्थाश्रमी नूनं सश्रद्धं भद्रकाम्यया ॥५६४॥
अभ्यासेन च योगेन ब्रह्मचर्येण मानवः ।
अनायासेन लभते शीतातपसहिष्णुताम् ॥५६५॥
मानवो यो भवेद्धीनः कर्तव्यैर्धर्मकर्मभिः ।
तस्य यज्ञोपवीतं तु गृहीतव्यमसंशयम् ॥५६६॥
ब्रह्मचर्यमहत्त्वं यन्निगमागमवर्णितम् ।
तदस्त्यक्षरशः सत्यं स्वानुभूत्या वदाम्यहम् ॥५६७॥
चातुर्वर्ण्याश्रितं भेदभावं भित्त्वा विनिर्मितिः ।
बन्धुभावं समाश्रित्य कर्तव्या स्नेहसद्मनः ॥५६८॥

प्रवचनशयनम्

कोमला पुष्पशय्यास्ति हिता भागवती कथा ।
यद्युन्निद्रो भवेत् तत्र कुत्र निद्रावशो भवेत् ॥५६९॥
नृत्यगीतादिभावानां पर्यंके कण्टकाचिते ।
आरूढस्यात्मनो निद्रा कथं स्यान्नपराङ्मुखी ॥५७०॥

हिन्दूधर्मस्य दृढता

लौहाद् दृढतरो हिन्दू-धर्मः सूत्रनिभोऽस्ति न ।
त्रोटितुं शक्यते लोहं हिन्दूधर्मो न जात्वपि ॥५७१॥

शुभाशुभमतोत्तालतरंगाकुलवारिधिः ।
हिन्दूधर्मोऽस्ति नष्टेषु तरंगेषु न नश्यति ॥५७२॥

वेदाज्ञापालनं कुर्युर्निराकारस्य पूजनम् ।
त्यजेयुर्दुर्गुणान् सर्वे कामनैषास्ति मामकी ॥५७३॥

खण्डनं नः कृतं खड्गैः स्वराज्ये यवनैः सदा ।
निषिध्यते महद्दुःखं तेषां वाचापि खण्डनम् ॥५७४॥

सहभक्षणम्

सहाशनेन जायन्ते रोगाः संसर्गजा अतः ।
वैद्यकप्रतिकूलत्वात् वर्जयेत् सहभक्षणम् ॥५७५॥

नीतिवचनम्

उच्चस्थानस्थितो नीचो महत्त्वं नाधिगच्छति ।
नृपमूर्ध्नि स्थिता तुच्छा मलिना मक्षिका यथा ॥५७६॥

मुक्तितः पुनरावृत्तिः

मुक्तितः पुनरावृत्तिः समीचीनास्ति सर्वथा ।
असम्भाव्यं फलानन्त्यं यतः सान्तस्य कर्मणः ॥५७७॥

सृष्टिनिर्माणप्रयोजनम्

ईश्वरे सृष्टिनिर्माणशक्तिरस्ति निसर्गजा ।
चतुर्वर्गाप्तये नृणां तेन सृष्टिर्विनिर्मिता ॥५७८॥

कृषि-प्रशंसा

न तुच्छा कर्षका यूयं निर्दोषा वोऽस्ति जीविका ।
प्रजा नृपाश्च पाल्यन्ते स्वान्नैर्युष्मदुपार्जितैः ॥५७९॥

आधुनिकब्राह्मणाः

दानान्नभोजिनो विप्रा मिथ्यामाहात्म्यनिर्भराः ।
जीविकोपार्जने लग्ना अशुद्धानि मनांस्यतः ॥५८०॥
तेषां सन्ति पतन्त्येव तेऽधोऽधः प्रत्यहं द्विजाः ।
दैन्यमग्नाः श्रिया शून्यास्तेजोहीना मलीमसाः ॥५८१॥

पुराणविरोधः

वेदैः सह पुराणानां संगतिस्थापने मया ।
श्रमो बह्वब्दपर्यन्तमकारि बहुशः परम् ॥५८२॥
वेदैरसंगतिं तेषां विरुद्धत्वं विलोक्य च ।
प्रामाण्यस्य परित्यागं तेषां विहितवानहम् ॥५८३॥

श्रेष्ठं जीवनम्

शुभं तज्जीवनं दृश्यजगद्वद् यत् क्रियात्मकम् ।
सक्रियायां स्थिताः सृष्ट्यां क्रियाहीना वयं कथम् ॥५८४॥
अतो मर्मेदमज्ञात्वा ये निवृत्तिपरायणाः ।
वैदिकस्य न धर्मस्य लेशमात्रं विदन्ति ते ॥५८५॥
करिष्यन्त्यधिकं कार्यं रोगहीना मिताशिनः ।
मिताशी न कृशः कश्चित् कृपणो न मितव्ययी ॥५८६॥

मौनम्

ऋतस्य कथनं मौनं मतं ज्ञानवतां कृते ।
वाचोऽवरोधं कर्तुं तु समर्था बालिशा अपि ॥५८७॥

स्वदेशवेशः

धृत्वा वेशं स्वदेशस्य तद्वस्तून्युपयुज्य च ।
मानवो शोभते यादृक् न तादृक् परवेशभृत् ॥५८८॥

निवृत्तिमार्गः

करणं कर्मणां वेदविहितानां विसर्जनम् ।
निषिद्धानां, समाख्यातो निवृत्तेर्मार्ग उत्तमः ॥५८९॥

पूर्ववत्स्याद्भवान् मार्गे निवृत्तेरेव चेत् स्थितः ।
असंशयं विमुक्तः स्यादस्मिन्नेव स्वजन्मनि ॥५६०॥
परं परोपकारस्य भूत्वा कर्मपरायणः ।
स्वमुक्तये परं जन्मावश्यं संधारयिष्यति ॥५६१॥
स्वमुक्त्यै चिन्तितो नास्मि हे महात्मन् मनागहम् ।
मुक्तयेऽहं सचिन्तोऽस्मि शतशो देशवासिनाम् ॥५६२॥
विमुक्ताः सन्तु ते सर्वे तदर्थं जन्मधारणे ।
जानातु सत्यं खिन्नं मे न भविष्यति मानसम् ॥५६३॥
दुःखानां त्रासतो दीनदशाया मोचयन् जनान् ।
दौर्बल्यतश्च मुक्तोऽहं भविष्यामि प्रभोः सुतान् ॥५६४॥

विद्यार्थी

छद्मना रहिता छात्रा ये सेवन्ते बुधान् ध्रुवम् ।
ते विद्यायाः प्रकाशेन जायन्ते सुप्रकाशिताः ॥५६५॥
नद्यो यथा जलनिधिं वटवः ! तथैव
विद्यायुता विनयसारसमन्विताश्च ।
वाचः सदैव भवतः परिभूषयन्तु,
सत्यं हितं च जगते वचनं भवेद्वः ॥५६६॥

प्रारब्धम्

पूर्वार्जितोऽस्ति भोगस्ते यत्त्वं प्राप्नोषि साम्प्रतम् ।
परित्यक्तेऽपि पाखण्डे तन्न्यूनं न भविष्यति ॥५६७॥
पूर्वस्य जन्मनो भोगः प्रारब्ध इति कथ्यते ।
कर्तव्यः पुरुषार्थोऽस्ति शास्त्रकर्मक्रियामयः ॥५६८॥
कारणं यस्य भोगस्य भवेऽस्मिन् नोपलभ्यते ।
मन्यन्ते परिणामं तं कर्मणां पूर्वजन्मनः ॥५६९॥

आधुनिकाः आर्याः

आसन् प्राचीनकाले श्रुतिविहितसदाचारसंस्कार युक्ताः ।
आर्यास्तेषां प्रजासीदमितगुणवतो शूरवीरा वदान्या ।

अद्यत्वे ते समस्ता बहुतरविषयानन्दसक्ता अभूवन् ।
तेषां पुत्रादयोऽतो गुरुतरलघुतादीनतापंकमग्नाः ॥६००॥

सूतकनिषेधः

सन्ध्याग्निहोत्रसदृशं शुभकार्यजात-
मस्मिन् त्यजन्ति मनुजा खलु सूतकादौ ।
ना कोऽपि न त्यजति तस्करतामसत्यं ।
वैफल्यमस्य विदितं शुभनाशकस्य ॥६०१॥

मनुस्मृति

आर्याणां रीतिनीतीनां मनुस्मृतिरियं निधिः ।
आर्यवैदिकधर्मस्य सारोऽस्यां निहितः समः ॥६०२॥
अस्या अध्ययनं कार्यकुशलं कुरुते नरम् ।
विदधाति च तं तूर्णं व्यवहार विचक्षणम् ॥६०३॥

आस्तिकः

स्वांगवन्निखिलानात्मीकृत्यैव परमात्मना ।
आत्मना साध्यते स्नेहः सर्वक्षुद्वारणेन च ॥६०४॥
कञ्चित् प्रति घृणां नैव कुरुते विजहाति च ।
नीचोच्चभावनामन्यदुःखवारणकर्मणि ॥६०५॥
स्वात्मवद्यततेऽजस्रं ज्ञानवान् यस्तु मानवः ।
आस्तिकः स यथार्थोऽस्ति भक्तश्च परमात्मनः ॥६०६॥ युग्मकम्
नरस्यादर्शलब्धिस्तु प्रभुप्राप्तिर्मता मम ।
अतो नरो दयालुः स्याद् दयालुपरमात्मवत् ॥६०७॥
एवमीशगुणानां यो धारणाभ्यासतत्परः ।
अन्ते स एव पुरुषः प्राप्नोति परमेश्वरम् ॥६०८॥
सर्वत्रैव ममास्तीशो रक्षकः सर्वशक्तिमान् ।
अतोऽहं निर्भयो जातो न कुतोऽपि बिभेम्यहम् ॥६०९॥
यदीच्छति नरो भद्रं स कुर्यात् तर्हि पूजनम् ।
विद्यमानस्य हृदये स्वकीये परमात्मनः ॥६१०॥

छिद्यन्ते ग्रन्थयो नृणां हृदयस्य यदा तदा ।
आत्मज्ञानं लभन्ते ते विरलाः पुरुषोत्तमाः ।।६११।।
तिलेषु तैलवद् व्याप्य आत्मनीशोऽस्ति सर्वतः ।
आत्मज्ञाने ततो जाते ज्ञायते परमेश्वरः ।।६१२।।

मूर्तिपूजनम्

समस्तसम्प्रदायानामाधारो मूर्तिपूजनम् ।
पुराणानि च सर्वाणि समेऽपि मतवादिनः ।।६१३।।
द्वाभ्यामाभ्यां वितन्वन्ति स्वीयं स्वीयं नवं मतम् ।
नानयोः खण्डनं यावन्नार्षग्रन्थसमादरः ।।६१४।।
तावद्भविष्यत्युदयः श्रुतिभिः स्मृतिभिस्तथा ।
प्रतिपादितधर्मस्य संसारेऽस्मिन् न जात्वपि ।।६१५।।
वेदाज्ञापालनं धर्मो मूर्तिपूजा न वैदिकी ।
मूर्तीनां पूजने दोषो वेदाज्ञोल्लंघनात्मकः ।।६१६।।
आधानं हविषो वह्नौ मूर्तिपूजा न विद्यते ।
वायुमण्डलशुद्ध्यर्थं साधनं तदनुत्तमम् ।।६१७।।
वासयन्ति पवनं बहुकालं संगतानि कुसुमानि लतासु ।
कुर्वते च पतितानि धरित्रीमुर्वरां तदनु संगलितानि ।।६१८।।
पुष्पगुच्छनिकरं भवनेषु लाभकारि निहितं च जनानाम् ।
स्थापितानि पवनं प्रतिमासु दूषयन्ति गलितानि जलौघे ।।६१९।।
भ्रान्ताः सन्ति जनाः सर्वे पण्डितैर्मतवादिभिः ।
याता च जडतां बुद्धिर्जनानां जडपूजनात् ।।६२०।।
भावना नेक्षुदण्डस्य काष्ठखण्डे कृता यथा ।
मृल्लोष्ठे शर्करायाश्च मुखं मिष्टं करोति नः ।।६२१।।
मृगेण मृगतृष्णायां कृतापि जलभावना ।
पिपासां तस्य शान्तां न विदधाति कदाचन ।।६२२।।
पाषाणे भावनेशस्य तारयिष्यति नः कथम् ।
विश्वासे भावनायां वा सत्यं तस्मादपेक्ष्यते ।।६२३।।

मन्दिरेभ्यो मनुष्याणां मनसां मूर्तिपूजनम् । कुलकम्
निष्कासयितुमिच्छामि न मन्दिरविनाशनम् ॥६२४॥

गङ्गा

नदीजलेषु सर्वेषु गांङ्गं श्रेष्ठतमं जलम् ।
केनापि विधिना तन्न मुक्तिदं पापनाशकम् ॥६२५॥

अवतारः

मन्यन्ते येऽवतारास्ते केवलं पुरुषोत्तमाः ।
आसन् पालयितारश्चादेशानां परमात्मनः ॥६२६॥
वेदशास्त्रविदो धर्मदयान्यायपरायणाः ।
तादृशाः पुरुषा नासन् पुरा सन्ति न साम्प्रतम् ॥६२७॥

वालविवाहः

जातिजीवनमहोरुहमूलनाशकोऽस्ति खलु बालविवाहः ।
तस्य रक्षणकृते करणीयस्तद्घुणक्षयविधिर्विधिपूर्वम् ॥६२८॥

आधुनिकसाधवः

भक्षन्त्युदरपूरं न भारतीयाः सहस्रशः ।
कणेभ्यः स्पृहयन्तस्ते म्रियन्ते कुक्कुरादिवत् ॥६२९॥
दशायां शोचनीयायामीदृश्यां मानवा यदि ।
तुम्बीकमण्डलुग्राहे साभिलाषा अशोभनम् ॥६३०॥
परिश्रमेण बन्धूनां क्षुधाया विनिवृत्तये ।
अन्नाद्युत्पादनं कार्यं धर्मः सामयिकोऽस्त्ययम् ॥६३१॥
अधर्मापरपर्यायः साधुताऽडम्बरोऽस्त्ययम् ।
असाधवः प्रकृत्या ते वेशमात्रेण साधवः ॥६३२॥

गायत्रीप्रणवजपप्राणायामाः

यावन्निद्रावशो न स्याः प्रणवस्य जपं कुरु ।
जपन् शयानो लभते लाभमत्युत्तमं नरः ॥६३३॥
कुर्यात् प्रतिदिनं जापं गायत्र्या भद्रकारकम् ।
नातः श्रेष्ठतरं वस्तु किञ्चित् दातुमहं क्षमः ॥६३४॥

मनःस्थैर्यं मतेः शक्तेर्वृद्धिर्व्याधेः क्षयस्तथा ।
प्राणायामविधानेनाप्रयासमुपजायते ॥६३५॥
प्रातः सायं विधातव्यः प्रणवस्य जपोऽन्वहम् ।
अयमेवाश्रयोऽस्माकं मतः संन्यासिनां परः ॥६३६॥
चिन्तनेनास्य चाञ्चल्यं चेतसः क्षीयते तथा ।
क्षालनं पापपङ्कस्य पूर्णरूपेण जायते ॥६३७॥
उन्मथ्य मन्मथं चित्तोन्माथिनं मुनयः सदा ।
मन्त्रेणानेन लीयन्ते प्रमोदानन्दनीरधौ ॥६३८॥
गुणानां नामिनो ज्ञानं परमानन्दलब्धये ।
आवश्यकं महल्लोके जपो नाम्नो न केवलम् ॥६३९॥
शब्देन साकमर्थस्य यथा ज्ञानं विजायते ।
नाम्ना सहैव वाच्यस्य तद्वज्ज्ञानमपेक्ष्यते ॥६४०॥
यथोक्ते जलशब्दे तद्वाच्यज्ञानं तथा क्रिया ।
आवश्यक्यस्ति तत्प्राप्त्यै तथैव परमात्मनः ॥६४१॥
नाम तस्यार्थसंज्ञानोपलब्ध्यै च दिवानिशम् ।
धारणाध्यानकरणं परमावश्यकं मतम् ॥६४२॥

आर्यसमाजवाटिका

वाटिकार्यसमाजस्य या नवारोपिता मया ।
मामकीना स्थितिस्तत्र मालाकारस्य विद्यते ॥६४३॥
करोति वाटिकायां स यदोर्वरकपातनम् ।
धूलिदिग्धं भवत्येव तच्छिरो नात्र संशयः ॥६४४॥
धूलिपाषाणचिन्ता मेऽणीयस्यपि न विद्यते ।
हरिता सुफला च स्याच्चिन्तेयं वाटिका मम ॥६४५॥
खनित्वोर्वीं यथाशक्ति वाटिका रोपिता मया ।
अस्यामुर्वरकं चापि पातितं पातयिष्यते ॥६४६॥
शोणितेन स्वकीयेन मदीया अनुयायिनः ।
सेक्ष्यन्त्येनां मुदाजस्रं निर्भयाः पूतजीवनाः ॥६४७॥

अतोऽहं चिन्तितो नास्मि शुष्कैषा संभविष्यति ।
तथापीशस्य विश्वासात् कार्याण्येतादृशानि तु ॥६४८॥
भक्तैः क्रियन्ते सततं जनकल्याणमीप्सुभिः ।
"सूर्याचन्द्रमसोः धाता" स एवास्यापि रक्षकः ॥६४९॥ (कुलकम्)
आर्यसामाजिकाः सर्वे मच्छिष्याः सन्ति साम्प्रतम् ।
आधारभूताः सर्वे ते मम विश्वासनिष्ठयोः ॥६५०॥
कार्याणां मम सम्पूर्ति त एव पुरुषार्थिनः ।
मनोरथानां साफल्यं विधास्यन्ति न संशयः ॥६५१॥

आर्यसमाजप्रवेशः

वेदेषु येषां विश्वासो मानवानां भवेद् दृढः ।
मन्यन्तामात्मनश्चार्यान् समाजे तान् प्रवेशय ॥६५२॥

धार्मिकभेदनिवारणम्

मेलमूलमुपादाय त्यक्त्वा यद् भेदमूलकम् ।
भेदा नाशयितुं शक्या अनायासेन भूतले ॥६५३॥

समारोहेषु योगशिक्षाकारणम्

ईदृशेषु विशालेषु समारोहेषु निश्चितम् ।
हंसा अपि समायान्ति बहुभिः सूकरैः समम् ॥६५४॥
सर्वशक्तिमतोऽपारकृपया परमात्मनः ।
हंसायन्ते क्षणेनैव विष्ठादा अपि सूकराः ॥६५५॥
अतोऽहं योगरत्नानि निःशङ्कं श्रोतृसम्मुखे ।
निक्षिपापि ग्रहीष्यन्ति नीरक्षीरविवेकिनः ॥६५६॥

महर्षेर्दयालुता

युष्मभ्यं मोदकान्याशु दद्याद्युष्मद्गुरुर्न वा ।
वटवोऽवश्यमेवाहं दास्याम्येतेन हेतुना ॥६५७॥
पाषाणैस्ताडितो वृक्षो जडोऽपि मधुरं फलम् ।
दत्तेऽजडो न दद्यां चेत् कः स्यान्मदधिको जडः ॥६५८॥

श्रुत्वा शान्तामिमां वाचं स्वामिनः स्नेहसंयुताम् ।
लज्जितोऽधोमुखो जातः स्वशिष्यसहितो गुरुः ।।६५६।।
निर्दोषा बालका एते केवलं दोषभागहम् ।
मिष्टान्नलोभेनानीता येनैते पापिना मया ।।६६०।।
क्षमामपि कथं याचे क्षान्तोऽस्मि भवता स्वयम् ।
प्रायश्चित्तावकाशोऽपि दत्तोऽभाग्येन न त्वया ।।६६१।।
रौरवे नरके नूनं पतिष्यामि न संशयः ।
तत्रापि न मया स्थानमथवा लप्स्यते ध्रुवम् ।।६६२।। कुलकम्

महर्षिनिर्भयता

सत्यमेव वदिष्यामि रुष्टा राज्याधिकारिणः ।
भवेयुश्चक्रवर्ती वा स्वयं स्यात् कुपितो नृपः ।।६६३।।
क्षणभंगुरदेहस्य नाहं स्वप्नेऽपि शाश्वतम् ।
धर्मं त्यक्ष्यामि रक्षार्थे सत्यं वा सत्यजीवनः ।।६६४।।
सत्यं कान्तिमुपैति दीप्तिममलां तप्तं विरोधाग्निना,
प्रक्षिप्तं बहुशो विभावसुचये स्वर्णं यथा निर्मलम् ।
उद्गीर्णाग्निचये शतघ्निवदने संस्थापितस्यापि मे;
निर्यास्यन्ति मुखादजस्रगतिना मन्त्राः श्रुतीनां सदा ।।६६५।।
अंगुलीर्वर्तिकाः कृत्वा मामकीना जना यदि ।
प्रज्वालयेयुश्चिन्ता का सत्यं वक्ष्यामि नामृतम् ।।६६६।।

महर्षिधर्मः

वेदोक्तमार्यावर्तीयमाद्यं धर्मं सनातनम् ।
विहाय न परं धर्मं स्वप्ने स्वीकृतवानहम् ।।६६७।।
न चाग्रे स्वीकरिष्यामि स्वीकरोमि न साम्प्रतम् ।
अयमेव परो धर्मः संश्लिष्टश्च ममात्मनि ।।६६८।।
गच्छन्ति यदि गच्छेयुर्मे प्राणा नास्मि चिन्तितः ।
एतद्धर्मविरोधस्तु न संभाव्योऽस्ति जात्वपि ।।६६९।। (कुलकम्)

वेदानामेव श्रेष्ठत्वं मन्येऽस्मात् कारणादहम् ।
अर्हन्ति भवितुं सर्वे, आर्या वेदानुयायिनः ॥६७०॥

बालिकायै प्रणामः

चतुर्वर्षवयस्केयं बालिका मातृरूपिणी ।
अस्माकं जनयित्री या पालयित्री च विद्यते ॥६७१॥
प्रत्येनां श्रद्धयोपेतो जातोऽस्मि नतमस्तकः ।
युष्मन्मूर्तिप्रभावो न कारणं प्रणतौ मम ॥६७२॥

यथाशक्ति दानम्

दानं तावत् प्रदातव्यं स्याद् भिक्षुर्येन नो नरः ।
तावदग्रे न गन्तव्यं यतः श्रेयोनिवर्तनम् ॥६७३॥
कामयेऽहं न संगृह्यं समस्तं तावकं धनम् ।
त्वाञ्च त्वत्परिवारं च कर्तुमन्यजनाश्रितम् ॥६७४॥
धर्मस्य पालनाद् यस्य धर्मोऽन्यो विकृतो भवेत् ।
पालनीयो मनुष्येण न स कल्याणकांक्षिणा ॥६७५॥
शोभा का मन्दिरस्यास्ति तस्य यस्य विनिर्मितौ ।
त्वदीयो जीविकोपायो व्यापारोऽवसितो भवेत् ॥६७६॥
तस्माद् दशसहस्रेषु रूप्यकेषु सहस्रकम् ।
एकं ग्रहीतुमिच्छामि त्वत्तोऽहं दानिनां वर ॥६७७॥

दानग्रहणयोग्यता

भोगे पुण्यं यथा यज्ञशेषस्यास्ति तथैव च ।
कृत्वा परोपकारं तद्दत्तान्नस्य निषेवणे ॥६७८॥
परान्नग्रहणात् पूर्वं चिन्तनीयमिदं सदा ।
अधिकारो ममास्त्येतद्ग्रहणस्याथवास्ति न ॥६७९॥
दानिनो ये स्वकीयं स्वं श्रद्धया विनयेन च ।
यच्छन्ति मह्यं तेभ्यः किं कुर्वेऽहमिति चिन्त्यताम् ॥६८०॥
पुरुषार्थविहीनं तं धिग् जनं यः श्रमं विना ।
भूत्वा परोपजीव्यस्मिन् भवे जीवति निस्त्रपः ॥६८१॥

स्व विदेशगमननिषेधः

स्वर्लोकसदृशे यस्मिन् भारते निवसाम्यहम् ।
तत्राविद्यान्धकारोऽस्ति महाघोरो दृढस्थितिः ॥६८२॥
देशस्य मम जायन्ते दरिद्राः प्रत्यहं नराः ।
समाजे च कुरीतीनां साम्राज्यं सर्वतोमुखम् ॥६८३॥
अतः पूर्वं स्वदेशस्य सुधारकरणं परम् ।
मन्ये स्वकीयं कर्तव्यं पवित्रं प्रथमं हृदा ॥६८४॥
देशान्तरमहं गत्वा शान्ति नाप्स्यामि मानसीम् ।
स्वदेशवासिनां चिन्ता चिता चित्ते ज्वलिष्यति ॥६८५॥
अशान्तचेता धर्मस्य प्रचारकरणे कथम् ।
समर्थोऽहं भविष्यामि चिन्त्यतां भवता स्वयम् ॥६८६॥
भावत्कीं प्रार्थनामूरीकर्तुं न प्रभवाम्यहम् ।
अतोऽपराधः क्षन्तव्यो भवद्भिः सकलैर्मम ॥६८७॥

नृपाय प्रतिवचनम्

भवान् तुच्छप्रलोभेन मां देवात् परमात्मनः ।
तदादेशपरित्यागाद् विमुखीकर्तुमिच्छति ॥६८८॥
धावित्वा लघुराज्यात्ते वहिर्गन्तुं क्षमोऽस्म्यहम् ।
प्रभोरादेशभंगाय समर्थं तत् कथं भवेत् ॥६८९॥

प्रतापचित्रदर्शनम्

हस्तचित्रं प्रतापस्य महाराजस्य संपिबन् ।
नेत्राभ्यां निर्निमेषाभ्यां जगादेदमृषिर्वचः ॥६९०॥
चित्रस्य पश्य सौन्दर्यं पूर्वजस्यात्मनो नृप !
गौरवं राजते कीदृक् गुरुत्वं च मुखाम्बुजे ॥६९१॥
चित्रादुद्गच्छतीवेयं वीरता शत्रुतापिनी ।
मानसं धृतवैराग्यं संमोहयति मामकम् ॥६९२॥

वेश्यागमननिषेधः

राजन् भवन्ति राजानो भुवि शार्दूलसन्निभाः ।
कुक्कुरीसदृशा वेश्या अर्थकामा गतत्रपाः ॥६९३॥

गर्हणीयास्ति सिंहस्य शुन्यासक्तिर्नरेश्वर ।
नितान्तं विपरीता च कुलजात्योश्च संस्कृतेः ॥६९४॥
किमर्थं कुक्कुरी सिंहकन्दरां वीतसाध्वसा ।
प्रविष्टा पातयित्रीयं पतिता च स्वयं नृप ॥६९५॥
इदं दुर्व्यसनं धर्मकर्मणामस्ति नाशकम् ।
अनेन मानमर्यादे भवतश्च कलंकिते ॥६९६॥
शान्तिं च परिवारस्य व्यसनं हन्ति निश्चितम् ।
इदं तस्मात् परित्याज्यं सदा कल्याणकामिना ॥६९७॥ (कुलकम्)

पातिव्रतम्

वित्तशक्तिमतां देशवासिनां भोगवादिनाम् ।
आचाराश्च विचाराश्च नाशयेयुरिमामलम् ॥६९८॥
एषा च तरणी मध्यधारायां मज्जनोन्मुखी ।
रक्षत्येनां परं पत्नीपातिव्रतमनारतम् ॥७६९॥

विषप्रदातारं प्रति

जानासि न जगन्नाथ! निधनात् साम्प्रतं मम ।
अपूर्णानि भविष्यन्ति राष्ट्रकार्याणि पूर्णतः ॥७००॥
लोकस्य महती हानिर्जातास्ति कियती ? भवान् ।
नैतज्ज्ञातुं क्षमो धातुर्विधानमिदमद्भुतम् ॥७०१॥
दोषास्पदं भवन्तं न मन्येऽस्मिन् विषये मनाक् ।
ददामि भवते वित्तं पारेराज्यं प्रयात्त्वरम् ॥७०२॥
शक्यन्ते रक्षितुं प्राणा नेपालगमनात् तव ।
ज्ञातवृत्तो नृपः पूर्णविनाशं ते करिष्यति ॥७०३॥
रक्षणं तव तत्कोपात् कर्तुं कः प्रभविष्यति ।
पलायस्व जगन्नाथ विलम्बालम्बनं त्यज ॥७०४॥
नावगच्छेत् परः कोऽपि कर्मैतत् तावकं शृणु ।
प्रतिजानाम्यहं कश्चिद्भेदं मत्तो न वेत्स्यति ॥७०५॥ (कुलकम्)
इत्युक्त्वा स दयानन्दो निजप्राणविघातकम् ।
अमोचयद् वधाद् बन्धाद् वधिकं तं दयान्वितः ॥७०६॥

नृपं प्रत्युपदेशः

राजन् स्थानं न दातव्यं चिन्तायै निजमानसे ।
ललाटलिखितं धात्रा मार्जितुं कः क्षमो भुवि ।।७०७।।
रोगा वसन्ति छायावच्छरीरे क्षणभंगुरे ।
विकारे प्रकृतेर्देहे विकारो नास्ति विस्मयः ।।७०८।।
मा भूः शोकाकुलः प्रीतस्त्वत्कृतैः स्नेहसत्कृतैः ।
अस्म्यहं विद्धि मां राजन् त्वं स्वस्य हितकारिणम् ।।७०९।।

पाण्ड्यं प्रत्युपदेशः

भवेः खिन्नो न हे पाण्ड्य ! प्रभोरीहितमीदृशम् ।
देहोत्पत्तिर्विनाशश्च जलबुद्बुद्वद् भवे ।।७१०।।
सागरोर्मिसमानं वा भूयो भूयोऽभिजायते ।
मरणाभिमुखो जीवलोकोऽयं विद्यते सदा ।।७११।।
औचित्यमस्ति शोकस्य भवेत्तेद्यदसाम्प्रतम् ।
योगे वियोगो निर्माणे विनाशः शाश्वतो मतः ।।७१२।।
विनाशिनोऽस्य देहस्य कृते शोको न युज्यते ।
जन्मैव यस्य संसारे विनाशाय प्रजायते ।।७१३।।

आत्मानन्दं प्रति

आत्मानन्दमृषिः प्रेम्णा ललाटे संस्पृशन् शनैः ।
उवाचेदं कियत्कालं शरीरं क्षणभंगुरम् ।।७१४।।
स्वस्थं स्थास्यति लोकेऽस्मिन् नितान्तं नश्वरेऽस्थिरे ।
पालयन् निजकर्तव्यं हृष्टो भूया निराकुलः ।।७१५।।
संयोगसमकालं हि वियोगोऽपि विजायते ।
वियोगहीनः संयोगो वियत्पुष्पसमो मतः ।।७१६।।

प्रभुं प्रति

प्रभो दयोदधे ! सर्वशक्तिमन् ! परमेश्वर ।
अयमेवाभिलाषस्ते तवैव च न संशयः ।।७१७।।

पूर्णा स्याद् भवदीयेच्छा कृपालो हे प्रभो त्वया ।
कृता विचित्रा लीलेयं लीलाधर ! समेम्यहम् ॥७१८॥
ओमोमोम् व्याहरन् ध्यायन् स्वप्रियं परमेश्वरम् ।
असून् तत्याज सानन्दं दयानन्दो दयामयः ॥७१९॥

'चौहान थोक, हरदोई, उत्तर प्रदेश'-निवासिना विद्याभास्कर-श्रीशिवकुमारमिश्रसाहित्याचार्येण संस्कृत-हिन्दी-एम०ए० उपाधिधारिणा संकलिता सरसपद्यैरनूदिता च महर्षेः दयानन्दस्य सूक्तिसप्तशती समाप्ता ।

कविवंशपरिचयः

पितामहस्य प्रपितामहो मे,
बभूव पूर्वं छविनाथनामा।
यः कान्यकुब्जात् समुपेत्य धाम्ना,
विभूषयामास पुरीं पिहानीम् ॥१॥
पिहानी-परसूमिश्र-वंशवंशसमुद्भवम् ।
बालगोविन्दनामैकं वंशलोचनमुद्गतम् ॥२॥
तस्य पंचसु पुत्रेषु द्वितीयस्याभवन् पुनः ।
सुताः शिवसहायस्य चत्वारो विनयान्विताः ॥३॥
श्रीश्यामलालस्य पितामहस्य चतुर्षु पुत्रेषु तृतीयपुत्रः।
प्रभूदयालः जनको मदीयः दयाकरः कर्मपरायणश्च ॥४॥
कौशल्यया तस्य विवाहकालेऽ
भवद् विवाहो मतिनीतिमत्या।
पुत्रद्वयं या शिव-रामपूर्वं
कुमारयुक्तं सुषुवे सुतां च ॥५॥
लक्ष्मिस्वरूपां कमलाभिधानां या स्वर्गता यौवन काल एव।
शांतस्वभावाऽतिमता च पित्रोरुदारचित्ता सदृशी च मातुः ॥६॥
ज्येष्ठं सुतं मे जनकः स्वमोहं कृतोपवीतं प्रविहाय तूर्णम् ।
ज्वालापुरीये च गुरोः कुले मां प्रवेष्टुकामः सुतरां बभूव ॥७॥
श्रीदर्शनानन्द-महाप्रभावसंस्थापिते पण्डितवर्यसेव्ये ।
प्रवेश्य मामश्रुमुखो रुदन्तमालम्ब्य धैर्यं गृहमाजगाम ॥८॥
वर्षत्रयानन्तरमेव हा हा, दौर्भाग्यतो नः प्रविहाय सर्वान् ।
दिवं प्रयातो जनको ऽस्मदोयोऽनाथान् विधायेश्वरमात्रनाथान् ॥९॥

तदा पितृव्यो जनकस्य ज्येष्ठभ्राता सदा वंशहितो दयालुः ।
देवोपमो वंशसहायतार्थमयाचितः साधनतत्परोऽभूत् ॥१०॥

नाम्ना राधाकृष्णं, तमहं कृतज्ञतापूर्णहृदयेन ।
सर्वैर्गुरुभिः सार्धं, श्रद्धोपेतः स्मरामि मुहुः ॥११॥

श्रीसंयुता हेमलताभिधाना न केवलं गेहविधानलग्ना ।
अध्यापयन्ती सहधर्मिणी मे यथार्थतोऽभूद्गृहिणी मदीया ॥१२॥

आशापुष्पे, इन्दिरापद्मजे च कन्याः सूताः पुत्र एको यया च ।
नाम्ना ख्यातो योऽवनीन्द्रो जगत्यामेते सर्वे मे स्मृतौ सन्निविष्टाः ॥१३॥

अनुजं रामकुमारं, प्रकाशनेऽस्मिन् सहायकर्तारम् ।
गुणतोऽग्रजं स्मरेयं कथं न संशोधनादिकार्यरतम् ॥१४॥

शान्तां पत्नीं तदीयां पत्रं ज्येष्ठं रवीन्द्रनामानम् ;
ज्योत्स्नाऽपर्णे च सुते, स्मरणीयाः भूरिशः सर्वे ॥१५॥

अन्ते चाऽमरदीपं, कनिष्ठपुत्रं महद्गुणागारम् ।
यातमकाले निधनं वयं स्मरामो विलापपराः ॥१६॥

स्मृतौ संस्थापिते तस्य संस्थाने प्रथमं पुरः ।
भवतां समर्पितं पुष्पमिदं स्यात् तुष्टये तु वः ॥१७॥

—शिवकुमार मिश्रः

स्वागतं पयोद ! ते

(डा० रमाकान्त शुक्लः, ६ वाणी विहार नयी दिल्ली-११००५९)

गर्जनेन वर्षनेन ते धरा प्रमोदते ।
स्वागतं पयोद ! ते स्वागतं पयोद ! ते ॥

हे सुकालवारिमुक् ! त्वया धरा सुतर्पिता
हे पयोद ! चातकास्त्वया भृशं सुहर्षिताः
केकिनां गणस्त्वया मुदा वनेषु नर्त्यते ॥ स्वागतं० ॥१॥
वीतवर्षशोषकृत्[1] यदाधुना त्वमागतः
भूमनःस्थतापराशिरत्ययं द्रुतं गतः
मानसे मुदो न मान्ति दर्शनाज्जनस्य ते ॥ स्वागतं० ॥२॥
मार्जितास्त्रुटीर्[2] विलोक्य ते प्रमोदमेम्यहम्
हर्षितान् वनस्पतीन् विलोक्य मोदमेम्यहम्
सर्वतः प्रसन्नता जनाननेषु विद्यते ॥ स्वागतं० ॥३॥
नूतना सुपादपाः प्रमोदिता सुवल्लरी
उच्छलत्सुविभ्रमा तरंगितास्ति निर्झरी
पक्षिणश्च नीडनिर्मितिं द्रुतं प्रकुर्वते ॥ स्वागतं० ॥४॥
क्षेत्रकर्षणेन बीजवापकर्मणा द्रुतं
कर्षकैः सभार्यकैः स्वधर्मपालनं कृतं
श्रावणेऽथ भाद्रकेऽपि ते दयां भजन्तु ते । स्वागतं० ॥५॥
अंगणेषु गेहपृष्ठकेषु वा वनान्तरे
वीथिकासु वारिपूरितासु वापि चत्वरे ।
प्रावृषोऽभिषेकमर्भका मुदा प्रकुर्वते । स्वागतं० ॥६॥

---

१. १९८७ तमेशवीयेऽब्दे काले अवर्षणात् शोषहेतुः ।
२. १९८७ तमे वर्षे काले अवर्षणात्मिकास्त्रुटयस्त्वया १९८८ तमे वर्षे सुकालवर्षणेन मार्जिताः ।

दोलया मनोविनोदमाचरन्ति बालिकाः ।
तीव्रगामिनो गृहं प्रयान्ति पश्य पान्थकाः
उत्कया बलाकया मनोरथः स्व पूर्यते । स्वागतं० ॥७॥

'तोयदेन पूरिता मनोरथाः समे हि नो
वारिदेन दारितं सुदीर्घसंकटं हि नो'
ग्रामवासिभिश्च नागरैर्मुदाद्य कथ्यते । स्वागतं० ॥८॥

पक्षिणश्चतुष्पदाः सरीसृपाः पयश्चराः
मोदमाप्नुवन्ति कान्तिमाप्नुवन्ति भूधराः
फुल्लितैः कदम्बकैः सुहास एष कीर्यते । स्वागतं० ॥९॥

क्लिन्नवस्त्रयोषितो महर्षिमानभञ्जिकाः
धारिता भुवा नवा हरीतिमत्सुशाटिका
रामणीयकं नवं च किं न वाद्य दृश्यते ? स्वागतं० ॥१०॥

दर्दुराः प्रमोदिताः सुहंसकाः पलायिताः
पद्मनाशगर्विताः शिलीन्ध्रकाः समुद्गताः
द्वन्द्व एव जीवनं नु ! चिन्तयाऽलमत्र ते । स्वागतं० ॥११॥

तावता जलेन सिञ्च वारिवाह ! मेदिनीम्
यावता न याति सा दशां स्वजीवखेदिनीम्
प्लावनं भवेत्क्वचिन्न चातिवर्षणेन ते । स्वागतं० ॥१२॥

शस्त्रवह्नितामशायको भवे भवेः पयोद हे !
द्वेषवह्नितापशामको भवेः पयोद हे !
शान्तिरस्तु सौख्यमस्तु सीकरः पयोद ! ते । स्वागतं० ॥१३॥

मोदमेतु मेदिनी प्रमोदमेतु मानवः ।
नो कदापि बाधतां भुवं कुशोषदानवः ॥
अन्नमस्तु, दुग्धमस्तु, विद्युदस्तु केन[1] ते । स्वागतं० ॥१४॥

---

१. केन = जलेन

देववाणी-परिषद्वार्ता

(१) अस्मिन्वर्षे उ० प्र० संस्कृताकादम्या नैके ग्रन्थाः द्विसहस्त्ररूप्य-कात्मकैः पुरस्कारैः सम्मानिताः येषु देववाणी-परिषदा प्रकाशितं डा० रमाकान्तशुक्लप्रणीतं **'पण्डिराजीयम्'**नाम नाटकं, डा० रामकिशोर मिश्रप्रणीतं **'श्रीगरुडध्वजसपादशतकम्'** डा० उमाकान्तशुक्लप्रणीतं **'कूहा'** नामखण्डकाव्यं चाप्यन्तर्भवन्ति ।

(२) १०.५.१९८८ तारिकायां देववाणी-परिषदा स्व० स्थाणुदत्तशास्त्रि-श्रीमती लीलारत्न-पं० रघुनाथप्रसादचतुर्वेदानां स्मृतौ श्रद्धाञ्जलि-सभासमायोजिता ।

संस्कृत-जगद्वार्ता

(१) २१—२२ ४ १९८८ तारिकयोः मेरठनगरे नानकचन्दस्नातकोत्तर-महाविद्यालये मेरठविश्वविद्यालयसंस्कृताध्यापकपरिषश्चतुर्दशमधिवेशनं सम्पन्नम् यत्र शोधसंगोष्ठी, संस्कृतकविसंगोष्ठी, विचारसंगोष्ठी, उन्मुक्ताधिवेशनमित्यादीन्यनुष्ठानानि सम्पन्नानि । परिषदध्यक्षेण डा० रमेशकुमारलव-महाभागेन अधिवेशनस्य साफल्याय सदस्या वर्धापिताः ।

(२) ४.६ १९८८ तारिकातः प्रातःकालीनदूरदर्शनप्रसारणे प्रतिशनिवासर **'सांस्कृतिकी'** नामा संस्कृतकार्यक्रमो नियतरूपेण प्रवर्तितः ।

आद्यः कार्यक्रमः **'ऋतुसंहारस्य ग्रीष्मवर्णनम्'** अधिकृत्य प्रास्तूयत ।

श्रीभगवतीशरणसिंहस्यालेखमालम्ब्य श्रीमत्या दुर्गावतीसिंहमहाभागाया निर्देशने कु० सुनीताबुद्धिराजा-डा० रमाकान्तशुक्लाभ्यां कार्यक्रमोऽयं प्रस्तुतः । ११.६.८८ तारिकायां माघकृतग्रीष्मवर्णनं डा० सुन्दरीसिद्धार्थमहाभागया

उपर्युक्तकलाकारैश्च प्रस्तुतम् । १८—२५.६.८८ तारिकयोः डा० रवीन्द्रनागरमहाभागस्य नेतृत्वे अक्षरश्लोक-कार्यक्रमः प्रास्तूयत । २.७.१९८८ तारिकायां 'मेघदूत'मवलम्ब्य कार्यक्रमः प्रसार्यत यत्र डा० शुभ्रा शर्मा डा० नित्यानन्द शर्मा डा० सुनीता बुद्धिराजा च सहभागित्वं निरवहन् । ६.२.८८ तारिकायां लोकभाषाप्रचारसमितिसदस्यानां मनोरञ्जककार्यक्रमो डा० रवीन्द्रनागरेण प्रस्तुतः । श्रीसदानन्ददीक्षितेन साकं तेन वार्तालापः कृतः । आशासे, दूरदर्शनतन्त्रं बहुतरमनोयोगेन आयत्यां कार्यक्रमान् सम्पादयिष्यति ।

(३) ४.६.१९८८ तारिकायां नवदिल्ल्यां तीनमूर्तिभवनस्थे जवाहरलालनेहरूसभागारे उत्तरप्रदेशसंस्कृताकादम्याः पुरस्कारवितरणसमारोहः सुसम्पन्नः ।

भारतस्य महामहिमशालिनोपराष्ट्रपतिना डा०शंकरदयालशर्ममहाभागेन आचार्यबलदेवोपाध्याय (१९८३)- श्रीपट्टाभिरामशास्त्रि (१९८४)- श्रीपेरीसूर्यनारायणशास्त्रि (१९८५)-डा० मण्डनमिश्र (१९८६)-महाभागेभ्यः रूप्यकैकलक्षराशिकाः विश्वसंस्कृतभारतीपुरस्काराः समर्पिताः ।

उपराष्ट्रपतिना पञ्चविंशतिसहस्र रूप्यकात्मकाः षट् विशिष्टपुरस्काराः दशसहस्र रूप्यकात्मकाः विंशतिसंख्याकाः वेदपुरस्काराश्चापि विद्वद्भ्यः समर्पिताः ।

समारोहस्य प्रारम्भः श्री विश्वनाथरामशेषशास्त्रि - विश्वनाथकृष्णमूर्तिशास्त्रिभ्यां कृतेन वैदिकमङ्गलाचरणेनाभूत् । श्रीलालबहादुरशास्त्रिकेन्द्रीयसंस्कृतविद्यापीठच्छात्राभिः मंगलगीतं गीतम् । उत्तरप्रदेशस्वास्थ्यमन्त्री श्रीलोकपतित्रिपाठी विशिष्टं भाषणमकरोत् । उत्तरप्रदेशमुख्यमन्त्री श्रीवीरबहादुरसिंहः समारोहस्याध्यक्ष्यमकरोत् । स्वागतभाषणम् अकादम्यध्यक्षो डा० करुणापतित्रिपाठी, धन्यवादज्ञापनम् अकादमीनिदेशकः श्रीमधुकर द्विवेदी मञ्चसञ्चालनं च डा० रमाकान्त शुक्लः समाचरन् ।

(४) १२.६.१९८८ तारिकायां नवदिल्ल्यां गौतमनगरस्थदयानन्दगुरुकुले लोकभाषाप्रचारसमित्याः संस्कृतप्रशिक्षणशिविरस्य समापनोत्सवः सम्पन्नः ।

लोकभाषाप्रचारसमितिदिल्लीकेन्द्रसचिवः श्रीनिरञ्जनसाहु स्वागतभाषणं संस्थापरिचयं च प्रदत्तवान् । समारोहस्य मुख्यातिथिना डा० रमाकान्तशुक्लेन, मुख्यप्रभाषकेन डा० रवीन्द्रनागरेण, अध्यक्षेण डा० वाचस्पतिउपाध्यायेन सस्कृतसम्बन्धिनः स्वविचारा अभिव्यक्ताः मुख्यातिथिना 'शिशुसंस्कृतम्' इति पुस्तकं समुन्मीलितम् । प्रशिक्षणशिविराध्यापकेन श्रीसत्यनारायणाचार्येण स्वानुभवाः कथिताः । अस्मिन्नवसरे श्रीविपिनविहारीशतपथी-प्रणीतं नाटकं 'परिवर्तनम्' अपि प्रयुक्तम् ।

(रमा शुक्ला)

नवप्रकाशन-चर्चा

श्रीरेवाभद्रपीठकाव्यम्

(सदाशिव कुमार द्विवेदी, सचिवः, कालिदास-संस्थानम्,
C/२ जोधपुर कालोनी, वाराणसी-२२१००५)

१९८१ वर्षतः काश्यां संप्रवृत्तस्य कालिदाससंस्थान-नामकस्य कालिदास शोधसंस्थानस्य 'श्रीरेवाभद्रपीठ'नामकः प्रथमो ग्रन्थः २८-६-८८ दिवसे प्रकाशं प्राप। अस्य प्रकाशनं नर्मदायाः प्रभवे मेकलगिरावमरकण्टकतीर्थे तत्रत्यस्य कल्याणाश्रमस्य संस्थापकैः स्वामिश्रीकल्याणदासैर्मध्यप्रदेशसंस्कृताकादम्या रेवासंगोष्ठ्यां व्यधायि। श्रीरेवाभद्रपीठं नाम १६१ पद्यात्मकं नूतनं संस्कृत-काव्यम्। अस्य रचयिता श्री रेवाप्रसादो द्विवेदी, वस्तु नर्मदादेव्याः स्तुतिः, छन्दांसि ४ अनुष्टुभः, ८ वसन्ततिलकाः, १०३ शार्दूलविक्रीडितानि, २६ शिखरिण्यः, १९ स्रग्धराः, १ हरिणी, दृष्टिः सामाजिकी, राष्ट्रिया, विश्वजनीना, दार्शनिकी, भावपूर्णा च; रीतिः प्रासादिकी प्रौढा च; भाषा मध्यममार्गीया नातिगभीरा नातिसरला च। अयमस्य विशेषो यत् प्रथमं २—६५ इत्येतैः पद्यैर्नर्मदातीरस्थितस्य नादनेर-जनपदस्य 'सेन्सस'-कल्पं वर्णनम्। एतद्धि नन्दनगरनाम्ना प्रसिद्धमैकमैतिहासिकमतिप्राचीनं नगरम्। पश्चाच्च ६७—१४८ पद्यैर्नर्मदाम्बाया माहात्म्यप्रकाशनमयी स्तुतिः। उदाहरणाय—[कल्पान्तेऽपि नर्मदा तिष्ठतीति वक्तव्ये]—

न यस्मिन्नाकाशं लसति न समीरो न दहनो
न तोयं नो भूमिस्तपति न रविर्नापि च विधुः।
तमोभूते तस्मिन् व्यभिचरति कालेऽपि भवतीं
न सत्ता, वाक्यानां त्वयि हि महतां सत्परिणतिः ॥१३८॥

या वै पश्यति दन्तकोरकयुगोरास्ये विधेश्छोटिका-
मात्रेणैव च तस्य पश्यतितरां कल्पान्तसिन्धौ लयान्।
तां त्वां काल-रथाङ्ग-चङ्क्रमकला-प्रेक्षासु पश्यन्तिका-
भूयिष्ठां प्रणमन्ति सन्ततममू सर्वा दिशो नर्मदाम् ॥१०८॥

★

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१५-१-१९८७ तः)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 25 '.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्यय : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20 00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते । किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात् । ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** (Arvacheenasanskritam/*Arvācīnasaṁskṛtam* इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M.O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली 110059 (भारतम्) ।

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन देववाणी प्रिंटर्स उत्तम नगर, नयी दिल्ली-११००५९ इति मुद्रणालये मुद्रापयित्वा '६ वाणी विहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१०/३)-प्रधानसम्पादकः डा० रमाकान्त शुक्लः । प्रकाशनतिथिः १५.७.१९८८

नवप्रकाशन-चर्चा

श्रीरेवाभद्रपीठकाव्यम्

(सदाशिव कुमार द्विवेदी, सचिवः, कालिदास-संस्थानम्,
C/२ जोधपुर कालोनी, वाराणसी-२२१००५)

१९८१ वर्षतः काश्यां संप्रवृत्तस्य कालिदाससंस्थान-नामकस्य कालिदास शोधसंस्थानस्य 'श्रीरेवाभद्रपीठ'नामकः प्रथमो ग्रन्थः २८-६-८८ दिवसे प्रकाशं प्राप। अस्य प्रकाशनं नर्मदायाः प्रभवे मेकलगिरावमरकण्टकतीर्थे तत्रत्यस्य कल्याणाश्रमस्य संस्थापकैः स्वामिश्रीकल्याणदासैर्मध्यप्रदेशसंस्कृताकादम्या रेवासंगोष्ठ्यां व्यधायि। श्रीरेवाभद्रपीठं नाम १६१ पद्यात्मकं नूतनं संस्कृत-काव्यम्। अस्य रचयिता श्री रेवाप्रसादो द्विवेदी, वस्तु नर्मदादेव्याः स्तुतिः, छन्दांसि ४ अनुष्टुभः, ८ वसन्ततिलकाः, १०३ शार्दूलविक्रीडितानि, २६ शिखरिण्यः, १९ स्रग्धराः, १ हरिणी, दृष्टिः सामाजिकी, राष्ट्रिया, विश्वजनीना, दार्शनिकी, भावपूर्णा च; रीतिः प्रासादिकी प्रौढा च; भाषा मध्यममार्गीया नातिगभीरा नातिसरला च। अयमस्य विशेषो यत् प्रथमं २—६५ इत्येतैः पद्यैर्नर्मदातीरस्थितस्य नादनेर-जनपदस्य 'सेन्सस'-कल्पं वर्णनम्। एतद्धि नन्दनगरनाम्ना प्रसिद्धमैकमैतिहासिकमतिप्राचीनं नगरम्। पश्चाच्च ६७—१४८ पद्यैर्नर्मदाम्बाया माहात्म्यप्रकाशनमयी स्तुतिः। उदाहरणाय—[कल्पान्तेऽपि नर्मदा तिष्ठतीति वक्तव्ये]—

न यस्मिन्नाकाशं लसति न समीरो न दहनो
न तोयं नो भूमिस्तपति न रविर्नापि च विधुः।
तमोभूते तस्मिन् व्यभिचरति कालेऽपि भवतीं
न सत्ता, वाक्यानां त्वयि हि महतां सत्परिणतिः ॥१३८॥

या वै पश्यति दन्तकोरकयुगोरास्ये विधेश्छोटिका-
मात्रेणैव च तस्य पश्यतितरां कल्पान्तसिन्धौ लयान्।
तां त्वां काल-रथाङ्ग-चङ्क्रमकला-प्रेक्षासु पश्यन्तिका-
भूयिष्ठां प्रणमन्ति सन्ततममू सर्वा दिशो नर्मदाम् ॥१०८॥

★

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१५-१-१९८७ तः)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 25 .00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्यय : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20 00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** (Arvacheenasanskritam/*Arvācīnasaṁskṛtam* इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M. O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली 110059 (भारतम्)।

'देववाणी-परिषद्, दिल्ली'-कृते डा० रमाकान्तशुक्लेन देववाणी प्रिंटर्स उत्तम नगर, नयी दिल्ली-११००५९ इति मुद्रणालये मुद्रापयित्वा '६ वाणी विहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१०/३)-प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५.७.१९८८

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	भाति मौरीशसम् (डा॰ रमाकान्त शुक्लः)	रु० ६.००
२.	सारस्वतसमुन्मेषः (डा॰ विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा॰स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा॰ उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं॰ टी॰ वी॰ परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (" ")	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा॰ रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (")	रु० ३०.००
९.	" " " (द्वितीय खण्डः) (")	रु० ४०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा॰ केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा॰ रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृत साहित्य में राष्ट्रिय भावना (डा॰ हरिनारायण दीक्षित)	रु० १५०.००
१५.	साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा॰ सुलेखचन्द्र शर्मा)	रु० ५०.००
१६.	अभिशापम् (नाटकम्) (डा॰ रमाकान्त शुक्लः)	रु० २०.००
१७.	रससिद्धान्त और नाटक (डा॰ सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं॰ टी॰ वी॰ परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं॰ विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा॰ शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा॰ रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरभिकाश्मीरम् (") (")	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा॰ रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा॰ सी॰ आर॰ स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा॰ रमाकान्त शुक्लः)	रु० २०.००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) (" ")	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा॰रामकिशोर मिश्रः)	रु० १२.००
२९	लक्ष्मीशतकम्, (डा॰ वरदाचार्यकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००

अर्वाचीनसंस्कृतम्

(अर्वाचीनसंस्कृतपरकं त्रैमासिकपत्रम्)

दशमवर्षे चतुर्थोऽङ्कः

१५ अक्टूबर, १९८८

प्रधानसम्पादकः

डा० रमाकान्त शुक्लः

एम० ए०, पीएच० डी०, साहित्याचार्यः

सांख्ययोगाचार्यः

देववाणी-परिषद्, दिल्ली

६ वाणी-विहारः, नयी दिल्ली-११० ०५९

अर्वाचीनसंस्कृतम् (१०/४)

(R. N. 34554/79)

(१५ अक्टूबर १९८८ ई०)

विषय-सूचिः

विषयः	लेखकः	पृष्ठांकः
१. सम्पादकीयम्		२३३
२. गीतमन्दाकिनी	डा० इच्छाराम द्विवेदी, मैनपुरी	२३५
३. यवद्वीपसाहित्यशतकम्	डा० राजेन्द्र मिश्रः, बाली	२३७
४. गान्धिसूक्तिसप्तशती	श्री शिवकुमार मिश्रः, हरदोई	२४१
५. भवतु प्रभातः	श्री मधुर शास्त्री, दिल्ली	३००
६. तत्स्मितम्	डा० दयानन्द भार्गवः, जोधपुरम्	३०१
७ देववाणी-परिषद्वार्ता	श्रीमती रमा शुक्ला	३०३
८. संस्कृत-जगद्वार्ता	,,	३०४

अर्वाचीनसंस्कृतम् (पंजी० सं० 34554/79)

१. प्रकाशनस्थानम—नयी दिल्ली।

२. प्रकाशनकालावधिः—त्रैमासिकम्।

३. सङ्केतेन सह मुद्रकस्य, प्रकाशकस्य सम्पादकस्य च नाम नागरिकता च—डा० रमाकान्त शुक्लः, भारतीयः, देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९।

४. पत्राधिकारिणां नाम्ना सह सङ्केतः—देववाणी-परिषद्, दिल्ली, ६, वाणी-विहारः, नयी दिल्ली-११००५९

डा० रमाकान्तशुक्ल इति नामाहं समुद्घोषयामि यदुपरिलिखितं सकलमपि विवरणं मम मतौ सत्यमस्ति।

—डा० रमाकान्त शुक्लः

१५-१०-१९८८ प्रकाशकः, सम्पादकः

सम्पादकीयम्

अर्वाचीनसंस्कृतस्य दशमवर्षीये चतुर्थेऽङ्के डा० इच्छारामद्विवेदिप्रणीतम् 'गीतमन्दाकिनी' शीर्षकं गीतम्, 'अभिराज' डा० राजेन्द्रमिश्र-प्रणीतं 'यवद्वीप-साहित्यशतकम्' श्रीशिवकुमारमिश्रप्रणीता 'गान्धिसूक्तिसप्तशती' श्रीमधुर-शास्त्रिप्रणीत 'भवतु प्रभात:' शीर्षकगीतं, डा० दयानन्दभार्गवप्रणीतं मुक्तवृत्तगीतं देववाणी-परिषद्वार्ता संस्कृतजगद्वार्ता च प्रकाश्यन्ते ।

मैनपुरीस्थ एकरसानन्दसंस्कृतमहाविद्यालये पुराणेतिहासविभागाध्यक्षेण किञ्च मैनपुरीस्थ-सुरभारती-सेवासंस्थानस्य संस्थापकसचिवेन श्रीमता डा० इच्छारामद्विवेदिना 'गीतमन्दाकिनी' इतिगीते गीतानामर्थवादे चिन्ताऽभिव्यक्ता, शुभ्रमार्गे च समेषां प्रवृत्तिराकांक्षिता ।

अद्यत्वे बालिद्वीपस्थेन अस्मन्मित्रवर्य्येण 'अभिराज' डा० राजेन्द्र मिश्र-महाभागेन नैका रचना ग्रथिता ग्रथ्यन्ते च । विगताङ्कयो: तद्रचितं शतकद्वयं प्रकाशितं बभूव । अस्मिन्नंके च सद्य एव तेन रचित 'यवद्वीपसाहित्यशतकं' प्रकाश्यते । अत्र कविना यव (जावा) द्वीपस्य पद्य-गद्यकाव्यानां देवशास्त्र-तत्त्वशास्त्र-नीतिशास्त्र-राजशास्त्र-कामशास्त्रादिविषयकाणां ग्रन्थानाञ्च विषये पद्यमया विचारा प्रकटिता: ।

श्रीशिवकुमारमिश्र-प्रणीता गान्धिसूक्तिसप्तशती सूक्तिकाव्यमस्ति । यथा श्रीमिश्रमहाभागेन दयानन्दसूक्तिसप्तशत्यां महर्षिदयानन्दस्वामिनां विचारा: संस्कृतभाषाया: पद्येष्वनूद्य प्रस्तुतास्तथैव गान्धिसूक्तिसप्तशत्यां राष्ट्रपितु: महात्मगान्धिनो विचारा: तथाकृत्य प्रस्तुता: ।

महात्मा गान्धि: सर्वोदयं, साधून्, सेवां, संयमं, सन्ततिनियमनं, स्वदेशि-भावनां, नारी:, संस्था:, स्वावलम्बनं, समाजवादं, स्वास्थ्यं, हरिजनान्, हिन्दी-भाषां हिन्दुत्वं, ज्ञानं, धर्मं, गुरुं, चरित्रम्, निर्धनतां, क्रोधं, पितरौ, ब्रह्मचर्यं, चिन्तां, कृषिं, गोसेवां, स्वाध्याय, संस्कृतभाषां, प्रार्थनां, मृत्युं, पुस्तकानि, उपवासं, शाकाहारं, शान्ति, परमेश्वरम्, अहिंसाम्, अस्पृश्यताम्, अनुशासनम्, अन्तर्जातीयव्यवहारम्, अभयम्, उच्चशिक्षाम्, उपकारम्, त्रुटी:, त्यागं, दयां, देशभक्ति, धर्मं, सम्प्रदायान्, बुद्धि, युद्धं, छात्रान्, वैदेशिकभाषां, विश्वासं व्यापारं, व्रतसंयमौ, व्यायाम, मद्यनिषेधं, शिक्षां, श्रद्धां, सत्य, स्वच्छताम् अन्यांश्च तांस्तान् विषयानधिकृत्य यदुक्तवान् तदेव ७०२ संस्कृतपद्यरूपेण श्रीमिश्रमहाभागो 'गान्धिसूक्तिसप्तशत्यां निबद्धवान् ।

अस्या रचनायाः शैली प्रायः प्रसादगुणोपेता वर्तते । दिङ्मात्रमुदाह्रियते । संस्कृतभाषामुद्दिश्य महात्मगान्धिनो विचारा इत्थं प्रस्तूयन्ते :

पर्याप्तं संस्कृतज्ञानं नाप्तमित्यस्मि दुःखितः ।
हिन्दी-मराठी-बंगाली-गुजरात्यः समा इमाः ॥
भाषास्तु शिक्षितुं शक्याः सम्यक् संस्कृतभाषया ॥
संस्कृते निहितं पूर्णज्ञानं भारतसंस्कृतेः ।
न बुधो भारतीयश्च तस्या अध्ययनं विना ॥
संस्कृतं देवभाषास्ति तस्या अध्ययनादतः ।
स्वस्मिन् दिव्यान् गुणान् नूनं ना विकासयितुं क्षमः ॥
संस्कृतेऽधिकसंख्याका सद्ग्रन्था एव सन्त्यतः ।
तेषां विमर्शसौभाग्यवन्तो धन्या नरा भुवि ॥

आशास्यते, एतादृशान् नेत्रोन्मीलकान् विचारान् पठित्वा उच्चपदस्था गान्धिदेवाः संस्कृतभाषायामुपेक्षाबुद्धिमबद्ध्वा तस्याः सर्वविधप्रचारप्रसारार्थं सहकारिणो भविष्यन्ति ।

कविकरश्रीमधुरशास्त्रिप्रणीतं 'भवतु प्रभातः' इति गीतं अद्यतने विषमे वातावरणे करुणायाः गुरुतायाः प्रकाशस्य च प्रचारं सन्दिशति ।

जोधपुरविश्वविद्यालयस्य संस्कृतविभागे आचार्याध्यक्षपदमलंकुर्वाणस्य डा० दयानन्दभार्गवमहाभागस्य 'तत्स्मितम्' इतिशीर्षकं मुक्तच्छन्दसा निबद्धं मार्मिकं गीतं नैसर्गिकस्मितस्य महिमानम् अभिनवशैल्या प्रस्तौति ।

अनेनाङ्केन अर्वाचीनसंस्कृतम् दशवर्षाणि पूरयति ।

१५-१०-१६८८
आर ६ वाणी विहारः,
नयी दिल्ली-११००५६

रमाकान्त शुक्लः

(रमाकान्त शुक्लः)
प्रधानसम्पादकः

गीतमन्दाकिनी

[डा० इच्छाराम द्विवेदी
पुराणेतिहासविभागाध्यक्षः, श्रीएकरसानन्द-केन्द्रीय-संस्कृत
महाविद्यालयः, मैनपुरी, (उ०प्र०)]

अर्थवर्षानदीसैकते साम्प्रतम्
गीतमन्दाकिनी शुष्कतामुपगता।
चञ्चलैश्शब्दगुच्छै-
र्युत जीवनम्
भावनागन्धहीनं
भृशं दृश्यते
सर्जने मूल्यचिन्ता
विलुप्ताऽधुना
मात्रवाणीविलासो
दरीदृश्यते
काव्यकोलाहलो मञ्चके दृश्यते
तत्त्वदृष्टिः परं शून्यतामुपगता।
शारदाराधने
भावशून्या सदा
अर्थसंसाधने
कण्ठमग्ना मुदा
लोकचिन्तां विहा-
याद्य संलक्ष्यते
चेतना स्वार्थलीना-
स्मदीया सदा
स्नेहशून्ये जडे मानसे मन्दिरे
भावनानर्तकी पङ्गुतामुपगता।

गौरवं पूर्वजानां
भृशं वर्णितम्
वर्तमाने विदग्धै-
श्चिरं जीवितम्
अंकुरो यद् भविष्ये
गृहे वर्तते
तत्कृते चिन्तनीयं
परं पोषणम्
अन्यथा ते वदिष्यन्ति नूनं हि नः
पूर्वजाः स्वार्थिनः क्षुद्रतामुपगता।
मत्कुटुम्बं भवे-
न्मित्र लोकत्रये
सन्मतिः संविशे-
च्छुभ्रमार्गे नये
सर्वमित्रा भवेद्
हर्षदात्री भवेत्
मुक्तिदात्री भवे
देहयात्रा लये
प्राणिनः संवदेयुः कवीनामहो
लोकयात्रा परं धन्यतामुपगता।

अभिराजराजेन्द्रविरचितम्

यवद्वीपसाहित्यशतकम्

(डा० राजेन्द्र मिश्रः, डेनपसारः, बाली)

यवद्वीपयशोगाथावल्लकीं मधुरस्वराम् ।
कविभाषामहं वन्दे देववाणीसहोदरीम् ॥१॥
सुहृदां सुखबोधाय नवानां ज्ञापनाय च ।
यवद्वीपीयसाहित्यं नाममात्रेण लिख्यते ॥२॥
द्वितीयशतकारम्भे खिस्तीयेऽधिचम्पकम् ।
स्थापितं हिन्दुसाम्राज्यं येन सद्धर्मसेविना ॥३॥
श्रीमाराय नमस्तस्मै राजराजेश्वराय च ।
वोचनाख्ये शिलालेखे यस्य कीर्तिर्महीयते ॥४॥
कौण्डिन्यं तमहं वन्दे भासुरं भूसुरोत्तमम् ।
कम्बुजे स्थापिता येन भारती दिव्यसंस्कृतिः ॥५॥
सोमामनिन्द्यतन्वङ्गीं कम्बुजेश्वरनन्दिनीम् ।
वृत्वा राजपदं लेभे माननीयो मनस्विनाम् ॥६॥
जयन्ति ननु शैलेन्द्राः कटाहद्वीपशासकाः ।
राजेन्द्रमपि ये चक्रुर्विनिद्रं चोलभूभुजम् ॥७॥
श्रीविजयाधीशान् वन्दे रघूणां पथयायिनः ।
येषामन्यतमः कोऽपि समरोत्तुङ्ग ऊर्जितः ॥८॥
अश्वमेधलसत्कीर्ति स्थापितवप्रकेश्वरम् ।
रत्नकाञ्चनवस्त्रान्नदानदीप्तं शिवानुगम् ॥९॥
तुञ्जुङ्गपुरभूपालं मूलवर्माणमञ्चितम् ।
वन्देऽहं यद्यशोऽद्यापि बोर्नियोभुवि राजते ॥१०॥
सञ्जयञ्च ततो वन्दे नृपं सन्नाहनन्दनम् ।
यदीयचक्रवर्तित्वे निबद्धोऽखिलसागरः ॥११॥

निर्माय बुकिरश्रृङ्गे पूतिकेश्वरमन्दिरम् ।
रम्ये मध्ययवद्वीपे योऽभूत्पाशुपताग्रणीः ॥१२॥
ख्रिस्ताब्दे सप्तमान्ते च मतरामाख्यपत्तने ।
राजधानीं विनिर्माय यशशास यवावनीम् ॥१३॥
ततश्चारभ्य ख्रिस्तीयं यावदब्दं नु षोडशम् ।
प्रबभूव यवद्वीपे हिन्दुसाम्राज्यमक्षतम् ॥१४॥
मतरामाधिपाः पूर्वं कडिरीशासकास्ततः ।
सिंहसारिकुलोत्पन्नास्तिक्तबिल्वनृपास्ततः ॥१५॥
तुरीयान्वयसञ्जाता भूपा एवं यशस्विनः ।
सुवर्णद्वीपविस्तारं बुभुजुर्बलदर्पिताः ॥१६॥
एषामेव यवेन्द्राणां भुजच्छायामहालये ।
देवी सरस्वती नित्यं विरराज विकस्वरा ॥१७॥
बभौ संस्कृतसम्मिश्रा यवभाषा महीयसी ।
कवितामाध्यमत्वात्सा कविभाषेति कीर्तिता ॥१८॥
प्राक्तनी यवभाषेयं तस्माड्डचसमीक्षकैः ।
प्रत्नजावीतिनाम्नाऽपि संस्तुताऽभूदनेहसि ॥१९॥
त्रयीत्र्यङ्गशास्त्राणि पुराणानि सवि तरम् ।
आर्षकाव्येऽथ काव्यानि कालिदासादिवाग्मिनाम् ॥२०॥
समग्रं खलु प्राचीनं भारतीयं नु वाङ्मयम् ।
लिखितं कविभाषायामथवाऽनूदितं बुधैः ॥२१॥
समृद्धं पुष्कलं तस्माज्ज्ञानविज्ञानमण्डितम् ।
वाङ्मयं यवभाषाया देववाणीसमप्रभम् ॥२२॥
वाङ्मयं यदिदं जाव्याः पद्यगद्यमयं द्विधा ।
पद्यं ककवीनं ख्यातं गद्यञ्च पर्वसंज्ञितम् ॥२३॥
निरमायि कदा केन किमाख्यो ग्रन्थ आदिमः ।
इति प्रमाणराहित्ये सुखं वक्तुं न शक्यते ॥२४॥
किन्तु कालक्रमोपात्तं योगीश्वरविजृम्भितम ।
कविभाषाऽऽदिमं काव्यं रामायणमिति ध्रुवम् ॥२५॥

मतरामनगरे रम्ये बलितुङ्गे प्रशासति ।
ख्रिस्तीये नवमाब्दान्ते ककवीनमिदं कृतम् ।।२६।।

षड्विंशतिमितैस्सर्गैरष्टसप्ततिसंख्यकैः ।
श्लोकैस्सप्तशतैर्युक्तं सहस्रद्वयसंख्यकैः ।।२७।।

प्रकरणवक्रताढ्यं छन्दोविचितिचित्रितम् ।
उदात्तकल्पनारम्यं भावगाम्भीर्यगर्भितम् ।।२८।।

यवद्वीपप्रकृत्या च रञ्जितं लोकवार्तया ।
अद्भुतं तदिदं काव्यं भट्टिवाल्मीकिभावितम् ।।२९।।

एकादशशताब्दे चाप्येरलंगें प्रशासति ।
अर्जुनविवाहं काव्यं म्पूकण्वः प्रणीतवान् ।।३०।।

किरातार्जुनसद्वृत्तं निबद्धं न्वत्र दृश्यते ।
यत्रार्जुनो जयी संख्ये लभते देवसुन्दरीः ।।३१।।

काव्यं भारतयुद्धाख्यं महाभारतसंश्रितम् ।
म्पूसेडाह्नामाऽसौ कविश्चक्रे मनोरमम् ।।३२।।

द्वादशे ख्रिस्तशतके श्रीजयामयशासने ।
प्रारभ्य सुकविः काव्यं सहसैव दिवङ्गतः ।।३३।।

पश्चात्पनुलुहः पूर्णं चक्रे काव्यं विखण्डितम् ।
कादम्बरीं यथा पूर्णां विदधे बाणनन्दनः ।।३४।।

जयवर्षे दिग्जयाख्ये कडिर्यां वै प्रशासति ।
कृष्णायनककवीनं म्पूत्रिगुणः प्रणीतवान् ।।३५।।

रुक्मिणीद्वारकाधीशप्रणयोद्वाहमण्डितम् ।
समुत्कीर्णमिदं काव्यं पलह्राख्ये शिवालये ।।३६।।

कविर्मोणगुणश्चक्रे काव्यं सुमनसान्तकम् ।
रघुवंशं पुरस्कृत्य कालिदासकृतं कृती ।।३७।।

हारसंग्रथितं कस्त्रं सुमनोऽत्र यतोऽन्तकम् ।
सुमनसान्तककं तस्मात् काव्यसंज्ञा महीयते ।।३८।।

म्पूधर्मजः कविश्रेष्ठः कामेश्वरसमर्चितः ।
कृतवान् स्मरदहनं कुमारसम्भवाश्रितम् ।।३९।।

पार्वतीशिवसंयोगाद् गणेशो जायते सुतः ।
यो निहन्ति रणे दैत्यं सुरारिं नीलरुद्रकम् ॥४०॥
एवं हि मूलकाव्यस्य वृत्तमन्यत्प्रकल्पितम् ।
धर्मंजेन यथाकामं कविना क्रान्तदर्शिणा ॥४१॥
भौमकाव्यं कृतं केन कदा नेदं विचीयते ।
किन्तु ख्यातेः परां कोटिं रूढेयं काव्यसर्जना ॥४२॥
कृष्णनन्दनसाम्बोऽसौ स्वप्ने यज्ञवतीं प्रियाम् ।
पश्यति प्रेयसीं स्वीयां पूर्वजन्मनि संगताम् ॥४३॥
तदन्वेषणसन्नद्धो द्वारकातः प्रतिष्ठते ।
दानवेन्द्रस्य भौमस्य किन्तु सा दुहिताऽनाद्य ॥४४॥
पार्थद्वितीयः कृष्णोऽन्ते भौमं नरकसंज्ञकम् ।
हत्वा यज्ञवतीं दत्ते स्वसुतायेति सा कथा ॥४५॥
उषानिरुद्धसम्बद्धं महाभागवताश्रितम् ।
मन्ये प्रकल्पितं वृत्तं यवद्वीपभुवाऽन्यथा ॥४६॥
ततः पनुलुहाख्योऽसौ धर्मेश्वरसभाकविः ।
हरिवंशं लिलेखान्यत् काव्यं घटोत्कचाश्रयम् ॥४७॥
श्रीकृष्णरुक्मिणीवृत्तं हरिवंशेऽनुवर्णितम् ।
घटोत्कचाश्रये किन्तु चित्रमेव कथानकम् ॥४८॥
अभिमन्युर्विवाहेच्छुः कृष्णपुत्र्या हलिक्लमात् ।
घटोत्कचाश्रयं याति वृणोति शितिसुन्दरीम् ॥४९॥
काव्यत्रयं ततश्चक्रे तनकुंगो महाकविः ।
स चक्रवाकदूताख्यं प्रथितं वृत्तसञ्चयम् ॥५०॥
उद्दालकापरसंज्ञं काव्यं पतिव्रताभिधम् ।
लुब्धकाख्यं तृतीयञ्च रुद्रभक्तिसमन्वितम् ॥५१॥
सिंहसारिकुलोद्धर्तुः राजसस्य सभाकविः ।
त्रयोदशशताब्दीयस्तनकुंगः प्रथाङ्कितः ॥५२॥
काव्यद्वयं तन्तुलरः प्रणिनाय जिनानुगः ।
हयम्बुरुकसाम्राज्ये चतुर्दशतमे शते ॥५३॥

अर्जुनविजयं काव्यं सुतसोमं च जातकम् ।
कार्तवीर्यकथा काव्ये प्रथमे वर्णिता खलु ॥५४॥
प्रपञ्चश्चापि तत्रत्यः काव्यं पृथुकलेवरम् ।
प्रणिनाय परं रम्यं तन्नागरकृतागमम् ॥५५॥
बहूनि सन्ति काव्यानि ललितानि श्रुतानि च ।
अज्ञाताः किन्तु कर्तारः कालश्चापि न निश्चितः ॥५६॥
काव्यं ब्रह्माण्डपुराणं कुञ्जरकर्णसंज्ञितम् ।
अर्जुनसहस्रबाहुनाम्ना ख्यातं तृतीयकम् ॥५७॥
पार्थयज्ञं ततस्तुर्यं किरातार्जुनवृत्तकम् ।
कालयवनान्तकाख्ये रम्या भागवती कथा ॥५८॥
काव्ये हरिश्रये वृत्तं सुमाल्यादिकरक्षसाम् ।
देवासुराणां संग्रामो हरिविजये वर्णितः ॥५९॥
कृष्णान्तकं ककवीनं कृष्णलीलासमापनम् ।
विघ्नोत्सवं व्रतसत्यं बौद्धधर्मावलम्बिते ॥६०॥
काव्ये रत्नविजयाख्ये सुन्दोपसुन्दवृत्तकम् ।
तिलोत्तमा ययोर्मध्ये जाता पञ्चत्वकारणम् ॥६१॥
सिंहलङ्गले काव्ये तु बौद्धधर्मावलम्बिनि ।
चरितं कामरूपिण्या वर्णितं नवकल्पनैः ॥६२॥
सुभद्राविवाहसंज्ञे ककवीने मनोरमे ।
सुभद्रार्जुनसन्दर्भः कविना साधु वर्णितः ॥६३॥
अभिमन्युविवाहाख्यं ततश्चतुर्दशतमम् ।
षोडशे शतके मन्ये काव्यमेतत् प्रकल्पितम् ॥६४॥
एतावन्ति हि काव्यानि कविभाषामयानि वै ।
नवमात् षोडशं यावत् निबद्धानि कवीश्वरैः ॥६५॥
साम्प्रतं गद्यसाहित्यं यावच्छक्यं निरूप्यते ।
पर्वसंज्ञं नु विख्यातं यत्सुवर्णधरान्तरे ॥६६॥
अनुवादो यतो गद्ये महाभारतपर्वणाम् ।
सर्वप्रथमं विहितस्ततः पर्वेदमुच्यते ॥६७॥

कथावाचनशैलीतः जावीगद्यं समुत्थितम् ।
इत्यत्र संशयो नास्ति विदुषां तत्र सम्मतिः ॥६८॥
दशमे ख्रिस्तशतके धर्मवंशे प्रशासति ।
गद्यशैल्याऽनुवादोऽयं जातो भारतपर्वणाम् ॥६९॥
विराटोद्योगभीष्मस्त्रीमुसलाश्रमवासिकम् ।
महाप्रास्थानिकं स्वर्गारोहणं चादिनामकम् ॥७०॥
एतानि नवपर्वाणि साम्प्रतं गद्यवन्ति च ।
प्राप्यन्ते यवभाषायां कर्तारो न विश्रुताः ॥७१॥
इतश्चाप्युत्तरं काडं गद्यरूपान्तरायितम् ।
किन्तु केन कदा नेदं न मनगपि बुध्यते ॥७२॥
काव्येऽप्यगस्त्यपर्वाख्ये प्राप्यतेऽगस्त्यचित्रणम् ।
जामदग्न्यचरित्रञ्च ख्याते विबुधपर्वके ॥७३॥
इदं ग्रन्थद्वयं प्रायो मौलिकं हि प्रतीयते ।
रामायणकथावृत्तं वर्णितं ह्युभयत्र वै ॥७४॥
ततश्चादिपुराणाख्यं कौरवाश्रमसंज्ञकम् ।
काव्यं गद्यमयं किन्तु मौलिकं न वचोऽन्तरम् ॥७५॥
सिंघलाङ्गलपर्वाख्या कथा सौगतशिल्पका ।
शतके पञ्चदशके ख्रिस्तीये व्यलेखि सा ॥७६॥
कुञ्जरकर्णपर्वाख्या द्वितीयाऽपि कथाकृतिः ।
लिखिता किन्तु नो ज्ञातस्तस्यां लेखनावधिः ॥७७॥
साम्प्रतं ख ु नामानि कृतीनां प्रतिशास्त्रकम् ।
परिज्ञानाय दीयन्ते कालकर्तृगुणं विना ॥७८॥
देवशास्त्रपरं गद्यं प्रथमं तत्र चर्च्यते ।
तन्तुपंगिलरान् राजपुराणं काण्डदेवकम् ॥७९॥
प्रशस्तिभुवनं काण्डचतुर्भूमिरथापरम् ।
उसनाबाल्युसनाजावासंज्ञकं रचनद्वयम् ॥८०॥
तत्त्वशास्त्रपरा ग्रंथा यवभाषाप्रकल्पिताः ।
निर्मलज्ञानस्वच्छन्दभरणार्धस्मरादयः ॥८१॥

भीमस्वर्गपूर्वभूमिमूलधर्माष्टलिङ्गकम् ।
शशाङ्कशरणं सप्तप्रणयो जीवकस्मरन् ॥८२॥
ततश्चोपासनाग्रन्था रोगसंगरभूमिकम् ।
पूजापरिक्रमा होमाध्यात्मिकं सूर्यमण्डलम् ॥८३॥
शिवबुद्धार्घ्यपात्रे च यमतत्त्वास्थिवेदने ।
अनुष्ठानव्रतं सौरं ममुकुर् सूर्यसेवनम् ॥८४॥
शिवतत्त्वपुराणं च पूजा पञ्चबलिक्रमा ।
सहस्रविष्णुनामाख्यं चण्डीधर्माभिधं ततः ॥८५॥
योगशास्त्रेऽपि विख्यातं प्रचुरं गद्यवाङ्मयम् ।
भोगसन्धियोगनिद्रासमाधिलक्षणादिकम् ॥८६॥
शरीरतत्त्वाख्यं जन्मरहस्यं योगदेवतम् ।
तत्त्वसमाधिसंज्ञञ्च योगशास्त्रविवेचनम् ॥८७॥
नीतिशास्त्रपरे गद्य तंत्रीकामन्दकाभिधम् ।
श्लोकान्तरं रणयज्ञं ततस्सारसमुच्चयः ॥८८॥
विधिशास्त्रं ततश्छन्दपिङ्गलं बहुविस्तरम् ।
राजशास्त्रमये गद्ये इन्द्रलोको महीयते ॥८९॥
जगत्कारणाख्यं च धर्मशिष्यं ततोऽपरम् ।
मंत्रिशासनसंज्ञञ्च चतुःपक्षोपदेशनम् ॥९०॥
ग्रंथा भैषज्यशास्त्रीयाः ख्याताः कलिमहौषधाः ।
पमेदस्मरकुष्टाद्याधमौंषधविषादयः ॥९१॥
कामशास्त्रेऽनङ्गशास्त्रं स्मरक्रीडोपलक्षणम् ।
इन्द्राणी रुक्मिणीग्रन्थौ स्मरतंत्रं सुविस्तरम् ॥९२॥
रहस्यसंगमाख्यं चाप्यंगुलिप्रवेशाभिधम् ।
अनंगोपदेशसंज्ञं कपुतुसानमद्भुतम् ॥९३॥
शास्त्राणां भूयसी संख्या पशुपक्षिकुलाश्रया ।
अनन्ता ग्रन्थसंख्याऽपि नात्र सर्वं प्रदीयते ॥९४॥
भूकम्पविषयो ग्रन्थः भगवान् गर्गनामकः ।
परिवेशो महामारीदुर्लक्षणनिवेदकः ॥९५॥

मुहूर्तलक्षणे योगाः सन्दिसूत्रे च लेखनम् ।
अमरस्त्रिदशः प्रोक्त इत्यस्मिन् शब्दसञ्चयः ॥९६॥
क्रीडाक्षरे लेखविधिः रोगाश्चन्द्रप्रमाणके ।
किर्तबासे च विज्ञानं भाषायाः सन्निरूपितम् ॥९७॥
कविता काव्यजानक्यां पञ्चकाण्डे च ज्यौतिषम् ।
तथा वसुन्धरोतत्त्वे सुन्दरीतेरुसेऽपि च ॥९८॥
यवग्रन्थानुक्रमणी साम्प्रतं ह्यवसीयते ।
प्रेक्षावतां विनोदाय यत्नतः संहृता मया ॥९९॥
सर्वाणि ग्रन्थनामानि यवभाषामयानि च ।
सुप्तिङन्तं पदं यत्र नियमो नैव दृश्यते ॥१००॥
शीर्षकाणामतः शुद्धिं शिथिलामपि सूरयः ।
मर्षयन्तु परं विज्ञाः साग्रहं विनिवेद्यते ॥१०१॥
शरयुगगगनदृगाख्ये ह्याश्विनमासे सिते द्वितीयायाम् ।
बाल्यां विक्रमवर्षे बुधेऽह्नि पूर्णो निबन्धोऽयम् ॥१०२॥

॥इतिश्रीमद्दुर्गाप्रसादाभिराजीसूनुना त्रिवेणीकविनाऽभिराजराजेन्द्रेणं बालीद्वीपेऽभ्यागताचार्येण कृता यवग्रन्थानुक्रमणी परिसमाप्ता ॥

गान्धिसूक्तिसप्तशती

(प्रणेता—श्री शिवकुमार मिश्रः)

सर्वोदयः

ईदृश्यर्थव्यवस्था स्याज्जगतो भारतस्य च ।
एकोऽपि न नरस्तिष्ठेदशनं वसनं विना ॥१॥
समानता भवेत् सम्यग् जनानामार्थिकस्थितौ ।
वैषम्यं यत् तदाश्वेव नाशं यायाद् धरातले ॥२॥
तावद् धरायां स्वातन्त्र्यमहिंसकमसम्भवम् ।
सम्भविष्यति यावन्नाऽहिंसकः समतोदयः ॥३॥
सम्पत्तिर्यावती लोके प्रजाया निखिलाऽपि सा ।
गोपालस्य समा भूमि-सूक्त्या साधु निगद्यते ॥४॥
आजीविकाऽधिकारोऽस्ति समस्तोद्यमिनां परम् ।
उपार्जनाय वित्तस्य नाधिकारोऽस्ति कस्यचित् ॥५॥
वित्तस्योपार्जनं स्तेयं जीविकातोऽधिकस्य यत् ।
हरणं परवृत्तेस्तज्ज्ञानतोऽज्ञानतोऽथवा ॥६॥
कार्यान्नरूपयोर्यो हि वेतनाश्वासनामयः ।
प्रभुः स दर्शनं दातुं क्षुधितेभ्यः प्रभुः स्वकम् ॥७॥
समाजवादो मे नास्ति केवलं निर्धनोदयः ।
समाजवादः सर्वेषामुदयो विद्यते मम ॥८॥
धनस्य संग्रहस्तावन्न सम्भाव्योऽस्ति जात्वपि ।
जनो हिंसात्मकं यावन्नोपायमधिगच्छति ॥९॥
विस्तृता निखिले लोके समये समुपागते ।
भविष्यति विनायासं समस्तोदयभावना ॥१०॥
सर्वोदयोपलब्धिः स्याल्लक्ष्यं नृणां यतोऽस्ति सा ।
मनुष्यता विकासस्य मूलमन्त्रसमाऽसमा ॥११॥

साधवः

साधवः पञ्चपञ्चाशल्लक्षा भारतवासिनः ।
कलंकरूपा देशस्य कृते निष्क्रियजीवनाः ॥१२॥
देशसेवां तथा कर्तुं साधवः प्रभविष्णवः ।
मायाजाले यथा बद्धा गृहस्थाश्रमवासिनः ॥१३॥
निरालस्या धनं धर्मस्थानमन्दिरसंगतम् ।
साधवो जनसेवायामुपयुञ्जन्तु चेत् समम् ॥१४॥
भावना तद्विरुद्धा या शिक्षितेषु विराजते ।
अविलम्बं क्षमा दूरीकर्तुं सा मम सम्मतौ ॥१५॥
साधवो लक्षसंख्याका भवेयुर्जनसेवकाः ।
देशनिर्मितये तर्हि लभ्यं सैन्यं भवेन्महत् ॥१६॥
मदकारिपदार्थानां सेवनं व्यसनानि च ।
विहाय जनतां पक्षे कुर्युः सेवकसाधवः ॥१७॥
वक्तुमिच्छाम्यहं साधून् इयन्मात्रं तु केवलम् ।
निमज्जयन्तु ते नाम न स्वधर्मस्वसंस्कृतेः ॥१८॥

सेवा

त्यागाय दुष्करस्त्यागो भवत्यत्र न संशयः ।
जायते सुकरः सेवानिमित्तं क्रियते यदि ॥१९॥
वर्तते मानसे चेत् ते दिदृक्षा परमात्मनः ।
सेवायां निर्धनानां त्वं तं विलोकितुमर्हसि ॥२०॥
कुर्याम व्यवहारं स्वं यदि शुद्धतमं वयम् ।
कर्तुमाशां तदा शक्ताः भवितुं सत्यसेवकाः ॥२१॥
सेव्यो न विस्मरेज्जातु सेवकं नित्यसेविनम् ।
विस्मृतिर्विद्यते तस्य स्वकर्तव्यान्महाच्युतिः ॥२२॥
दुःखाकुलोऽस्ति यः कोऽपि प्राणिमात्रेषु प्राणवान् ।
भक्तिर्भगवतस्तस्य सेवैवात्र विनिगद्यते ॥२३॥

सेवास्त्यंगविहीनानां शाश्वतो धर्म उत्तमः ।
ददाति दर्शनं नित्यं तद्रूपेण प्रभुः स्वयम् ॥२४॥
सेवाकर्मणि लग्नः स्यादेकस्मिन् मानवो यदा ।
विनावश्यकतां तावन्मोहः परविचारणा ॥२५॥
राजनीतिकसंघर्षमतभेदेषु सत्स्वपि ।
सेवाकार्ये मनुष्याणां मतैक्यमभिकांक्ष्यते ॥२६॥
विशुद्धसेवया सत्ता यास्माभिरधिगम्यते ।
अस्माकं हृदयं श्रेष्ठं सा सत्ता विदधात्यलम् ॥२७॥
स एव शून्यवद् भूत्वा समर्थो जीवितुं भवे ।
दुःखेऽन्यजनशुश्रूषां सर्वसेवां करोति यः ॥२८॥
जीवनं यापयिष्यन्ति भूत्वा सेवापरायणाः ।
ये जनास्ते न लप्स्यन्ते पतनावसरं क्वचित् ॥२९॥
सेवाया अपि संमोहो भवत्येव न संशयः ।
मोहभावं विहायैव सत्सेवा संभविष्यति ॥३०॥
लघ्वेव भवति क्षेत्रं शासनस्य परं महत् ।
क्षेत्रं भवति सेवाया दृढोऽयं मम निश्चयः ॥३१॥
रक्षेन्मामीश्वरो हन्यादथवा स्वेच्छया परम् ।
स्थातुं नाहं समर्थोऽस्मि कुष्ठिनां सेवया विना ॥३२॥
सेवा मह्यं प्रियात्यर्थं साऽस्ति मानववृत्तिषु ।
समुत्कृष्टतमा वृत्तिस्तथा च सुमहत्तमा ॥३३॥
वस्त्वन्तरं किमप्यन्यत् सेवायाः सचराचरे ।
समुत्कृष्टतरं नास्ति विधातुं द्रवितं नरम् ॥३४॥
विस्तारः सर्वसंसारे ख्रीस्तधर्मस्य विद्यते ।
प्रधानं कारणं तस्य किमन्यत् सेवया विना ॥३५॥
पृष्ठे यस्या न सेवायाः कराणां तालिकाध्वनिः ।
परमाशीः प्रभोः पूर्णा सा सत्सेवा ति नापरा ॥३६॥
मूकैव सेवा सेवाऽस्ति तदुद्घोषः सडिण्डिमः ।
क्रियते कार्यते येन तेनात्मा हन्यते स्वयम् ॥३७॥

संयमः

नाशक्यः पुनरुद्धारो यदि कुर्युः सुसंयताः ।
वर्णस्याश्रमधर्मस्य स्वानि कार्याणि मानवाः ॥३८॥
मानवः कर्मशीलो यो यावानेव भविष्यति ।
नरः संयमशीलः स तावानेव भविष्यति ॥३९॥
संयमेन विहीनस्य स्वच्छन्दकरणस्य च ।
अकर्णधारनौतुल्यं जीवनं नंक्ष्यति ध्रुवम् ॥४०॥
निःसन्देहं ममादर्शं जीवनस्य समे नरः ।
मद्वत् प्राप्तुं क्षमाः साशं यतन्तां श्रद्धया यदि ॥४१॥
सीमा न संयमस्यास्ति काप्यतो नैव विद्यते ।
कापि निर्धारिता सीमाऽहिंसाया अपि निश्चिता ॥४२॥
संयमः जीवनस्यास्ति सूत्रं काञ्चननिर्मितम् ।
जीवनं सुखसम्पन्नं तद्वतां जायते नृणाम् ॥४३॥

सन्तति-नियमनम्

आवश्यकमहं मन्ये सन्तत्याः संयमं परम् ।
विषये तदुपायानां मतभेदोऽस्ति मामकः ॥४४॥
नैसर्गिक उपायोऽस्ति ब्रह्मचर्यं महद् व्रतम् ।
सन्तत्या यमनस्यान्ये नोपायाः सन्ति तद्विधाः ॥४५॥
कृत्रिमाणामुपायानां विषये मतभिन्नता ।
अनैतिकत्वं यस्मात् ते शक्नुवन्ति विवर्धितुम् ॥४६॥
उपायाः कृत्रिमा नूनं वर्धयिष्यन्ति वासनाम् ।
इन्द्रियाधीनतां ह्रासं गृहस्थानाञ्च नैतिकम् ॥४७॥
जघन्यं विद्यते पापपरिणामात् स्वरक्षणम् ।
कृतानां निजकार्याणामशुभादथवा शुभात् ॥४८॥
गर्भाधानावरोधायोपायान् ये कृत्रिमान् नराः ।
समर्थयन्ति किं तेषां सन्ततीनां भविष्यति ॥४९॥

पालनं ब्रह्मचर्यस्य नितान्तावश्यकं मतम् ।
कृते विवाहितानां स्यादंशतः पूर्णतो न चेत् ।।५०।।

कृत्रिमाः सन्त्युपाया ये कथ्यन्ते ते निरापदः ।
वैज्ञानिकाश्च, वार्तेयं विपरीतास्ति सर्वथा ।।५१।।

पानभक्षणनिद्रावत् सम्भोगो भार्यया सह ।
आवश्यकोऽस्ति नैतस्मिन् विश्वासो विद्यते मम ।।५२।।

दम्पत्योर्यौनसम्बन्धो वारमेकं तृतीयके ।
चतुर्थकेऽथवा वर्षे सन्तत्यै युक्तमुच्यते ।।५३।।

स्वेच्छया वर्धितुं शक्यः कर्तुमल्पश्च मानवैः ।
समस्तैर्यौनसम्बन्धो यथाकामं मतिर्मम ।।५४।।

सन्तत्याः कृत्रिमोपायैर्निरोधापेक्षयास्म्यहम् ।
पक्षे तस्या निरोधस्य ब्रह्मचर्येण हृद्वलैः ।।५५।।

ब्रह्मचर्यव्रतं त्यक्त्वा समोपाया मतौ मम ।
सन्तत्याः संनिरोधस्यानैतिका गर्हिता अतः ।।५६।।

सन्तत्याः संनिरोधस्य वार्तायाः करणं महत् ।
मन्ये घृणावहं कार्यमुपायैरितरैरहम् ।।५७।।

स्वदेशी

निर्मितं यत् स्वदेशे तत् स्वदेशीति निगद्यते ।
वस्त्रं, वैदेशिकैः सूत्रैर्निर्मितं तन्न कथ्यते ।।५८।।

स्वदेशिव्रतनिर्वाहस्तदैव विहितुं क्षमः ।
विदेशिवस्तुनो नैव प्रयोगः क्रियते यदा ।।५९।।

स्वातन्त्र्यवद् विकासोऽपि भारतस्यार्थिकोऽसमः ।
स्वदेशिभावनायोगादचिरेण भविष्यति ।।६०।।

व्रतं स्वदेशिनोऽन्धायाः श्रद्धाया विषयो यदि ।
विधास्यते जनैर्नूनं निधनं तदवाप्स्यति ।।६१।।

स्वदेशिनः प्रयोगायोपदेष्टव्यो भवेद् यदि ।
भारतीयो जनः कश्चित् तस्मा एतत् त्रपाकरम् ।।६२।।

स्वाधीनेषु समस्तेषु देशेषु जगतीतले ।
स्वदेशिभावना भव्या सम्यग् व्याप्ता विराजते ॥६३॥

स्त्रीणां विषयः

विधवानां समस्तानां विवाहो न समर्थितः ।
मया जातु परं बालविधवानां समर्थ्यते ॥६४॥
ममायं दृढविश्वासो हिन्दुधर्मावलम्बिनी ।
सत्यास्ति विधवा रत्नं धर्मालोकप्रसारकम् ॥६५॥
शिरोमणिसमा मन्ये पातिव्रतपरायणाः ।
सतीरहं जगद्वन्द्यास्ताः समस्ता न संशयः ॥६६॥
न्यायबुद्ध्या विचारं चेत् करिष्यन्ति नरा यदि ।
इदं ज्ञास्यन्ति ते नार्हा विधवादमने मनाक् ॥६७॥
जायते यदि संयोगात् स्वकर्तव्यच्युतः पतिः ।
तस्य संरक्षणं धर्मो धर्मपत्न्याः प्रकीर्तितः ॥६८॥
पालितो विधवाधर्मो विधवाभिर्बलात् खलु ।
दूषणं कथ्यते नैव भूषणं मयका क्वचित् ॥६९॥
प्रौढा स्त्री विधवा भूत्वा नोद्वहेदपरं नरम् ।
मान्यानां माननीया सा वन्दनीया निगद्यते ॥७०॥
महिला भयहीना चेद् विचरेद् धरणीतले ।
तदीयमहितं कर्तुं न कश्चित् प्रभविष्यति ॥७१॥
अपमानमहं मन्येऽबलानिगदनं स्त्रियः ।
कर्तुं शुभाशुभं शक्तिस्त्यागिन्यां परमा यतः ॥७२॥
पुरुषस्य न दास्यस्ति स्त्री तस्य सहधर्मिणी ।
सुहृदर्धांगिनी चास्ति सा सदा सहचारिणी ॥७३॥
एकाकी पुरुषोऽपूर्णोऽपूर्णा नारी तथा मता ।
विद्येते पूरकौ द्वावप्यन्योन्यस्य परस्परम् ॥७४॥
ददाति या स्वदेशाय रोगहीनां सुशिक्षिताम् ।
सन्ततिं तेजसा दीप्तां सेवते देशमेव सा ॥७५॥

विद्यते या पवित्रा सा पराजेतुं न शक्यते ।
दैवैरपि भवे देवितुल्याऽतुलपराक्रमैः ॥७६॥
भ्रमात्मको विचारोऽयं विद्यते यत् स्त्रियः स्वयम् ।
पवित्रतां क्षमा नैव रक्षितुं निर्बला हि ताः ॥७७॥
प्रियात् प्राणान् विहायापि रक्षितुं स्वपवित्रताम् ।
या स्त्री समुद्यता तस्याः किं करिष्यन्ति दुर्जनाः ॥७८॥
कस्यापि पुरुषस्यास्ति सम्बन्धो भार्ययाऽन्यया ।
महापापमधःपातकारि त्याज्यं त्रपाकरम् ॥७९॥
बालिका विधवैकाऽपि क्वापि यद्यस्ति भारते ।
अन्यायस्यास्य तर्ह्यस्ति नाशः समुचितो ध्रुवम् ॥८०॥
अधिकारविचारस्य प्रथास्थापनतत्परैः ।
स्त्रीणां, देयोन चास्माभिस्तद्धर्मस्य वलिः क्वचित् ॥८१॥
एतादृशी भवेदेव स्थितिः स्त्रीणां यया सदा ।
मुक्तास्ताः स्युरनायासं वस्त्रभोजनचिन्तया ॥८२॥
परोपकारसंलग्ना जीवनं यापयेत् स्वकम् ।
ब्रह्मचर्यव्रताचारं विधवा या समीहते ॥८३॥
पत्नीसंरक्षणं तस्या भरणं पोषणं तथा ।
आवश्यको यथायोग्यं पत्युर्धर्मः प्रकीर्तितः ॥८४॥
बालवैधव्यतामिस्रं सत्याग्रहरवेः पुरः ।
भविष्यति क्षमं स्थातुं न स्वप्नेऽपि कदाचन ॥८५॥
धर्मस्य संस्कृतेश्चापि भारतस्याभिरक्षणम् ।
यदद्यावधि सञ्जातं स्त्रीणां तद्धि कृपाफलम् ॥८६॥
सांसारिकं सुखीकर्तुं जीवनं यदि ते स्पृहा ।
स्त्रीणां साहाय्यमेवास्ति तर्ह्यालम्बनमुत्तमम् ॥८७॥
यदि कापि क्षमा शक्तिर्विहाय परमेश्वरम् ।
आनन्दरूपिणं कर्तुं भवं स्त्रीशक्तिरस्ति सा ॥८८॥
सती वशंवदा पत्नी सौभाग्यं पुरुषस्य वै ।
स्नेही विश्वासपात्रञ्च पतिः पत्न्या महत् सुखम् ॥८९॥

हस्तक्षेपं न चेत् कुर्युर्नराः स्त्रीविषये स्वयम् ।
स्वसमस्यासमाधानक्षमास्तास्तर्हि धीयुताः ॥९०॥

संस्थाः

संस्था या सार्वजनिकाः व्यवस्थां स्वव्ययस्य ताः ।
ऋणादन्यगृहीतान्न कुर्युरेषा मतिर्मम ॥९१॥
स्वेच्छाचारित्वमादत्ते सा संस्था नास्ति संशयः ।
कार्यं यस्याः कुसीदेन वित्तलब्धेन चाल्यते ॥९२॥
स्वानुभूत्या दृढोऽयं मे विश्वासोऽस्ति विनिर्मितः ।
स्थायिकोशैर्न संस्थानां जातु सञ्चालनं भवेत् ॥९३॥
सेवाया भावना यस्मिन् भवेत्, परिचितो भवेत् ।
संस्थानिर्माणकार्येषु नियमेषु स पूर्णतः ॥९४॥
संघेऽस्ति निहिता शक्तिर्वर्तमाने कलौ युगे ।
संस्थाभिरेव संघस्य कर्तुं शक्या विनिर्मितिः ॥९५॥
कार्यं संस्थागतं नैकव्यक्त्यधीनमिहेष्यते ।
अन्यान्यपुरुषाधीनं प्रगतिं तत् करोत्यलम् ॥९६॥

स्वावलम्बनम्

साफल्यस्यास्ति सोपानमाद्यमात्मावलम्बनम् ।
पाठ्यः पाच्यश्च पाठोऽयं समैः प्राक् सर्वतो जनैः ॥९७॥
मदीयं तुच्छकार्यं तु विद्यतेऽस्य प्रदर्शनम् ।
जनाः कथं स्वकाठिन्यं दूरीकर्तुं क्षमाः स्वयम् ॥९८॥
स्वावलम्बनसिद्धान्तो यदि ग्रामेषु योज्यते ।
तर्ह्यावश्यकवस्तूनि स्वयमुत्पादयन्तु ते ॥९९॥
तावदावश्यकं व्यक्तेः कृतेऽस्त्यात्मावलम्बनम् ।
यावदावश्यकं चैतत् कृते राष्ट्रसमाजयोः ॥१००॥
सुखमुत्पद्यते नूनं कार्यात् तस्मान्नवं नवम् ।
स्वावलम्बनमाश्रित्य कार्यं यत् साध्यते जनैः ॥१०१॥

प्रत्येकं देशजो बालः पठेत् पाठं च पाठयेत् ।
आत्मावलम्बनस्य स्यात् पाश्चात्त्येभ्यो गुणग्रहः ।।१०२।।
आत्मावलम्बिनोऽभूवन् नराश्चाध्यवसायिनः ।
महान्तो बहुसंख्याका महीतलनिवासिनः ।।१०३।।

सभाजवादः

पुरातनस्य देशस्यातिप्राचीनपरम्परा ।
समाजवादो नास्त्येष विचारो नः कृते नवः ।।१०४।।
रूसादयः समे देशा अनायासेन मन्मतौ ।
समाजे समतां हिंसां विना स्थापयितुं क्षमाः ।।१०५।।
समाजवाद एवास्ति केवलं न मतौ मम ।
ईशोपनिषदाधारः साम्यवादोऽपि नूतनः ।।१०६।।
विचारः साम्यवादस्य रम्यऽस्ति हि समे जनाः ।
नीचोच्चभावनाहीना भजन्त्यस्मिन् समानताम् ।।१०७।।
सर्वे समस्तरा भूपकृषकाः सधनाऽधनाः ।
समाजवादसिद्धान्तानुसारं स्वामिसेवकाः ।।१०८।।
सत्ता द्वैतस्य नास्त्यत्र सर्वत्रास्ति समानता ।
समाजवादसिद्धान्ते नानैक्यं क्वापि राजते ।।१०९।।
समाजवादो यो वादहीनः सत्यः स विद्यते ।
वादात् समाजवादस्य सत्यं नश्यति सत्यता ।।११०।।
समाजवादिनं मन्ये स्वमहं मे प्रियोऽस्त्ययम् ।
भावः, परं मतं भिन्नं परेभ्यो विद्यते मम ।।१११।।
घोरमार्थिकवैषम्यं यदद्यत्वे विराजते ।
रामराज्यं कथंकारमपि नायातुमर्हति ।।११२।।
संख्याता धनिनः सन्तु म्रियन्तां च बुभुक्षया ।
असंख्याता इदं रामराज्यद्योतकमस्ति किम् ।।११३।।
सीमितेषु विभक्तं न वित्तवत्सु भवेद् धनम् ।
विभक्तं सप्तलक्षेषु देशग्रामेषु तद् भवेत् ।।११४।।

सहजाः कामनाः पूर्णाः सर्वेषां स्युरयं मया ।
समानस्य विभागस्य ज्ञायतेऽर्थोऽधिकं नहि ॥११५॥
अर्थव्यवस्था सा पापपरिपूर्णाऽस्ति पूर्णतः ।
नैतिकं जनकल्याणं नाशयेद् या व्यवस्थिता ॥११६॥
कार्यमस्ति सुधारस्य संसारे राजनीतिके ।
समाजवादनाम्ना यत् क्रियते कार्यते भुवि ॥११७॥
वादं त्यक्त्वा समाजस्य स्युर्हितायैव तत्पराः ।
समाजवादोऽसौ नूनमस्ति सर्वोत्तमस्तदा ॥११८॥

स्वास्थ्यम्

शरीरे विद्यते सर्वं शरीरे यन्न विद्यते ।
संसारेऽस्मिन् न तत् क्वापि विद्यते नात्र संशयः ॥११९॥
तथ्य पूर्णाऽस्ति वार्तेयं जगतोऽस्ति प्रतिकृतिः ।
लघुरूपाऽस्मदीयं यत् शरीरं विद्यते लघु ॥१२०॥
शरीरस्य यदारोग्यं दीर्घायुष्यं च तत् समम् ।
विषयेभ्यो विरागस्य परिणामो न संशयः ॥१२१॥
स एव केवलं स्वस्थो मनुष्यो विद्यते भुवि ।
यस्य स्वस्थे शरीरेऽस्ति स्वस्थमस्तिष्कसुस्थितिः ॥१२२॥
विना क्लान्तिं श्रमं कर्तुं समर्थो योऽस्ति मानवः ।
दैहिकं दिवसं यावत् स स्वस्थो विनिगद्यते ॥१२३॥
अभिप्रायोऽयमप्यस्ति स्वस्थस्य वपुषः सतः ।
समनस्कानि स्वस्थानि भवेयुः करणान्यपि ॥१२४॥
अनिवार्यं नियमितं कार्यं स्वास्थ्याय विद्यते ।
उत्तमाय शरीरस्य सर्वांगानां सुनिश्चितम् ॥१२५॥
कल्याणं वपुषा कर्तुं शक्यतेऽन्यस्य चात्मनः ।
परं दुरुपयोगेन द्वयोर्हानिर्महीयसी ॥१२६॥
अन्नं पयोऽनिलं देहं प्राप्नुयाद् विधिपूर्वकम् ।
निरालस्यं तथा कार्यं कुर्यात् स्वस्थः सदा भवेत् ॥१२७॥

स्वास्थ्यरक्षणवाञ्छा चेत् तर्हि कुर्यात् सुसंयतः ।
प्राकृतं भोजनं, जह्यान्मादकद्रव्यसेवनम् ॥१२८॥
अत्यन्तावश्यकं स्वास्थ्यरक्षणार्थमिदं मतम् ।
व्रतस्य ब्रह्मचर्यस्य पालनं व्याधिनाशकम् ॥१२९॥
सांसारिकाणि सर्वाणि सुखानि मिलितान्यपि ।
शान्तिं नैव प्रयच्छन्ति स्वास्थ्यहीनाय कर्हिचित् ॥१३०॥
कुर्वन्ति व्यवहारं ये विरुद्धं प्रकृतेर्जनाः ।
त एव प्रायशो रोगैर्विजायन्ते समाकुलाः ॥१३१॥
मनुष्यापेक्षया प्रायः पशवश्च विहंगमाः ।
न्यूनं रोगैः समाक्रान्ता भवन्तीति विलोक्यते ॥१३२॥
मानसं च शरीरं च स्वस्थे यस्य द्वयेऽपि सः ।
शोभतेऽतितरां लोके स्वस्थमानवसंज्ञया ॥१३३॥
मनःशरीरसम्बन्धो घनिष्ठो विद्यते महान् ।
क्षतावेकस्य जातायां सहतेऽन्यः परां व्यथाम् ॥१३४॥
सिद्ध्यतेऽनेन यच्छुद्धं चरित्रं स्वास्थ्यसाधनम् ।
विचारा वासनामिश्रा अस्माद् रोगाः प्रकीर्तिताः ॥१३५॥
अस्माभिरीशसेवार्थमेतदासादितं वपुः ।
धर्मोऽतोऽस्त्ययमस्माकं स्वास्थ्यस्यास्य सुरक्षणम् ॥१३६॥
काले समागते यस्मादिदं प्रत्यर्प्यते तथा ।
शुद्धं च निष्कलकं च यथा प्राप्तमिदं वपुः ॥१३७॥

हरिजनाः

चिह्नमेतदहं मन्ये सुतरां शुभसाधनम् ।
उद्बुद्धा यत् स्वयं सुप्ताः शूद्राः कालाद्बहोः समे ॥१३८॥
हीनात् हीनतमा लोका यस्मिन् स्वातन्त्र्यमाप्नुयुः ।
स्वातन्त्र्यं तदहं मन्ये स्वातन्त्र्यं सुसमीहितम् ॥१३९॥
अस्पृश्या ये निगद्यन्ते सन्तु पात्राणि ते जनाः ।
मन्दिरेषु प्रवेशस्य समाजहितसाधकाः ॥१४०॥

सुधारो वा प्रचारो वा तावत् संभाव्यते न हि ।
अस्पृश्येषु, स्थिता यावन्नश्येदस्पृश्यता न हि ॥१४१॥
जन्मनः कारणादेव न कश्चिदपि मानवः ।
अस्पृश्यः शक्यते वक्तुं ममैतदचलं मतम् ॥१४२॥
हिन्दवो न करिष्यन्ति व्यवहारं शुभं यदि ।
शूद्रैः साधं तदावश्यं हिन्दूधर्मो विनंक्ष्यति ॥१४३॥
असवर्णान् पृथक्कृत्य हिन्दुजातिः करिष्यति ।
आत्महत्यामियं - नाशा कर्तव्या जातु केनचित् ॥१४४॥
पशुभ्योऽप्यधमावस्थां हिन्दूभागो महत्तरः ।
ययाऽस्ति प्रथया यातो घृणां तां प्रत्यहं वहे ॥१४५॥
दुःखिष्वस्मासु शूद्राणां जातो भाग्योदयो न चेत् ।
स्वराज्यसुधया मत्ते देशे तस्य कथा तु का ॥१४६॥
स्वसुधारपराः सन्तु समुत्साहसमन्विताः ।
शूद्रा येन प्रवृत्तिर्न शेषा तेष्वशुभा भवेत् ॥१४७॥
कार्यं कुर्युः सुधारस्य शूद्रेभ्यो हिन्दवः समे ।
प्रायश्चित्तस्वरूपेण सवर्णाः सम्मतिर्मम ॥१४८॥
शूद्रोऽहं स्वेच्छया जातो विश्वासो मम विद्यते ।
निःस्वार्थं चेत् कृता सेवा स्वीकृता तैर्भविष्यति ॥१४९॥
अस्पृश्यता कलंकात् स्वं मोचयित्वात्मशुद्धये ।
हरेर्जनानां कार्येऽस्मिन् सलग्नोऽहं दिवानिशम् ॥१५०॥
उन्नतौ कृत्रिमा बाधा यदा दूरीभविष्यति ।
अस्पृश्यता तदैवाशु शूद्राणां सर्वतोमुखी ॥१५१॥
उन्नतिर्भविता नूनमार्थिकी नैतिकी तथा ।
सामाजिकी तथा राजनैतिकी पूर्णरूपतः ॥१५२॥
(युग्मकम्)

सवर्णैः प्रयुक्ता यदाऽस्पृश्यतेयं
विनाशं गमिष्यत्यलं मूलचूलात् ।
तदा तत्प्रशाखाः स्वयं म्लानरूपाः
भविष्यन्ति शूद्रेषु वृद्धिं गतायाः ॥१५३॥

स्वराज्येति शब्दस्य कामं मनुष्यैः
कृतोऽर्थो भवेत् कोऽपि तस्मिन् परं चेत् ।
समस्ताधिकाराः परैर्लभ्यमानाः,
न शूद्रैः सुलभ्याः किमेतन्न दम्भः ॥१५४॥
अहं स्वकीयं कर्तव्यं मन्ये भिक्षाभियाचनम् ।
विधातुकामः शूद्राणां कल्याणं राष्ट्रशंकरम् ॥१५५॥

हिन्दी भाषा

पाठ्यक्रमे द्वयोः स्थानं भारतीये ध्रुवं भवेत् ।
ध्रुवं मतमिदं मेऽस्ति हिन्दीसंस्कृतभाषयोः ॥१५६॥
हिन्द्याः शैलीमहं मन्ये भाषामुर्दूं मनोहराम् ।
हिन्दीगर्भसमुद्भूतां लिपिमात्रापराभिधाम् ॥१५७॥
गुजराती-महाराष्ट्री-हिन्दीभाषासु नाधिकः ।
पार्थक्यजनको भेदो दृष्ट्वायाति मे क्वचित् ॥१५८॥
अमृतसरकांग्रेसे प्रवासि-कष्टान्यमहं हिन्द्याम् ।
उक्त्वा दृढविश्वस्तो जातः सा राष्ट्रभाषेति ।१५९॥
दाक्षिणात्यैर्न चेद हिन्दी स्वीकृता देशवासिभिः ।
तेषां देशस्य दौर्भाग्यं द्वयोरेतद् भविष्यति ॥१६०॥
प्रचारश्च प्रसारश्च सरलः सुकरः शुभः ।
हिन्द्या यथाऽस्ति नैवास्ति तथान्यस्या मतौ मम ॥१६१॥

हिन्दुत्वम्

या पत्नीं प्रति सैवास्ति हिन्दुत्वं प्रति भावना ।
दोषान् ज्ञात्वापि तत्त्यागं विधातुं न क्षमोऽस्म्यहम् ॥१६२॥
दोषान् सीमिततां हिन्दूधर्मस्य प्रविलोकयन् ।
अपि बद्धोऽस्म्यनेनाहं माभकोऽनुभवोऽस्त्ययम् ॥१६३॥
विस्तृतानन्तशाखोऽस्ति विशालद्रुमसन्निभः ।
निखिलासु दिशास्वेको हिन्दूधर्मश्चिरोदितः ॥१६४॥

सुधारकोऽस्म्यहं पूर्णः नाऽस्वीकर्तुं क्षमः परम् ।
महत्त्वपूर्णा हिन्दुत्वरीतयो निखिला अपि ॥१६५॥
आत्मानमसमर्प्यैव गुरवेऽज्ञानिने चिरम् ।
रोचिष्यतेऽटनं मह्यं सूचीभेद्ये तमस्यपि ॥१६६॥
मानवानां स्वभावोऽस्ति मूर्तीनां पूजनं वयम् ।
प्रतीकान्वेषणे सर्वे सन्नद्धाः स्म यथाबलम् ॥१६७॥
नास्ति वादोऽवतारस्य निष्फलो जगतीतले ।
आपद्गता नरा आशावन्तोऽनेन भवन्ति हि ॥१६८॥
काममर्थो भवेत् कोऽपि हिन्दूशब्दस्य नास्म्यहम् ।
परिवर्तनपक्षेऽस्य यतः प्रचलितोऽस्त्ययम् ॥१६९॥

ज्ञानम्

ज्ञानावाप्तिं विना कोऽपि मानवो जगतीतले ।
वस्तुतोऽवाप्तुमर्हो न स्वातन्त्र्यं सौख्यदायकम् ॥१७०॥
प्रभुप्राप्तेस्त्रयो मार्गाः कर्मज्ञानमुपासना ।
नमन्ति मिलिताः सर्वे मार्ग एक इति ध्रुवम् ॥१७१॥
सारासारविवेकोऽस्ति ज्ञानार्थोऽनेन हेतुना ।
विवेकशक्त्या हीनं यत् तज्ज्ञानं मूर्खताऽर्जिता ॥१७२॥
ज्ञानमेव प्रकाशोऽस्ति विना तेन वयं भवे ।
पदमेकं समर्था न गन्तुं तिमिरसंवृते ॥१७३॥
ज्ञानं सुषमया हीनं तत्क्षणं संविजायते ।
यदाऽभिमानसंसर्गस्तद् दूषयति दूषितः ॥१७४॥
चारित्र्यस्यार्जनायैव ज्ञानराशिः प्रदीयते ।
साध्यं चरित्रमेवास्ति न ज्ञानं साधनं हितम् ॥१७५॥
ज्ञानं तदेव संसिद्धं नृणां येन भवेद् हितम् ।
निरर्थकं च तद् येन तेषां कष्टं विवर्धते ॥१७६॥
मस्तिष्कस्थायि यज्ज्ञानं हृदयान्तःप्रवेशि न ।
जीवनानुभवे ज्ञानं व्यर्थं सिध्यति तत् सदा ॥१७७॥

स्फुटविचाराः

यावद् बुभुक्षितः कार्यहीनश्चैकोऽपि मानवः ।
त्रपेमहि वयं तावद् विश्रमे पूर्णभोजने ॥१७८॥
ऐश्वरा नियमा सन्तिः शाश्वता ईश्वरः स्वयम् ।
पवितर्तयितुं शक्तः सर्वशक्तोऽपि नैव तान् ॥१७९॥
पवित्रकार्यकरणे न स्वीकार्यः पराजयः ।
शुद्धः सन् लप्स्यसे नूनं त्वमोश्वरसहायताम् ॥१८०॥
सारल्यसत्यतापूर्णं जोवनं जायते यदा ।
अनभीष्टान्धविश्वासस्तदैवाशु विनश्यति ॥२८१॥
कामयेऽहं न पापानां परिणामान्निजावनम् ।
पापात् पापविचाराच्च स्वोद्धारं कामये प्रभो ॥१८२॥
कर्त्तव्यपालनं स्रोतोऽधिकाराणां निगद्यते ।
कर्त्तव्यपालकानां ते जायन्ते वशगाः स्वयम् ॥१८३॥
मृत्योः कालः प्रदेशश्च प्रकारो वास्ति निश्चितः ।
जाने न, जाने पत्राणि कम्पन्ते प्रभुकाम्यया ॥१८४॥
सर्वं साधनमेवास्ति मदोयं विद्यते मतम् ।
कथयन्ति जना मुख्यसाध्यमस्ति न साधनम् ॥१८५॥
यादृशं साधनं साध्यं तादृशं कोऽत्र संशयः ।
भित्तिर्न विद्यते कापि साध्यसाधनभेदिका ॥१८६॥
कृत्स्नानीशविधानानि नैव जानीमहे वयम् ।
विज्ञानात्मविदां ज्ञानं तत्पुरो धूलिरेणुवत् ॥१८७॥
विज्ञेयः स नरो नान्धो विनष्टे यस्य लोचने ।
सोऽन्धो योऽयं निजान् दोषान् आच्छादयितुमिच्छति ॥१८८॥
नरशान्तिसुवर्णस्य समाजनिकषोपले ।
परीक्षा जायतेऽजस्रं न हिमालयसानुषु ॥१८९॥
आदर्शाङ्गीकरणं वस्त्वेकं विद्यते भवे सुलभम् ।
तत्पालनमतिभिन्नं वस्तु परं विद्यते भवेऽसुलभम् ॥१९०॥

भक्षणं कूर्दनं पानं विहारो नास्ति जीवनम् ।
तदीशस्तवनं सत्यमर्थात् मानवजीवनम् ॥१९१॥
दूरीभवन्ति विपदोऽनायासेनैव भूरिशो लोके ।
नरपशुजीवनभेदं चिन्तयति यदा तदा मनुजः ॥१९२॥
सत्यव्रतवरचिह्नं मौनं सत्यार्थिनो मनुष्यस्य ।
बहुभाषित्वे तस्य प्रकृतिर्हेतुः परित्याज्या ॥१९३॥
अहमादर्शवानेतत् कथनं तस्य साम्प्रतम् ।
तस्य प्राप्त्यै प्रयत्नान् यः कुरुतेऽविरतं नरः ॥१९४॥
विहितयथोचितयत्नैस्तुष्टैः परिणामचिन्तया मुक्तैः ।
भाव्यं नरैर्विपाको यत्नाद् वस्त्वन्तरापेक्षी ॥१९५॥
पश्यति परस्य दुःखं स्वस्य न परदुःखकातरो मनुजः ।
लभते यतो न समयं द्रष्टुं दुःखानि नैजानि ॥१९६॥
अनुभूतिर्मम कर्णे कथयति विस्पष्टमिदमलं मुखरा ।
स्वयमेवास्ति मनुष्यो निजयोः सुखदुःखयोर्हेतुः ॥१९७॥
धर्मो यथा स्वकीयः परकीयः स्यात् तथैव संमान्यः ।
पर्याप्तं न हि लोके परधर्मसहिष्णुतामात्रम् ॥१९८॥
अस्पृश्यतानिवारणकारणरूपो न हरिजनस्पर्शः ।
हित्वा नीचोच्चमतिं व्यवहारो बन्धुवत् तैः सः ॥१९९॥
स्वामी वसुन्धराया एकोऽसावेव नापरो लोके ।
कर्षति वपति च वीजं तस्यां यः श्रमधनो धन्यः ॥२००॥
स्वच्छमाभ्यन्तरं यस्य मनुजस्यात्र विद्यते ।
बाह्यं मलीमसं तस्य भविष्यति कथं भवे ॥२०१॥
अलीकं न त्रिकालेऽपि शुद्धास्यान्निर्गतं वचः ।
यतस्तज्जायतेऽलीकं हृदयाशुद्धितः सदा ॥२०२॥
कार्यानुरूपा या वृत्तिः कार्यस्यानन्तरं तथा ।
ईशसेवैव सा वृत्तिर्विपरीता च राक्षसी ॥२०३॥
कामनापूर्त्यकरणं सुकरं च वरं सदा ।
प्रारभ्य तन्निरोधस्तु दुष्करो दुर्गमस्तथा ॥२०४॥

आत्मानुशासने शक्तो भविष्यति न यो नरः ।
परानुशासने शक्तः स स्वप्ने न भविष्यति ॥२०५॥
आत्मानं ज्ञातुकामश्चेन्मानवस्तर्हि तत्कृते ।
तटस्थभावमाश्रित्यावश्यकं स्वनिरीक्षणम् ॥२०६॥
यः कस्यापि मनुष्यस्य साहाय्यं कुरुते नरः ।
सफलं जीवितं तस्य कर्मण्यः कथ्यते च सः ॥२०७॥
यन्नः सत्यं शुभं तस्य करणेन सुखं शमम् ।
प्राप्नुमो न परे ब्रूयुर्यत् तस्याचरणेन वै ॥२०८॥
येयं महीतले प्रोक्ता परानुग्रहयाचना ।
स्वातन्त्र्यविक्रयस्यैषा पर्यायत्वेन मे मता ॥२०९॥
रुग्णतास्ति मनुष्याणां कृते लज्जास्पदं महत् ।
यतो हि विद्यते सा नो दोषाणामेव सूचिका ॥२१०॥
कायेन मनसा यस्तु विशुद्धो मनुजः सदा ।
अशुद्धा रुग्णता तस्य सामीप्यं जातु याति न ॥२११॥
विचारा रुग्णताचिह्नं विकारसहिताः सदा ।
अतोऽस्माभिः परित्याज्या विचारा ये विकारिणः ॥२१२॥
अनेके व्याधयो वैद्या उपचाराश्च भूतले ।
विचारश्चिन्तयामुक्तान् नायमस्मान् करोति हि ॥२१३॥
एकत्वं व्याधिमात्रस्य मत्वेशं तद्विनाशकम् ।
समस्याभिरनेकाभिर्मुक्तिं सम्प्राप्नुमो वयम् ॥२१४॥
अनुयामो वयं वैद्यान् रोगैर्बहुभिराकुलान् ।
प्रत्यक्षं म्रियमाणांश्च वैचित्र्यमिदमद्भुतम् ॥२१५॥
परमीशं सदारोग्ययुक्तं मुक्तञ्च मृत्युना ।
अमोघवैद्यं सततं विस्मरामोऽन्तिके स्थितम् ॥२१६॥
एवं सत्यपि पुरुषः कस्मादाचरति गर्हितं कर्म ।
यत् तत् कृते भविष्यति दुःखस्यागामिनो मूलम् ॥२१७॥
रुचिरेयं पुरुषेभ्यो विचारधारा न रोचते यस्मात् ।
तस्यै ते न लभन्ते समयं विकला नराः सकलाः ॥२१८॥

मित्रताविन्दुभिर्मैत्रीवारिधिर्वारिविन्दुभिः ।
यथोदधिस्तथा शक्यो निर्मातुं जगतीतले ।।२१९।।
तस्मिन् सर्वे निमग्नाः स्युश्चेन्नरा द्वेषवर्जिताः ।
इदं दुःखाकुलं तर्हि जगत् स्वर्गसमं भवेत् ।।२२०।।
इतोऽपि महदाश्चर्यमिदमस्ति वयं समे ।
ज्ञात्वा मृत्युं ध्रुवं दूरीकर्तुं तं प्रयतामहे ।।२२१।।
दिनानि कतिचिद् वैद्या अस्मान् जीवयितुं क्षमाः ।
केवलं किं पुनर्वित्तं नाशयामः स्वकं वयम् ।।२२२।।
शास्त्राणामध्ययनं सज्जनवचसां श्रुतिश्च वैदुष्यम् ।
हृदि परमेश्वरभावं विना निरर्थकमिदं सर्वम् ।।२२३।।
परमेश्वरस्य नामानि सन्त्यनेकानि तेषु चेत् ।
एकमन्विष्यते तत् सत् सत्यमेवेश्वरस्ततः ।।२२४।।
वृद्धान् शिशूंश्च यूनः सहितान् रहितान् धनैर्जनानखिलान् ।
पश्यन्तो म्रियमाणानपि न भवामः सुसन्तुष्टाः ।।२२५।।
सर्वौषधिमयमीशं शरणं हरणं च सर्वरोगाणाम् ।
केवलमेकं हित्वा कुर्मो यत्नान्तरान् सर्वान् ।।२२६।।
अहिंसया विना नास्ति सम्भाव्यं सत्यदर्शनम् ।
अहिंसा परमो धर्मः कथितोऽनेन हेतुना ।।२२७।।
मनोवाक्कर्मभिर्ब्रह्मचर्यमिन्द्रियनिग्रहः ।
अतो मनोविकारी न ब्रह्मचारी मतो मम ।।२२८।।
अचौर्यमात्रमस्तेयं नास्त्यनावश्यकं च यत् ।
तद्वस्तुग्रहणं चौर्यं चौर्ये हिंसा प्रतिष्ठिता ।२२९।।
यन्नावश्यकमस्त्यद्यासंग्रहस्तस्य वस्तुनः ।
उक्तोऽपरिग्रहः सद्भिरपरिग्रहवेदिभिः ।।२३०।।
क्षुन्मृत्युलोकलज्जासंघर्षनिरादरादिभीतीनाम् ।
अभयः पूर्णाभावः भयस्य सर्वस्य संप्रोक्तः ।।२३१।।
मिथ्याज्ञानाद् वयं सर्वे स्याम भीता अहर्निशम् ।
वियोजयति तत्तूर्णं सत्यादस्मानसंशयम् ।।२३२।।

सच्चरितस्याध्ययनं श्रवणं मननं श्रुतस्य पठितस्य ।
सत्यस्य दर्शनार्थं नितान्तमावश्यकं लोके ॥२३३॥
यदा प्रभुः स्वयं वक्ति विस्पष्टं स्वमुखेन यत् ।
रमेऽहं सर्वभूतेषु, वैरं कुर्याम कैर्वयम् ॥२३४॥
मीराया जीवनं दत्ते शिक्षां सर्वोत्तमामिमाम् ।
जगत्पतिकृते त्याज्यस्तृणतुल्यं प्रियः पतिः ॥२३५॥
किं कर्तुं न प्रभुर्लोके मनुष्यः श्रद्धयान्वितः ।
दुष्करं सुकरं तस्मै सम्भवं यदसम्भवम् ॥२३६॥
निष्ठयानन्यया लक्ष्यमेकं साधयतीह यः ।
स सर्वलक्ष्यसिद्ध्यर्थमन्ते शक्तिमवाप्स्यति ॥२३७॥
यथार्थसुखसम्प्राप्तिर्वाह्यतो नैव जायते ।
प्रददाति सुखं स्वीयं पवित्रीकृतमानसम् ॥२३८॥
ऋजुमार्गस्य सारल्यं काठिन्यं तुलयाधृतम् ।
जायन्ते नान्यथा कस्मात् सर्वे सन्मार्गगामिनः ॥२३९॥
मनुष्यं नाशयत्येवाऽसत्यमल्पतमं तथा ।
विषविन्दुर्यथाल्पोऽपि कलशं दुग्धसंभृतम् ॥२४०॥
क्लेशयत्येव नः सम्यग् वस्तुने कालयापनम् ।
असम्यग्वस्तुलाभाय नाशयामः स्वजीवनम् ॥२४१॥
वाच्यं नैव मृषा जातु नरोऽस्ति परमेश्वरः ।
भिन्नस्तस्मादभिन्नोऽस्ति तत्प्रकाशात् प्रकाशितः ॥२४२॥
मुक्त्यर्थमविजानन्तो मुक्तिमीहामहे वयम् ।
एकार्थं जन्मतो मुक्तिर्मृत्युतश्चावगच्छत ॥२४३॥
अनासक्तेः पराकाष्ठा गीतायां मुक्तिरुच्यते ।
ईशोपनिषदो मन्त्रे प्रथमेऽपि निगद्यते ॥२४४॥
महतीमवकरराशिं श्रमेण महता वयं समुत्सार्य ।
हीरकमधिगच्छामो भाग्यवशात् कमपि हीरखनौ ॥२४५॥
किं तच्छमलवलेशं वितथावकरोत्करस्य हरणार्थम् ।
कुर्मो वदत मनुष्याः ! हीरकसत्यस्य संप्राप्त्यै ॥२४६॥

विना परिश्रमेणार्थात् तपसाऽस्मिन् भवेऽस्थिरे ।
किञ्चिन्न साध्यते साध्यं कथं स्यादात्मशोधनम् ॥२४७॥
विकारिभ्यो विचारेभ्यस्त्राणोपायः फलेग्रहिः ।
निर्गतं हृदयाद् रामनाम कण्ठान्न विद्यते ॥२४८॥
एकस्या एव मुद्रायाः पक्षौ स्तो मरणं जनिः ।
मृतेर्दुःखं कथं तस्माज्जनितो वा कथं सुखम् ॥२४९॥
मनुष्यतास्ति लोकेऽस्मिन् हृत्कुटीरनिवासिनी ।
बुद्धिवैभवहर्म्ये सा रम्ये न रमते मनाक् ॥२५०॥
धारयत्यखिलं धर्मो धर्मस्यैषाऽस्ति धर्मता ।
जीवनांशेषु सर्वेषु तस्य व्याप्तिरतो मता ॥२५१॥
जीवनं धर्म एवास्ति नानयोरस्ति भिन्नता ।
जीवनं धर्महीनञ्च केवलं पशुजीवनम् ॥२५२॥
जितेन्द्रियाश्च कर्मण्या भाषन्तेऽल्पं नराः सदा ।
करोति प्रकृतिः कार्यं मूकैषा सर्वतोऽधिकम् ॥२५३॥
प्रभुर्न विस्मरत्यस्मान् विस्मरामो वयं प्रभुम् ।
भजनेऽद्य श्रुतं प्रातः दुःखं वास्तविकञ्च तत् ॥२५४॥
मलीमसो वयं दद्मः परेभ्यो यदि सम्मतिम् ।
स्वच्छतार्थं त्रुटिः कान्या भविष्यति ततोऽधिका ॥२५५॥
परप्रवञ्चनां लोके नरस्यात्मप्रवञ्चना ।
अतिशेते, मता विज्ञा अत्र सर्वं निदर्शनम् ॥२५६॥
ईश्वरेच्छामतिक्रम्य पिता माता भिषग् धनम् ।
रक्षितुं न क्षमं कार्यमस्माभिः कार्यमस्ति किम् ॥२५७॥
मालिन्यं मनसोऽस्माभिर्न यावदपसार्यते ।
तावत् किं प्रार्थनायानोऽधिकारोऽल्पोऽपि विद्यते ॥२५८॥
देहं त्रातुं सदा यत्नं यावन्तं विदधाम्यहम् ।
आत्मानमवगन्तुं किं तच्छतांशं करोम्यहम् ॥२५९॥
स मालां प्रक्षिपेन्मालां सर्वस्वं यस्तु मन्यते ।
कर्तव्यबोधिका ग्राह्या सेशसान्निध्यदायिनी ॥२६०॥

चिन्ता चिता न ते चित्तं ज्वलयेत् तापकारिणी ।
न कस्यापि भयं कुर्या आस्तिकानां कृते वचः २६१॥
कः सत्प्रयत्नो ? योऽभीष्टं फलं प्रायो ददाति नः ।
फलेन ज्ञायते तस्मात् सत्प्रयत्नोऽस्ति वा न वा ॥२६२॥
अनुभूत्या विजानीमो नियमोऽयं न शाश्वतः ।
अतो योग्यः प्रयत्नो यः सत्प्रयत्नः स कथ्यते ॥२६३॥
विपरीते फले दृष्टे स नैव परिवर्त्यते ।
न च संत्यज्यते नैव न्यूनीभवति जातु सः ॥२६४॥
मनुष्यः सरलां वार्तां कुटिलां मन्यते यदा ।
कियत्यहिंसा तं सोढुं संसारे समपेक्ष्यते ॥२६५॥
सहजो दुर्गुणो निम्नमस्मान्नयति नीरवत् ।
क्लिष्टोऽस्ति सद्गुणो यस्मादूर्ध्वं नयति नः सदा ॥२६६॥
अपेक्ष्यमीशसाहाय्यं नराणां नैव जात्वपि ।
केवलं प्रभुरेवास्ति संसारे सर्वशक्तिमान् ॥२६७॥
अस्माकमाश्रयः शक्तिः प्रभुरेवास्ति केवलम् ।
स एव कुरुतेऽस्माकं विपत्तौ परिरक्षणम् ॥२६८॥
आसमस्मि भविष्यामि सर्वत्रास्मि समेष्वहम् ।
ज्ञात्वाप्यैशं वचो दूरात् त्यजामस्तं सदा वयम् ॥२६९॥
अन्वेषयामः साहाय्यमपूर्णस्य विनाशिनः ।
भवामो दुःखिनो लोके आश्चर्यं किमतः परम् ॥२७०॥
वस्तूनि गुणदोषाभ्यां तुलयामो विहाय चेत् ।
पूर्वपश्चिमयोर्भेदं न्यायः शक्यो तदा भवे ॥२७१॥
अनासक्त्या कृतं कार्यं विद्यते शक्तिदायकम् ।
यतो हि कार्यमेतादृग् भगवद्भक्तिसन्निभम् ॥२७२॥
व्यर्थं न जायते जातु कार्यं सत्येन संयुतम् ।
सत्यं वचो न स्वप्नेऽपि विपाके जायतेऽप्रियम् ॥२७३॥
स्वत्रुटीः द्रष्टुमर्हामो वयं स्वसहवासिभिः ।
दृष्ट्वा शोधयितुं शक्ताः श्रेयस्करमिदं ततः ॥२७४॥

कुर्मः शुद्धतमं स्वीयं व्यवहारं वयं यदि ।
शक्नुमो भवितुं तर्हि वयमुत्तमसेवकाः ॥२७५॥
दृढोऽयं मम विश्वासो म्रियन्ते न प्रिया जनाः ।
शरीरं म्रियते तेषां कार्या तेषां कथं स्मृतिः ॥२७६॥
तेषां गुणान् यथाशक्ति स्वस्मिन्नाधाय तच्छुभाः ।
प्रवृत्तीर्धारयित्वा च वृद्धिं नीत्वा च तत् स्मृतिः ॥२७७॥
कार्या तद्वर्धनायैव समाधौ कुसुमार्पणम् ।
पुष्पैरेव च सन्तुष्टिः मूर्तिपूजैव केवलम् ॥२७८॥
कुप्रवृत्तीरजित्वा च सत्यमार्गे गतिः कुतः ।
सत्यस्य रक्षणायातः सर्वस्वं संत्यजेन्नरः ॥२७९॥
प्राप्तुमिच्छति स्वातन्त्र्यं मानवो यद्यहिंसया ।
मृत्वा जीवति हत्वा न तत्स्वीकार्यमिदं वचः ॥२८०॥
जीवनस्य विनाशाय नात्महत्यां श्रयेन्नरः ।
जीवितुं मनुजो जह्यात् प्राणान् मर्तुं समुद्यतः ॥२८१॥
शान्त्या धैर्येण लोकेऽस्मिन् कर्तुं किं नैव शक्यते ।
अस्यानुभवमाप्स्यन्ति तदर्थं ये समुत्सुकाः ॥२८२॥
दैवस्य पौरुषस्यास्ति कलहोऽयं सनातनः ।
परिणामं प्रभौ क्षिप्त्वा भवेम पुरुषार्थिनः ॥२८३॥
ज्ञात्वापि निजकर्तव्यं दुःखदं तदपालनम् ।
प्रत्येक उत्तरं दद्यान्मनुजः स्वकृतेः स्वयम् ॥२८४॥
भाषणं मौनमेवास्ति सर्वोत्तममियं मम ।
अनुभूतिरतः शब्दे शब्दो वाच्यो न सिद्धिदे ॥२८५॥
त्रुटिः संशोधनादेव नश्यत्याच्छादनान्नहि ।
भयावहा स्फुटन्ती सा प्रच्छन्ना पिटकायते ॥२८६॥
विज्ञानेनात्मनः ध्यानाद् गुणानुसरणेन च ।
उच्चैर्याति नरो नीचैर्वैपरीत्येन गच्छति ॥२८७॥
धृतिः का ? शंकराचार्यो वक्त्यत्र विषये तृणम् ।
आदायैकं नरस्तिष्ठेदनुरत्नाकरं यदि ॥२८८॥

तृणाग्रविन्दुमादाय परिखायां निपातयेत् ।
समुद्रं शोषयिष्यामि कालेन कृतनिश्चयः ।।२८९।।
एतादृशो नरः पूर्णधैर्यवानस्ति केवलम् ।
संसारे विरलः, लभ्यः कोऽप्येको नरकोटिषु ।।२९०।।
धैर्येणैतावता युक्तो संसारे यो न मानवः ।
अहिंसापालनार्थं स समर्थो न भविष्यति ।।२९१।।
(कुलकम्)

प्रतिपलमहं महत्त्वं लोके प्रविलोकयामि मौनस्य ।
सर्वेभ्यः शुभकारकमेतत् हेमाभ कर्तव्यम् ।।२९२।।
अतिक्रम्य विधिं कार्यं नैकं सिद्ध्यति जात्वपि ।
क्षणाय नियमे भंगे भंगं स्यात् सूर्यमण्डलम् ।।२९३।।
अखिलानां कृतेऽस्त्येष नियमोऽतः समे वयम् ।
विदित्वा पालयामो वा जीवन्तो वा म्रियेमहि ।।२९४।।
(युग्मकम्)

विनावश्यकतां येयं कामना वस्तुसंग्रहे ।
पापयुक्तैव सा मह्यं प्रतिभाति न संशयः ।।२९५।।
स्वकर्तव्यं विदित्वापि न पालयति यः पुमान् ।
कारणं विषयेऽस्मिन् किं को नु विज्ञातुमर्हति ।।२९६।।
सुखमनु दुःखं जनिमनु मृतिरातपमनु गता तथा छाया ।
द्वन्द्वैरेतैः पूर्णः संसारोऽयं विचित्रतमः ।।२९७।।
द्वन्द्वजयो द्वन्द्वानां नास्ति विनाशः परः परं तेषु ।
आसक्तेः राहित्यं द्वन्द्वातीतत्वमाख्यातम् ।।२९८।।
(युग्मकम्)

सत्यस्याराधना सर्वसाधनत्वेन मे मता ।
सर्वं सम्प्राप्यते तस्मात् सत्ये सुसमुपासिते ।।२९९।।
सत्यं को वेत्ति ? सत्यस्य कथमाराधनं भवेत् ।
लोके दुष्करमत्यन्तं ज्ञातस्याप्यनुपालनम् ।।३००।।

ब्रह्माण्डस्याखिलस्यास्य प्रभुरस्ति त्वया सह ।
मा भूर्भीतो भवे कोऽस्ति ततोऽपि बलवत्तरः ॥३०१॥
प्रार्थना श्रद्धयोपेता हार्दिकी या भविष्यति ।
जानीहि निश्चितं तूर्णं प्रभुस्तां पूरयिष्यति ॥३०२॥
श्रोतुमिच्छति यद् यद्वा दिदृक्षति नरः स्वयम् ।
आलोकयिष्यति तत् तत् स तदेवाकर्णयिष्यति ॥३०३॥
पुष्पाणि पश्यत्युद्याने मालाकारो यथाभितः ।
परं दार्शनिकस्तत्र न किञ्चिदपि पश्यति ॥३०४॥
एतत् सम्भाव्यते नेदं जानीयादपि संवसन् ।
विपिने स बहिस्तस्मात्तदन्तर्विद्यतेऽथवा ॥३०५॥
(कुलकम्)

मन्दिरे मस्जिदे नान्तर्बहिर्वा परमेश्वरः ।
दीनानां क्षुत्पिपासायामस्ति यद्यस्ति स क्वचित् ॥३०६॥
सूत्रस्य वयनं नित्यं तेषां तृट्क्षुन्निवृत्तये ।
सरामनाम कर्तव्यं श्रमोऽन्यो वेदृशः सदा ॥३०७॥
(युग्मकम्)

सर्वं विधौ न सन्त्याज्यं नोपेक्ष्यश्चोद्यमः क्वचित् ।
विहाय फलचिन्तां च कार्यं कार्यं यदस्ति नः ॥३०८॥
सर्वे जानन्ति संप्राप्ते मृत्यावीशः सहायकः ।
केवलं तर्हि तन्नामग्रहणे नाग्रहः कथम् ॥३०९॥
सर्वस्योन्नतिकरणी समाजसेवा शुभाऽस्ति वास्तविकी ।
दृष्ट्वैवाथ समाजं विधिरुत्कर्षस्य ज्ञातव्यः ॥३१०॥
शोभनं निश्चयं कुर्यान्न वा कुर्यान्नरः परम् ।
सविचारं परं कृत्वा न कदापि परित्यजेत् ॥३११॥
ददाति शीतलां छायां संतपन् भूरुहो जडः ।
सचेतना वयं कष्टं स्वकर्तव्यं न कुर्महे ॥३१२॥
तपसा राज्यसंप्राप्ती राज्याच्च नरकागमः ।
पतनारम्भकात् तस्माद् राज्यात् श्रेष्ठवरं तपः ॥३१३॥

जितो मृत्युः सुरैः घोरं तपः कृत्वातिदुष्करम् ।
नरः क्षमः कथं नैव तपसाभीष्टसिद्धये ॥३१४॥
तपस्तप्तुं स एवास्ति समर्थो मानवो भुवि ।
साधनां च चरित्रं च न कदापि जहाति यः ॥३१५॥
प्रभावात् तपसो धत्ते शरीरं काञ्चनद्युतिम् ।
उच्चस्तरं मनस्तस्य प्रभावादधिगच्छति ॥३१६॥
त्यागं विना तपो याति पूर्णतां न कदाचन ।
जीवनस्य कला श्रेष्ठा तपस्यातो निगद्यते ॥३१७॥

धर्मः

दयाघनेन सत्यस्य कूटे यत् ताडनाद् वरम् ।
तदेव धर्मशास्त्रस्य वचनं विद्यते ध्रुवम् ॥३१८॥
सेतुः स धर्म एवास्ति यः संसारमहोदधेः ।
पारं नीत्वा नयत्याशु नरं भगवदाश्रयम् ।३१९॥
विपत्ते समये प्राप्ते मानवोद्धारकारकः ।
संसारे धर्म एवास्ति कोऽपि नान्यः सहायकः ॥३२०॥
मानवेषु भवेद् धर्मो परिखावन्न भेदकः ।
साधनं मिलनस्य स्याद् धर्मः सेतुसमः सदा ॥३२१॥
धर्मोऽस्ति सुमहानेष मानवस्य स्वजीवने ।
आत्मनो ज्ञानसम्प्राप्तिर्विधिना येन केनचित् ॥३२२॥
कामं त्यजेद्धनं मानं परिवारमसूंस्तथा ।
परं धर्मपरित्यागो न विधेयः कदाचन ॥३२३॥
धर्मं भूषयतेऽत्यर्थं दीप्तं वैराग्यभूषणम् ।
वैभवं वैभवस्यात्र शक्तिहीनं निरर्थकम् ॥३२४॥
मानवानां समस्तानां भूमण्डलनिवासिनाम् ।
एको धर्मः स्मृतस्तस्य नामानि स्युरनेकशः ॥३२५॥
सत्येनाहिंसया यस्य विरोधः क्वापि जायते ।
धर्मः स नास्ति संसारे धर्मः सत्यं वचो मम ॥३२६॥

गुरुः

शुद्धा भक्तिर्गुरोर्यस्य मानवस्य न मानसम् ।
सुगन्धयति तस्य स्यात् कथं चारित्र्यनिर्मितिः ॥३२७॥
कृत्वा शंकासमाधानं शुद्धं ज्ञानं ददाति यः ।
नित्यं स्वशिष्यवर्गाय स एव गुरुशब्दभाक् ॥३२८॥
नोचितं सुलभं ज्ञानमस्ति क्षेत्रस्य कस्यचित् ।
तावद् यावन्न साहाय्यं गुरोः कस्यापि लभ्यते ॥३२९॥
गुरुं प्रति न यः श्रद्धां न च तत्पादसेवनम् ।
कुरुते लभते नैव ज्ञानकोशं स जात्वपि ॥३३०॥
वन्दनीयेषु संसारे जनेषु निखिलेष्वपि ।
वन्दनीयतमः पूज्यो गुरुरेव मतो मम ॥३३१॥
महत्तमं हि मन्यन्ते बुद्धिमन्तो गुरोर्ऋणम् ।
आनृण्यं विद्यते तस्मादृणान्यवदसम्भवम् ॥३३२॥
नैसर्गिकी सदामोदप्रीतिर्हृदयनीरजम् ।
शिष्यं प्रति गुरोः रम्यं विशालमधितिष्ठति ॥६३३॥
गुरोः सम्मानकर्तारं मानवा निखिला गुणाः ।
अनायासं समायान्ति जलौघा इव सागरम् ॥३३४॥
दद्याद् शिष्याय सद्ज्ञानं भद्रं चाध्यात्मिकं गुरुः ।
इच्छेत स्वप्नेऽपि तस्मान्न धनस्योपार्जनं क्वचित् ॥३३५॥
न किञ्चित् शिक्षितुं शक्तः शिक्षार्थी विनयं विना ।
गुरुं ज्येष्ठञ्च प्रत्यस्मात् तेन कार्यः समादरः ॥३३६॥

चरित्रम्

चरित्रं जीवनस्यास्ति वस्त्वमूल्यं महत्तमम् ।
नरस्य यस्य नाशेन सह नाशो विजायते ॥३३७॥
व्यक्तेरेव चरित्रेण क्रियतेऽनुमितिः सदा ।
सम्यग् राष्ट्रचरित्रस्य बुद्धिमद्भिर्नरैर्भवे ॥३३८॥

संसारस्य समस्ता याः सम्पदः सन्ति ता इयम् ।
एकाचरित्रसम्पत्तिरतिशेते शुभोत्तमा ॥३३९॥
न चेच्चारित्रनिर्माणं समस्तं रचनात्मकम् ।
कार्यजातं वृथैवास्ति तर्हि मे सम्मतिर्ध्रुवा ॥३४०॥
विनान्तरिकविश्वासं भविष्यति न जात्वपि ।
उन्नतस्य चरित्रस्य निर्माणं व्यक्तिराष्ट्रयोः ॥३४१॥

निर्धनता

नाच्छादयति दारिद्र्यतिमिरं सत्यलोचने ।
नरस्य यस्य लोकेऽस्मिन् सज्जनः स निगद्यते ॥३४२॥
बुभुक्षया म्रियन्ते ये कार्यहीना जना प्रभोः ।
तेषामनुचितस्तेभ्यो धनधान्यकरग्रहः ॥३४३॥
दारिद्र्यं भारतस्याशु तदा दूरीभविष्यति ।
आलस्यदोषं त्यक्ष्यन्ति यदा भारतवासिनः ॥३४४॥
सम्भाव्यते भवेत् पुण्यफलं दारिद्र्यकं तथा ।
अघस्य परिणामश्च सम्पत्सम्पन्नता भवेत् ॥४४५॥
शासनस्य समाजस्य कर्तव्यं चानयोर्द्वयोः ।
पवित्रतममेतद् यद् दारिद्र्यस्य निराकृतिः ॥३४६॥
मानवी सृष्टिरेषास्ति जनानां धनहीनता ।
दैवश्च नाभिशापोऽस्ति देवतुल्यप्रदायकः ॥३४७॥
धनाढ्यः पुरुषो ध्यायेदिदं प्रतिदिनं सदा ।
मानवः प्रथमं सोऽस्ति वित्तवान् तदनन्तरम् ॥३४८॥
भारतीया नृपा वित्तवन्तः कालविदो यदि ।
परिवर्तनशीलाः स्युर्भविष्यन्ति सुरक्षिताः ॥३४९॥
मनःसन्तुलनं स्वीयं धनदर्पसमन्विताः ।
नाशयेयुर्न धनिनो तेषां नास्ति यतो धनम् ॥३५०॥
कर्तव्यं धनिनामेतत् स्वधनस्य व्ययं सदा ।
ज्ञात्वेदं ते प्रकुर्वन्तु जनन्यासमयं धनम् ॥३५१॥

निर्धनेभ्यो यथात्मानं धनिनः कुर्वते पृथक् ।
भविष्यं दृश्यते तेषां तमसाच्छादितं हतम् ।।३५२।।

क्रोधः

अमर्षो वर्धयत्येव प्रतीकारस्य भावनाम् ।
परिणामः सदा तस्य जायते च भयावहः ।।३५३।।
जनानां सेवकस्यास्ति कर्तव्यं यत्स तान् प्रति ।
क्रोधं जातु न कुर्वीत यान् स सेवितुमिच्छति ।।३५४।।
भूतले सर्पतः सर्पान् हन्मः कीटकृमींस्तथा ।
हृदि स्थितं च न क्रोधं हन्तव्यो यस्तु वस्तुतः ।।३५५।।
पौरुषं पुरुषस्यास्ति श्लाघ्यं तस्य महात्मनः ।
पराजेतुं क्षमो यस्तु क्रोधं शत्रुं भयंकरम् ।।३५६।।
सर्वोत्तमा चिकित्सैषा क्रोधस्यास्ति सनातनी ।
हृदि प्रज्वलिते क्रोधे प्रक्षेपो मौनवारिणः ।।३५७।।
प्रज्वालयति तं यस्मिन् क्रोध उत्पद्यते नरम् ;
ईदृशोऽस्ति विचित्रोऽयं जन्तुः क्रोधदवानलः ।।३५८।।
यस्मै द्रुह्यति तस्यैव नावमानं करोति ना ।
प्रतिष्ठामात्मनः क्रोधाविष्टो नाशयति स्वयम् ।।३५९।।
रोगोऽयमद्भुतः क्रोधो मानवानां हृदि स्थितः ।
प्रमत्ततैषा क्षणिका तेषां सुमतिनाशिनी ।।३६०।।
नियन्तुं क्रोधसंवेगं समर्थो यस्तु मानवः ।
नररूपधरः साक्षात् स देवो नास्ति संशयः ।।३६१।।
मनुजः क्रोधवेगं यो जेतुं नास्ति क्षमो भवे ।
पदं प्राप्तुं समर्थः स न सत्याग्रहिणो वरम् ।।३६२।।

पितरौ

जनन्याः जनकस्यास्ति पादयोः सेवनं सदा ।
आत्मजानां समस्तानां कर्तव्यमतिपावनम् ।।३६३।।

विभूतिः कापि संसारे पूजनीया न तादृशी ।
यादृशी जननी पुत्र-हितार्यार्पितजीवना ।।३६४।।
पूर्णजीवनपर्यन्तं यतमानापि सन्ततिः ।
ऋणात् पित्रोः समर्था न प्राप्तुमानृण्यकं भवे ।।३६५।।
पितरौ च स्वसन्तत्याः योग्यतायै दिवानिशम् ।
शक्त्या सम्पूर्णया यत्नं कुर्यातामपराजितौ ।।३६६।।
स्वप्नेऽपि निजसन्तत्या अकल्याणं न कांक्षतः ।
पितरौ, कामना तस्मात् तयोर्मान्यास्ति सर्वदा ।।३६७।।

ब्रह्मचर्यम्

सत्योऽर्थो ब्रह्मचर्यस्य ब्रह्मणोऽन्वेषणं न तत् ।
विना वशित्वं सम्भाव्यं सर्वेन्द्रियजयस्ततः ।।३६८।।
मनसा कर्मणा वाचा सर्वत्र सततं सदा ।
ब्रह्मचर्यतिशब्दस्य मतोऽर्थो मम सम्मतौ ।।३६९।।
विस्मर्तव्यास्ति सा व्याख्या ब्रह्मचर्यस्य केवलम् ।
ब्रह्मचर्यस्य यत्रार्थो जननेन्द्रियसंयमः ।।३७०।।
ब्रह्मचर्यस्य चत्वार उपायाः पालने मताः ।
तदावश्यकतायास्तु प्रथमोऽनुभवः परः ।।३७१।।
द्वितीयो हृदयोन्माथिसमस्तेन्द्रियसंयमः ।
सुहृत्पुस्तकशुद्धत्वं शुद्धत्वं सहवासिनाम् ।।३७२।।
तृतीयोऽस्ति चतुर्थश्च नित्यं नियमपूर्वकम् ।
रामस्य नामग्रहणं तत्कृपायाचनं हृदा ।।३७३।।
स्वानुभूत्या ब्रवीम्येतत् रसनाया विनिग्रहात् ।
इन्द्रियाणां समस्तानां जायते निग्रहः स्वयम् ।।३७४।।
न सम्भाव्यमहिंसायाः पूर्णरूपेण पालनम् ।
व्रतस्य ब्रह्मचर्यस्य सम्यक् संपालनाद् ऋते ।।३७५।।
सर्वेन्द्रियविकाराणां दमनादेव मानवः ।
कामं विजेतुं शक्नोति न जेयो योऽजितेन्द्रियैः ।।३७६।।

केवलं जीवनायैव ब्रह्मचर्यव्रती नरः ।
अश्नीयादशनं नित्यं नास्वादाय कदाचन ॥३७७॥
देवान् द्रष्टुं दृशोः श्रोतुं श्रोत्रयोश्च हरेः कथाम् ।
उपयोगं सदा कुर्याद् ब्रह्मचारी स्वकीययोः ॥३७८॥
श्रोतुमब्रह्मचारी च गीतं श्रृंगारपूरितम् ।
द्रष्टुमश्लीलताभोगौ प्रयोगं कुरुते तयोः ॥३७९॥
विना सजीवां श्रद्धां च विषये परमात्मनः ।
पालनं ब्रह्मचर्यस्य सम्भवं नास्ति जात्वपि ॥३८०॥
सोपानं जीवनस्यास्ति ब्रह्मचर्यव्रतं यतः ।
नोच्चैर्गन्तुं क्षमः कोऽपि ततोऽनारुह्य तद्भुवि ॥३८१॥
ब्रह्मचर्यव्रतं नास्ति केवलं वीर्यरक्षणम् ।
प्रथमं चरणं तस्य तदवश्यं न संशयः ॥३८२॥

चिन्ता

चितासदृशचिन्ताभिः मुक्तिमाप्तुं यदीच्छसि ।
जगन्निर्माणकर्त्रे तत् पूर्णतोऽर्पय जीवनम् ॥३८३॥
जनमानसवासेयं चिन्तास्ति पिशिताशना ।
शनैः शनै शरीरस्य मांसमश्नाति याऽनिशम् ॥३८४॥
चिन्ता नरं चरीकर्ति निःशक्तं नात्र संशयः ।
ततो मुक्तिस्ततस्तस्य कर्तव्यं प्रथमं मतम् ॥३८५॥
चिन्तायाः कारणाल्लाभमिमं प्राप्नोति मानवः ।
सशक्तिमानसं तस्य निःशक्तं जायतेतराम् ॥३८६॥
चिन्ता तावदभीष्टा यावत् साध्यपूरकोपाया ।
देहाशना विवृद्धा सा त्याज्या देहसंहर्त्री ॥३८७॥

कृषिः

भारतीया न शक्ताश्चेत् कर्तुं कृषिसमुन्नतिम् ।
तर्हि ते प्रभविष्यन्ति नान्यां कर्तुं कृतिं भुवि ॥३८८॥
जीविकामनुजीवन्ति शतेऽष्टौसप्ततिर्जनाः ।
यामुपेक्षा तदीया किं नात्मघातेन सन्निभा ॥३८९॥

सहकारकृषिः सम्यग् विधिना चेत् विधीयते ।
सुफला कृत्स्नदेशाय कृषकेभ्यो न केवलम् ॥३९०॥
यथार्थं विद्यते रम्या कृषिरेतादृशी कला ।
यस्याः कार्यं करैरेव जनानां संविधीयते ॥३९१॥
ममायं दृढविश्वासो विद्यते यद् वयं फलम् ।
पूर्णं भूम्यैव प्राप्स्यामः सहकारेण कृष्टया ॥३९२॥
कृष्यैव प्रायशो लोके जीवा जीवन्ति जङ्गमाः ।
उद्योगोत्पादनं गौणरूपेणैव प्रयुज्यते ॥३९३॥

गोसेवा

धेनुसन्निभजीवस्य दयनीयोपयोगिनः ।
आत्मघातसमः सत्यं वधस्तु प्रतिभाति मे ॥३९४॥
वसुन्धरातले कोऽपि जीवधार्यस्ति नापरः ।
गोसमानो दयाया यः प्रतिमूर्तिसमो भवेत् ॥३९५॥
सेवास्ति धेनुवृन्दानां तथा कल्याणकारिणी ।
आत्मनोऽस्ति यथा सेवा जनानां सुखमिच्छताम् ॥३९६॥
नैतद् दुर्भाग्यपूर्णं किं हिन्दूधर्मावलम्बिनाम् ।
कृते सेवोपदेशश्चेद् गवामावश्यकं यदि ॥३९७॥
गौर्दुग्धं पाययत्यस्मान् वत्सान् सूते सहायकान् ।
कृषिवाणिज्ययोरस्मात् सा माता विनिगद्यते ॥३९८॥
धार्मिक्यै भावनायै न केवलं गोर्निषेवणम् ।
अस्माकमस्ति कर्तव्यमुद्योगस्य दृशाऽपि तत् ॥३९९॥

स्वाध्यायः

स्फूर्तिमाधातुमिच्छा चेत् स्वविचारेषु विद्यते ।
स्वाध्यायः सततं तर्हि विधेयः स्फूर्तिदायकः ॥४००॥
स्वाध्यायैः भवने तिष्ठन् आत्मानं निकषा नरः ।
आनाययत्यनायासं विद्यापीठं शमप्रदम् ॥४०१॥

अस्ति श्रेष्ठतरः कोऽपि स्वभावो न सतां कृते ।
स्वाध्यायाध्ययनान्नूनं प्रियात् श्रेयस्करात् तथा ॥४०२॥
नराः स्वाध्यायशक्त्यैव बहवः श्रेष्ठतां गताः ।
निमित्तमात्रं पठनं विद्याया आलयेषु च ॥४०३॥
संचयस्यास्ति ज्ञानस्य, विकासस्यास्ति चात्मनः ।
स्वाध्यायः साधनं दिव्यं सर्वश्रेष्ठं न संशयः ॥४०४॥

संस्कृतभाषा

पर्याप्तं संस्कृतज्ञानं नाप्तमित्यस्मि दुःखितः ।
तदावश्यकतां हिन्दुबालेभ्योऽनुभवाम्यहम् ॥४०५॥
हिन्दी-मराठी-बंगाली-गुजरात्यः समा इमाः ।
भाषास्तु शिक्षितुं शक्याः सम्यक् संस्कृतभाषया ॥४०६॥
संस्कृते निहितं पूर्णज्ञानं भारतसंस्कृतेः ।
न बुधो भारतीयश्च तस्या अध्ययनं विना ॥४०७॥
संस्कृतं देवभाषास्ति तस्या अध्ययनादतः ।
स्वस्मिन् दिव्यान् गुणान् नूनं ना विकासयितुं क्षमः ॥४०८॥
संस्कृतेऽधिकसंख्याका सद्ग्रन्था एव सन्त्यतः ।
तेषां विमर्शसौभाग्यवन्तो धन्या नरा भुवि ॥४०९॥

प्रार्थना

धर्मस्य प्राणभूतास्ति प्रार्थनाऽसीमशक्तिका ।
तां विनान्तरिका शान्तिर्नैव लभ्यास्ति केनचित् ॥४१०॥
नम्रतायाः समाह्वानमात्मशुद्धेश्च साधना ।
आत्मनो वीक्षणस्येयमाहूतिश्च निगद्यते ॥४११॥
कार्यं प्रार्थनयारभ्य दिवसस्य दिने दिने ।
हार्दिकी तादृशी सा स्यादासन्ध्यं येन स्यात्स्थिरता ॥४१२॥
प्रार्थना सत्प्रयत्नाश्च व्यर्थायन्ते न जात्वपि ।
साफल्यं च मनुष्यस्य प्रयत्नैरीदृशैः सदा ॥४१३॥

नावश्यकं मसीपात्रं कर्गलं लेखनी तथा ।
प्रभवे पत्रलेखाय प्रार्थना साधनं यथा ॥४१४॥
ऐक्यानुभूतिर्यावन्न जीवमात्रेण लभ्यते ।
तावज्जपोपवासादि प्रार्थना चास्ति निष्फला ॥४१५॥

मृत्युः

विकासाय मनुष्यस्य नितान्तावश्यकं यथा ।
जीवनं, मरणं तद्वन्नितान्तावश्यकं मतम् ॥४१६॥
ममायमस्ति विश्वासः कार्यारम्भः सतां सदा ।
मृत्योरनन्तरं तेषां सत्यरूपेण जायते ॥४१७॥
उपहारः प्रभोर्मृत्युः, जननी जीवनस्य च ।
निश्चितोऽयं यथा लोके किमप्यन्यत् तथास्ति न ॥४१८॥
जीवने विद्यतेऽस्माकं मृतिर्जीवनसंगिनी ।
नवीनमुपहारं च जीवनस्य ददाति सा ॥४१९॥
यन्त्रणातो मृती रक्षां कुरुते नस्तथा नवाम् ।
आशां दत्त्वा बलं दत्ते चास्मभ्यं सुप्तिवत् सदा ॥४२०॥
मृत्युर्विभीषिकामात्रं विद्यते वस्तुतस्ततः ।
भयस्य करणं मौर्ख्यं यदि नास्ति तदस्ति किम् ॥४२१॥
जीवनस्य नवीनस्य जीर्णदेहस्य विद्यते ।
मृतिः सन्धिस्थली रम्या वराकी न भयंकरी ॥४२२॥
अध्रुवेऽस्मिन् भवे नान्यद् ध्रुवं किमपि विद्यते ।
मृत्युवद् सोऽस्ति मित्रं नः सहवासी च सर्वदा ॥४२३॥
महान्तो मानवा लोके म्रियन्ते नैव जात्वपि ।
तत्कार्यारम्भणाद् यूयं तान् कर्तुममरान् क्षमाः ॥४२४॥

पुस्तकानि

रत्नेभ्योऽधिकमूल्यानि पुस्तकानि न संशयः ।
प्रकाशयन्ति रत्नानि वाह्यं तान्यान्तरं यतः ॥४२५॥

प्रभावितोऽस्म्यहं ग्रन्थैर्बहुभिर्ज्ञानदायकैः ।
परं मयि प्रभावोऽस्ति गीतायाः सर्वतोऽधिकः ॥४२६॥
विकासं कामयन्ते ये स्वाध्यायेन नरा भुवि ।
साधनं विद्यते नान्यत् तेभ्यो ग्रन्थमहत्तरम् ॥४२७॥
प्रसारणाय बोधस्यामूल्यं सुगमसाधनम् ।
पुस्तकानि, प्रतिग्रामं स्यादतः पुस्तकालयः ॥४२८॥

उपवासः

प्रार्थनासहितैर्यत्नैरुपवासस्य सन्ततम् ।
सुफलं शक्यतेऽवाप्तुं संयमस्यात्मनो नरैः ॥४२९॥
संशोधनानि जायन्ते दैहिकान्यात्मिकानि च ।
द्वितयान्युपवासस्य करणेन सदा नृणाम् ॥४३०
उपवासः सदा सत्यश्चक्षुरादि वशंवदम् ।
करोति मुक्तमात्मानं तत्सीमावधि निश्चितम् ॥४३१।
उद्देश्यैः स्वार्थमुक्तैर्य उपवासो विधीयते ।
उपवासः स सत्योऽस्ति न स्वार्थवशतः कृतः ॥४३२॥
उपवासः शरीरस्य मनसश्चास्ति शुद्धये ।
अमोघमन्तिमं चास्त्रं प्रयोज्यं न तदन्यथा ॥४३३॥

शाकाहारः

शाकाहारेण मनुजः पूर्णस्वस्थो विजायते ।
लभते दीर्घमायुष्यं यतः स्वाभाविकोऽस्ति सः ॥४३४॥
मनःसन्तुलनं शीघ्रं यथा मांसाशिनस्तथा ।
न शाकाहारिणो जातु मनुजस्य प्रणश्यति ॥४३५॥
हिंसात्मका विचारा न शाकाहारेण मानसे ।
उद्भवन्ति भवन्त्याशु वशगानीन्द्रियाणि च ॥४३६॥

शान्तिः

केनापि लभ्यते नैव शान्तिर्बाह्येन वस्तुना ।
लभ्यते मानसे स्वीये सा स्वयं तदभीप्सुना ॥४३७॥

शान्तिः संस्थाप्यते प्रेम्णा शक्त्या नासेः कदाचन ।
प्रेम्णोऽधिकं जगत्यन्यद् नास्ति संयोगकारकम् ॥४३८॥
त्यक्तुमिच्छति यो लोके विकारानखिलान्नरः ।
शान्तिस्तस्य कृते नूनमुत्तमास्ति सहायिका ॥४३९॥
यावन्नरस्य नैवास्ति निजवृत्तिनियन्त्रणम् ।
तावदाप्तुं न शक्नोति स शान्तिं मानवः क्वचित् ॥४४०॥
मनःशान्तिं स्वकीयां यो नरः संस्थापयेद् भुवि ।
परिवर्तनझंझासु नरः स नर उच्यते ॥४४१॥
शान्तिं वास्तविकीं लब्धुं तदा शक्नोति मानवः ।
यदावश्यकताः स्वीयाः कुरुतेऽल्पतरास्तु सः ॥४४२॥
यो नरो विद्यते शान्तेरन्वेषणपरायणः ।
वहिर्मुखीं निजां दृष्टिं कुर्यादन्तर्मुखीं तु सः ॥४४३॥
जीवनाय मनुष्याणां शान्तिः परमपावनी ।
वाञ्छनीया तरिश्चास्ति भवार्णवनिमज्जताम् ॥४४४॥

परमेश्वरः

रजःकणेभ्य आत्मानं तुच्छं ना मन्यते यदा ।
निर्बलानां बलस्याशु साहाय्यं लभते तदा ॥४४५॥
सन्त्यज्य नाम रामस्य शक्तिर्मेऽन्या न विद्यते ।
स एवास्त्यसहायस्य सहायो मम नापरः ॥४४६॥
उद्वेगं रामनामाशु मानसं शमयत्यलम् ।
दावानलं प्रसर्पन्तं घनानां वर्षणं यथा ॥४४७॥
फलं जपस्य लोकेऽस्मिन् पुरुषाः प्राप्नुवन्ति ते ।
पालनं नियमानां ये ऐश्वराणां प्रकुर्वते ॥४४८॥
मनुष्यसेवया द्रष्टुं यतेऽहं परमेश्वरम् ।
मन्ये स्वर्गे न पाताले, जनानां हृदयेषु तम् ॥४४९॥
आशीर्वादं प्रभोः लब्धुं वयं तावन्न शक्नुमः ।
शरीरं मानसं सम्यग् यावत् शुद्धं न कुर्महे ॥४५०॥

यत्यं जानाति कायेन वचसा मनसा तथा ।
तत्पालयति यो, वेत्ति स नरः परमेश्वरम् ॥४५१॥
पूजाविधिं न वा शब्दान् शृणोति परमेश्वरः ।
कृत्यानां वचसां भेदमस्माकं स प्रपश्यति ॥४५२॥
भयभीता भविष्यामो वयं चेत् परमेश्वरात् ।
मनुष्याणां भयान्मुक्ता भविष्यामो न संशयः ॥४५३॥
यष्टिकासिशतघ्न्यादिशस्त्राणि निखिलान्यपि ।
विहायादाय कुर्याम प्रस्थानं जगदीश्वरम् ॥४५४॥
शक्तस्तस्य विनाशाय संसारे को भविष्यति ।
रक्षको विद्यते यस्य नरस्य जगदीश्वरः ॥४५५॥
न जातु हृदयं तेषां जायते हर्षनिर्भरम् ।
शंकालवो नराः सन्ति ये न्याये जागदीश्वरे ॥४५६॥
मिथ्यादर्पं यदा किञ्चित् करणस्य करोति ना ।
चूर्णीकरोति तद्दम्भं तदाशु परमेश्वरः ॥४५७॥
जगदीश्वरविश्वाससंबलेन बलान्वितः ।
नरः स्यान्निजसामर्थ्यसदुद्योगपरायणः ॥४५८॥
साधनैरपवित्रैर्न प्राप्यते परमेश्वरः ।
भविष्यति पवित्रं च नासद्वस्त्वाप्तिकारणम् ॥४५९॥
परमेश्वरसामीप्यं नरो योऽनुभविष्यति ।
भविष्यति न संसारे स कदापि पराजितः ॥४६०॥
सुप्तानामपि नो रक्षां करोति परमेश्वरः ।
भीताः स्याम वयं तर्हि लोकेऽस्मिन् केन हेतुना ॥४६१॥
न काश्यां न च काबायां विद्यते परमेश्वरः ।
गृहे गृहे समस्तेषु हृदयेषु स राजते ॥४६२॥
चिन्तां सम्यक् करिष्यामो वर्तमानस्य चेद् वयम् ।
तर्हि चिन्तां भविष्यस्य परमात्मा करिष्यति ॥४६३॥
सिन्धौ विन्दुसमाः सर्वे नराः स्मो लघवो वयम् ।
प्रभुश्चेन्नो न गोप्ता स्यात् भोक्तारः स्युर्निशाचराः ॥४६४॥

प्रभुर्निर्वाहकर्तास्ति सर्वेषां नः पितामहः ।
यावत् श्रद्धालवस्तस्मिन् नो निर्वाहो भविष्यति ।।४६५।।
प्रकाशो नान्धकारः स प्रेम, नैव घृणा च सः ।
परमेशोऽस्ति सत्यं स नासत्यं विद्यते च सः ।।४६६।।
धनकामा वयं लक्ष्म्यां प्रपश्यामः प्रभुं यदि ।
निश्चितं तर्हि तं सर्वे विस्मरामो वयं प्रभुम् ।।४६७।।
उच्चारणं प्रभोः नाम्नः कुर्यात् कस्यापि मानवः ।
असत्यमस्ति तावत् तद् यावद् हृदि न विद्यते ।।४६८।।

आहारः

आहारोऽस्ति शरीरस्य रक्षणायैव केवलम् ।
आहाराय परं देहं चित्रं मन्यामहे वयम् ।।४६९।।
तावन्तो न नरा लोके म्रियन्ते क्षुन्निपीडिताः ।
यावन्तो भोजनाधिक्यपरिणामैर्भयावहैः ।।४७०।।
नरः सन्तुलितं कुर्यादाहारं सुविचिन्तितम् ।
यदि तर्हि न रोगैः स पीडितो जातुचिद् भवेत् ।।४७१।।
आहारग्रहणे स्वस्य विवेकी यो न मानवः ।
तस्मिन् पशौ च को भेदो नेदं जानीमहे वयम् ।।४७२।।
प्रधानं यावदास्वादो भोजने नो भविष्यति ।
तावत् सात्त्विकता तस्मिन् निश्चितं नागमिष्यति ।।४७३।।
आहारविषये देशो यावन्नैवात्मनिर्भरः ।
अन्यवार्ताकृते तावद् योग्यो न गणयिष्यते ।।४७४।।
वयं भोजनबाहुल्यापराधनिरताः समे ।
अतो धर्मपरैः सद्भिरुपवासः प्रवर्तितः ।।४७५।।
सत्यं स्वास्थ्यस्य रक्षार्थमुपवासोऽस्ति लाभदः ।
आवश्यकश्च पक्षेऽह्न एकस्य नितरां जनैः ।।४७६।।

अहिंसा

असम्भवं यथा लोके खपुष्पग्रहणं मतम् ।
विनाऽहिंसां तथैवास्ति सत्यस्यापि गवेषणम् ।।४७७।।

अहिंसापालनं धर्मो न व्यक्तेरेव केवलम् ।
समाजस्यापि धर्मोऽयं विशिष्टं मामकं मतम् ॥४७८॥
सत्यशक्त्यन्तरं शक्तिर्यदि कापि महत्तमा ।
वस्तुनो विद्यते शक्तिः साऽहिंसाया न संशयः ॥४७९॥
अहिंसाऽचलविश्वासो हृदि यस्य विराजते ।
जयश्रियमवश्यं स नरोऽन्ते लभतेतराम् ॥४८०॥
मनुष्यजातिसंहारो यन्नाद्यावध्यजायत ।
ओतप्रोतास्ति सर्वत्राऽहिंसाऽनेनावगम्यते ॥४८१॥
असाफल्यमहिंसाया यदि क्वापि विलोक्यते ।
कारणं विद्यते तत्र तत्प्रयोक्तुरयोग्यता ॥४८२॥
अस्माकं नाधिकारोऽस्ति तज्जीवनविनाशने ।
निर्माणकरणे यस्य नः शक्तिर्नैव विद्यते ॥४८३॥
स्त्रीणां पूजास्थलानाञ्च यदि रक्षामहिंसया ।
कर्तुं नैव क्षमास्तर्हि कर्तव्या हिंसयापि सा ॥४८४॥
हन्तृहुंकारसंग्रामरक्तभीत्या भयान्विताः ।
नास्त्यहिंसा कृते तेषां सा सदा बलिनां नृणाम् ॥४८५॥
हिंसाविरोधवैवश्यं नाऽहिंसा तत् कदर्यता ।
सम्मिश्रणं न कर्तव्यं कदाचिदनयोर्द्वयोः ॥४८६॥
अहिंसामार्गमाश्रित्य सत्यान्वेषणकामनाम् ।
पूर्णां कर्तुं चिकीर्षामि नान्यः मार्गोऽस्ति तत्कृते ॥४८७॥
अहिंसापरिणामो न तथा शीघ्रमवाप्यते ।
यथा शीघ्रं तु हिंसाया भेदोऽयमनयोर्द्वयोः ॥४८८॥
महाव्रतमहिंसास्ति तस्यां श्रद्धास्ति मामकी ।
पुरुषार्थः परस्तस्यां शस्त्रं नास्ति ततः परम् ॥४८९॥
अहिंसैका स्थितिः पूर्णा मानवाः सकला अपि ।
तां स्थितिं प्राप्तुमिच्छन्ति न जानन्तः स्वभावतः ॥४९०॥
पूर्णनिर्दोषताऽहिंसा सापूर्णा कथ्यते तदा ।
यदा भूतेषु दुर्भाव-पूर्णाभावो विजायते ॥४९१॥

आत्यन्तिकः स्वरूपो न मया भारतसम्मुखे ।
अहिंसाया धृतो नास्ति मयि तद्दानपात्रता ॥४९२॥
आत्मघातसमः शस्त्रीकरणार्थं समुद्यमः ।
भारतस्यान्तिमाशैवं जगतो नश्यति ध्रुवम् ॥४९३॥
अहिंसा शक्तिहीनानां शस्त्रं भवितुमर्हति ।
परं साहसहीनानां कदर्याणां न जात्वपि ॥४९४॥
बहुवारमिदं तारस्वरेण कथितं मया ।
क्षमावीरा नरा एवाऽहिंसका सन्ति नापरे ॥४९५॥
प्रेम्णोऽस्ति परमा काष्ठाऽहिंसा तन्नियमोऽस्त्ययम् ।
मर्यादापालनं दर्पत्यागो विनयशीलता ॥४९६॥
अहं यावदहिंसायाः सिद्धिं प्राप्तुं क्षमोऽस्मि न ।
हिंसाप्रत्युत्तरं दातुं तावद् योग्यः कथं न्वहम् ॥४९७॥
क्षत्रियाणामहिंसास्ति धर्मो बुद्धो रघूद्वहः ।
महावीरश्च कृष्णश्च क्षत्रिया अप्यहिंसकाः ॥४९८॥

अस्पृश्यता

अस्पृश्यतापरित्यागो हिन्दुधर्मो मतो मम ।
स्वसमाजे च शूद्राणां स्वीकारः स्नेहसंयुतः ॥४९९॥
सवर्णहिन्दुभिः कार्यो व्यवहारोऽधुना समैः ।
शूद्रबालैः समं स्वीयबालतुल्यो मनोहरः ॥५००॥
न तेऽस्पृश्या जनाः सन्ति मन्यन्ते ये तथा नरैः ।
असत्यवादिनो धूर्ता अस्पृश्या मानवा मताः ॥५०१॥
आंग्लास्तिष्ठन्तु वा यान्तु परमस्पृश्यताऽसुरः ।
अवश्यमेव निष्कास्यो हिन्दुधर्मावलम्बिभिः ॥५०२॥
तथाऽस्पृश्यतया हिन्दूधर्मः सम्प्रति नाश्यते ।
यथा विनाश्यते दुग्धं विषेणाऽमृतसन्निभम् ॥५०३॥
नरताऽस्पृश्यते जातु तिष्ठतो न क्वचित् समम् ।
मन्यतेस्पृश्यतां मान्यां यो दम्भी स नरः स्मृतः ॥५०४॥

तथैवादरपात्राणि मे मलोत्थापका मताः ।
शैशवे जननी मान्या तत्समुत्थापिका यथा ॥५०५॥
सहतेऽस्पृश्यतां निद्यां विप्रत्वं यत् प्रतिष्ठितम् ।
नासिका तस्य दुर्गन्धैराकुला मे विजायते ॥५०६॥
पुनर्जन्माभिलाषो मे नास्ति चेज्जन्म मे भवेत् ।
भवेच्छूद्रकुले येन विभजेयं तदापदः ॥५०७॥
असत्यं स्वयमेवैकं विद्यतेऽस्पृश्यता ततः ।
तस्याः समर्थनं सत्यं कदापि न करिष्यति ॥५०८॥
नावगन्तुमहं [शक्तो विवेकाभ्युदये सति ।
कस्मादस्पृश्यताभावो नरेषु लभते स्थितिम् ॥५०९॥
आत्मैक्यं परमात्मैक्यं यदि सत्यं ततः कथम् ।
अस्पृश्यः कश्चिदप्यस्ति प्राणवान् जगतीतले ॥५१०॥

अनुशासनम्

व्यक्तेः प्रशिक्षणायास्ति परमावश्यकं द्वयम् ।
अनुशासनमत्यर्थं शारीरं मानसं तथा ॥५११॥
अनुशासनशिक्षेयं दातव्या शैशवाद् गृहे ।
अनुशासनहीनानां बालानां पतनं ध्रुवम् ॥५१२॥
राष्ट्रसंस्थाकुटुम्बानां न विनास्त्यनुशासनम् ।
स्थितिस्तदेव सोपानं गतेः संगठनस्य च ॥५१३॥
आवश्यकं न संसारे सैनिकेभ्योऽनुशासनम् ।
केवलं तत् प्रतिक्षेत्रं जीवने समपेक्ष्यते ॥५१४॥
कार्यलग्नजनस्यास्ति यदि रागः स्वकर्मणि ।
सम्भवं तर्हि तेनेदमनुशासनपालनम् ॥५१५॥
ज्ञानं राष्ट्रस्य, तस्यैवानुशासनरतैर्जनैः ।
ज्ञायते, यादृशास्ते तु राष्ट्रं तत् तादृशं मतम् ॥५१६॥
वहिर्जगन्निभं स्वीयं शरीरं मानसं तथा ।
अनुशासनसम्बद्धं सदा कार्यं जयार्थिना ॥५१७॥

सर्वानुशासनस्यास्ति मूलं व्यक्त्यनुशासनम् ।
परेभ्यः स क्षमो दातुं क्षमः आत्मानुशासने ॥५१८॥
सूर्यचन्द्रवियदब्धिपर्वतैः दृश्यतारकगणैः समन्ततः ।
स्वस्वसीम्नि परिपाल्यते यथा दैवमेकमनुशासनं महत् ॥५१९॥
मानवैरपि तथा समैः सदा सर्वकर्मसु निजेषु निश्चितम् ।
पालनीयमनुशासनं जगत् सर्वमेव विहितानुशासनम् ॥५२०॥

अन्तर्जातीयव्यवहारः

भक्षणं भिन्नजातीयैः विवाहश्च कदापि न ।
जातिं करोति भिन्नां हि कर्मभिर्जन्मना न सा ॥५२१॥
ज्ञानेन ब्राह्मणः शक्त्या क्षत्रिया वणिजो धनैः ।
शूद्राः कायेन सेवन्ते सृष्टिं सर्वे समास्ततः ॥५२२॥
अन्तर्जातीयभोजैर्न विवाहैश्च तथाविधैः ।
वर्णानामाश्रमाणाञ्च हानिः कापि विजायते ॥५२३॥
विवाहः केन वर्णेन कः कुर्याद् विषयस्त्वयम् ।
व्यक्त्याधीनः सदा कार्यः समाजेन हितैषिणा ॥५२४॥
अन्तःप्रान्तीयजातीयव्यवहारो भविष्यति ।
यावत्प्रचलितो नैव तावदैक्यमसम्भवम् ॥५२५॥

अभयम्

न कदापि भयं कुर्यात् मानवः कुत्रचिद् यतः ।
निर्भयं बलिनं शत्रुर्बलवानपि मन्यते ॥५२६॥
मुक्तिर्न भयतो शक्या साक्षात्कारं विनात्मनः ।
अभयं मोहराहित्यपराकाष्ठैव विद्यते ॥५२७॥
आत्मास्ति शाश्वतो नित्यः शरीरं च विनश्वरम् ।
स्थित्यामस्यां भयं कस्य किमर्थं च विधीयते ॥५२८॥
सदैवाभयशीलस्य नरस्य धरणीतले ।
अपकर्तुं क्षमः कोऽपि कदापि न भविष्यति ॥५२९॥

शौर्यं प्रशंसनीयं तद् यद् विहायेश्वरं भुवि ।
भयभीतं न चान्यस्मात् कस्मादपि विजायते ॥५३०॥
गीतायां गणना दैवीसम्पत्प्रकरणे कृता ।
सर्वतः प्रथमं चास्याभयस्य प्रभुणा स्वयम् ॥५३१॥
नाभयं लभ्यते यावद् दिव्या अन्या न सम्पदः ।
तावल्लभ्या भविष्यन्ति केनापि जगतीतले ॥५३२॥
अभिप्रायोऽभयस्यास्ति मुक्तिर्बाह्यैर्भयैः सदा ।
पूर्णतः पालनं चास्य न सम्भाव्यमतो मतम् ॥५३३॥
लब्धमुक्तिर्भयैर्बाह्यैस्ततोऽपि वहुदुर्लभाम् ।
मुक्तिमान्तरिकैः कामक्रोधलोभैस्तु मन्यते ॥५३४॥
ममत्वं यदि देहस्य निर्गच्छेन्मानवान्तरात् ।
सारल्येनाभयप्राप्तिस्तर्हि शीघ्रं विजायते ॥५३५॥
विश्वसन्ति मनुष्या ये सर्वशक्तिमतीश्वरे ।
तेभ्योऽभयं नरेभ्यो स ददाति परमेश्वरः ॥५३६॥
नरः कृशशरीरोऽपि निर्भयो बलवान् स्मृतः ।
भीतः स्थूलशरीरोऽपि निर्बलो नास्ति संशयः ॥५३७॥
अर्धेभ्यो नाधिका लोके भवन्ति सफला नराः ।
काले साहससञ्चारो यतस्तेषु न जायते ॥५३८॥
भयतोऽसत्यवादी चाऽसत्याचारी च मानवः ।
निकृष्टः पशुपक्षिभ्यो विद्यते नात्र संशयः ॥५३९॥

उच्चशिक्षा

विश्वासो मे दृढः शिक्षा महाविद्यालयेषु या ।
व्यर्थास्ति शिक्षितेष्वेषा कार्याभावप्रसारिका ॥५४०॥
विदेशिभाषया शिक्षा योच्चा देशे प्रदीयते ।
बौद्धिका नैतिका वह्व्यो जायन्ते हानयस्तया ॥५४१॥
नोच्चशिक्षासपत्नोऽहं देशे सा यादृशी परम् ।
दीयते तद्विरोध्यस्मि पूर्णरूपेण सर्वथा ॥५४२॥

उच्चशिक्षा जनान् भ्रान्तान् पथभ्रष्टान् करोति च ।
मामकोऽनुभवो हेया सा तथापि न पूर्णतः ॥५४३॥
उच्चशिक्षां तु तां मन्ये लब्ध्वा यां मानवो भवेत् ।
उपकाररतो नम्रः सेवाभावी च कर्मठः ॥५४४॥

उपकारः

अपकारप्रतीकारो नापकारेण जायते ।
जायते यद्यवश्यं स उपकारेण केवलम् ॥५४५॥
करणादुपकारस्य मनुष्यस्यात्मनो द्रुतम् ।
उन्नतिर्जायतेऽवश्यं जायते स प्रफुल्लितः ॥५४६॥
कर्तुं परोपकारं न क्षमोऽसि यदि तर्हि किम् ।
अपकारं न कस्यापि कुरु, नैव च चिन्तय ॥५४७॥
कृत्वोपकारं यस्तस्य फलाशां कुरुते नरः ।
निजं सत्कर्म सोऽवश्यं स्वयं हन्ति न संशयः ॥५४८॥
वृत्तिः परोपकारस्य हृदि यस्य विराजते ।
संसारे जातुचिन्नैव दुःखितः स भविष्यति ॥५४९॥
परोपकारिणो न स्यान्मानसे स्वार्थभावना ।
नानयोर्जायते क्वापि द्वयोरेकत्र सुस्थितिः ॥५५०॥
वर्धतेऽनुदिनं सम्पत् सर्वदैवोपकारिणः ।
पुण्यस्य मूलं पातालं यावद् यातीति कथ्यते ॥५५१॥
वृत्तिः परोपकारस्य नरे यस्मिन् न राजते ।
मनुष्यताधिकारं स विजहात्येव तत्क्षणम् ॥५५२॥

त्रुटिः

त्रुटिस्वीकरणं मन्ये मार्जन्या मार्जनोपमम् ।
अस्वच्छतां निराकृत्य करोति विमलं मनः ॥५५३॥
अस्माभिश्चिन्तनीयं न स्वप्नेऽप्येतत् कदाचन ।
अन्ये जनाः प्रकुर्वन्ति विदध्मो न वयं त्रुटीः ॥५५४॥

अहं स्वानुभवैर्वेद्मि संघर्षः त्रुटिभिः सह ।
जीवनं, नम्रतापूर्णं स्वीकार्यं निखिलैरिदम् ॥५५५॥
त्रुटीः करोति पुरुषो ज्ञात्वा स्वीकरणं परम् ।
तन्निराकरणं मन्ये, कृतमेतत् स्वजीवने ॥५५६॥
गृह्णात्येव नरो शिक्षास्त्रुटीः कृत्वा न संशयः ।
आजीवनं परं तेन ता विधेया न तत्कृते ॥५५७॥
श्रेष्ठो नरः स एवास्ति स्वत्रुटीः स्वीकरोति यः ।
तास्त्यक्त्वा चात्मनः साधु सुधारं विदधाति च ॥५५८॥

त्यागः

त्यागोऽस्ति सात्त्विकानन्दं कारितः स बलात् परम् ।
न स्थायी, न विधेयश्च पश्चात्तापो विधाय तम् ॥५५९॥
देशभक्तिर्विना त्यागं विधातुं नैव शक्यते ।
स्वार्थोदये समुत्कर्षं लब्धुं न क्षमते नरः ॥५६०॥
सद्भावनास्ति या त्यागे तद्विकासो न तत्क्षणम् ।
जायते चिरकालेन नरे सद्भावनोदयः ॥५६१॥
नैव त्यागो विधातव्यः स केनापि महीतले ।
मूले प्रत्युपकारस्य यस्य स्याद् हेयभावना ॥५६२॥
लोके यावच्च वैषम्यं विद्यते बुद्धिसम्पदाम् ।
तावत् त्यागमहत्त्वस्य नापकर्षो भविष्यति ॥५६३॥
परिवारकृते त्यागं तथा स्वपुरवासिनाम् ।
कुर्वन्ति सर्वे, श्लाघ्यास्ते ये सर्वत्यागकारिणः ॥५६४॥
सेवाकार्याक्षमः सोऽस्ति यस्मिन् न त्यागभावना ।
विकासो न मनुष्यस्य विना त्यागेन जायते ॥५६५॥

दया

अहिंसया विरोधो न दयाया विद्यते क्वचित् ।
तस्यास्तया विरोधश्चेत् तर्हि नास्ति दया दया ॥५६६॥

प्रतीकरूपास्ति दया नरस्य
सुधोपमा कोमलभावनायाः ।
यस्मिन् नरे नास्ति दयोदयोऽस्मात्
तस्मिन्न लभ्यो विनयोदयोऽपि ।।५६७।।

दयाया उदयः प्रायः स्वयं संजायते हृदि ।
प्रसंगानुगता सास्ति सहजा नानुषङ्गिकी ।।५६८।।

मूलं धर्मस्य संसारे केवलं विद्यते दया ।
इयं भूषयते चारु मानवस्याखिलान् गुणान् ।।५६९।।

दयाविहीनो मनुजो जगत्यां
मनुष्यताया अपरैरनेकैः ।
न सद्गुणानां निचयैः कदापि
सुभूषितः सम्भवतीति सत्यम् ।।५७०।।

न विद्यते यत्र दया, न तत्र
कदाप्यहिंसाविमलप्रकाशः ।
यस्मिन् दयाऽतो नरि यावती स्यात्
तस्मिन्नहिंसापि तु तावती स्यात् ।।५७१।।

सद्गुणगणनाकाले, प्रथमं स्थानं सदैव संसारे ।
प्राप्स्यति यो मनुजानां, गुणो दया नापरः कोऽपि ।।५७२।।

यावन्तः सन्ति संसारे धर्मास्ते निखिला अपि ।
शिक्षामेकां प्रयच्छन्ति 'कुरुध्वं सततं दयाम्' ।।५७३।।

देशभक्तिः

देशभक्तेरभिप्रायः सन्ततं हितचिन्तनम् ।
यदि मानवमात्रस्य नास्ति तर्हि वृथास्ति सा ।।५७४।।

सन्त्याज्या देशभक्तिः सा राष्ट्रानन्यान् विपद्गतान् ।
कृत्वा कामयते या तु महिमानं तथा श्रियम् ।।५७५।।

देशभक्तिर्मनुष्यस्य प्रथमोऽस्ति गुणो विना ।
यं शिरः स्वं समुत्थात्य न नरो गन्तुमर्हति ।।५७६।।

देशभक्तिस्तदा सत्या मनुष्येषु विजायते ।
देशं विहाय ते दूरं यदा यान्ति सुनिश्चितम् ।।५७७।।

ये दासदेशदृढबन्धननाश सौध-
स्वाधारभूतदृषदो मनुजा भवन्ति ।
तद्देशभक्तपदपद्मरजःपवित्रं
कुर्वन्ति मस्तकमलं भुवि ते तु धन्याः ॥५७८॥

धर्मः सम्प्रदायश्च

यावन्तः सन्ति धर्मास्ते सर्वे श्रेष्ठा मता मम ।
तेषु नास्ति त्रुटिः साऽस्ति तत्तद्धर्मावलम्बिषु ॥५७९॥
न चिन्तयति यो धर्मो विषयान् व्यावहारिकान् ।
साधनं तत्समाधाने नास्ति धर्मो स मे मतौ ॥५८०॥
योऽर्थो धर्मविहीनोऽस्ति सोऽनर्थः त्याज्य एव सः ।
राजसत्ता च या धर्महीना सा राक्षसी मता ॥५८१॥
अहिंसया च सत्येन विरोधो यस्य विद्यते ।
नास्ति स्वप्नेऽपि धर्मः स धर्म एषा मतिर्मम ॥५८२॥
व्यपेतधर्मास्ति न कल्पनीया
मते मदीये खलु राजनीतिः ।
धर्मस्तु कार्येषु समेषु व्याप्तः
सदा भवेन्नैतिकतास्वरूपः ॥५८३॥
येषु बाल्यान्निधीयन्ते संस्कारा धार्मिकाः शुभाः ।
विकसन्ति गुणास्तेषु श्रद्धाविश्वासरूपिणः ॥५८४॥

बुद्धिः

बुद्ध्या तर्कस्य संयोगः सत्यमस्ति शुभावहः ।
विना श्रद्धां परं नैव त्रिवेणी संविजायते ॥५८५॥
बुद्धेर्दुरुपयोगेन भुव्यनर्था महत्तमाः ।
अनायासं विधीयन्ते सततं बुद्धिशालिभिः ॥५८६॥
पुरः प्रलोभनानां तु शक्तिहीना मतिर्मता ।
श्रद्धैव केवला तत्र नः सहायविधायिका ॥५८७॥
विवेकद्रुमसाहाय्यं सदैवापेक्षते भुवि ।
दृढापि बुद्धिलतिका स्वसंवर्धनकांक्षिणी ॥५८८॥

बुद्धिर्हृदयदास्यस्ति तया हीनो नरः परम् ।
शक्तिहीनो, बलं बुद्धेस्तस्मादस्ति महत्तमम् ॥५८९॥

युद्धम्

युद्धं मूलं विनाशस्य तद्विरोधाय मानवः ।
मृत्योरालिङ्गनायापि भवेन्नित्यं समुद्यतः ॥५९०॥
न शस्त्रास्त्रैर्न संग्रामैः समर्थं मुक्तिप्राप्तये ।
भारतं न जगत् सर्वं ममैषास्ति स्थिरा मतिः ॥५९१॥
मनुष्यजातिनाशाय संग्रामो मूलकारणम् ।
तद्दूरीकरणायातो विधेया विधयोऽखिलाः ॥५९२॥
गृहे बहिश्च संग्रामो निखिलासु दशास्वपि ।
सर्वेषामेव सर्वत्र हानिं प्रकुरुतेतराम् ॥५९३॥
मानवानां महान् शत्रुः संग्रामोऽस्ति भयंकरः ।
संसारेऽवांच्छनीयोऽस्ति घृणितस्त्याज्य एव च ॥५९४॥

छात्राः

आशाः सन्ति भविष्यस्य छात्राः नूनं महोदयाः ।
निरालस्या सदा सन्तु ते सेवाभावसंयुताः ॥५९५॥
दलीयराजनीतौ न भागं गृह्णन्तु जातु ते ।
राजनीतिप्रयुक्तेषु कार्यबन्धेषु चापि ते ॥५९६॥
सुखे वा यदि वा दुःखें सदैव सहवासिनाम् ।
सन्तु सम्मिलिताः पूर्वं विद्याध्ययनतत्पराः ॥५९७॥
सहाध्ययनशीलाभिर्भगिनीभिः समं च ते ।
व्यवहारं सदा कुर्युः सभ्यं शिष्टं च सम्मतम् ॥५९८॥
अनुसृत्य च ते सम्यक् स्वप्राचीनपरम्पराम् ।
ब्रह्मचर्यव्रतोपेताः स्वाध्याये सततं रताः ॥५९९॥
विद्यार्थिजीवनं तावन्मतं विद्यार्थिनां मम ।
त्यक्त्वा भोगं विलासं च यावदध्ययने रताः ॥६००॥
धूम्रपानं सुरापानं तथा ताम्बूलचर्वणम् ।
छात्राः कुर्वन्ति ये सन्ति ते स्वहत्याविधायकाः ॥६०१॥

विद्यार्थिनः कमप्येकं महापुरुषमात्मनः ।
विदधीरन् शुभादर्शं जीवनोत्कर्षकांक्षिणः ॥६०२॥
ग्रामान् गत्वावकाशे चेद् वटवो ग्रामवासिनाम् ।
सेवां कुर्युः परं नातस्तेषां कल्याणकारकम् ॥६०३॥
हस्तकर्तितसूत्रस्य वस्त्रं हस्तविनिर्मितम् ।
धृत्वा स्वदेशवस्तूनि प्रयुञ्जन्तु सदैव ते ॥६०४॥

विदेशीभाषा

विदेशिभाषया सत्या शिक्षा दातुं न शक्यते ।
नान्तर्निहितशक्तीनां विकासो जायते तथा ॥६०५॥
नाशुभं विद्यते छात्रः पठेद् भाषा विदेशजाः ।
परं पूज्यतमा भाषा मातृभाषैव विद्यते ॥६०६॥

विश्वासः

त्यजन्तु नात्मविश्वासं नित्यं संवर्धयन्तु तम् ।
आत्मविश्वासहीनो यो मानवः स न मानवः ॥६०७॥
परमात्मनि विश्वासं ये न कुर्वन्ति मानवाः ।
असमर्था अहिंसायास्ते साहाय्यग्रहे सदा ॥६०८॥
यावत्यः शक्तयो ज्ञाताऽज्ञाताः सन्ति धरातले ।
विनेशप्रत्ययं तासु व्यर्थाऽहिंसा विजायते ॥६०९॥
विश्वासो महती शक्तिर्विद्यते विजयप्रदा ।
यथा चालयितुं शक्या विशाला अचला अपि ॥६१०॥
विश्वासस्य विकासो न हिंसायाः सन्निभो मतः ।
विश्वासः प्रार्थनाजन्यो न हिंसा प्रार्थनोद्भवा ॥६११॥
नरो विश्वासरहितस्तद्विन्दुसदृशायते ।
योऽब्धेर्दूरं गतो यस्य विनाशश्च सुनिश्चितः ॥६१२॥
व्यापारा व्यवहाराश्च मानवानां परस्परम् ।
विश्वासेन विना जातु जायन्ते नेति निश्चितम् ॥६१३॥
विश्वासो व्यक्तिषु स्याद्वा शक्तौ वा, स्याद् दृढः परम् ।
विश्वासः सुदृढः सम्यक् भवतीह फलप्रदः ॥६१४॥

व्यापारः

व्यापार एव देशानां समृद्धेः साधनं मतः ।
अस्मादेवोच्यते लक्ष्मीश्चला व्यापारवासिनी ॥६१५॥
व्यापारे यदि सत्यं न स्थानं प्राप्स्यति तर्हि तत् ।
लप्स्यते कुत्र तद् ब्रूहि पृच्छामि परमार्थतः ॥६१६॥
उचितो वांछनीयः स व्यापारो यत्र जायते ।
शोषणं नासहायानां विवेकहननं तथा ॥६१७॥
जीविकाया उपायेषु व्यापारः परमोत्तमः ।
स्वेच्छाचारितया दोषदुष्टं तमकरोन्नरः ॥६१८॥
व्यापारो यदि सत्योऽस्ति स कालेन सुनिश्चितम् ।
स्थितिं विधातुमात्मीयां सुदृढां जायते क्षमः ॥६१९॥
सर्वोत्तममिमं लाभं व्यापारनिरतो नरः ।
प्राप्नोति नम्रताया यल्लभते स प्रशिक्षणम् ॥६२०॥

व्रतसंयमौ

व्रतानां ग्रहणं सम्यक् प्रतिज्ञाकरण तथा ।
कार्यं बलवतामस्ति निर्बलानां न जात्वपि ॥६२१॥
अपारा विद्यते शक्तिर्व्रतानां ग्रहणे यतः ।
मनोवैज्ञानिकं तत्र दृढत्वमनुराजते ॥६२२॥
सामान्यसंयमं कृत्वा व्रतग्रहणमाचरेत् ।
असम्भवं यतो लोके संयमेन विना व्रतम् ॥६२३॥
मनुष्यो दुर्बलमनाः नार्हः संयमपालने ।
अभ्यासाद् रुचिसंयुक्तः शिक्षितुं तत् प्रभुः परम् ॥६२४॥
एकादशव्रतानां पालनमति दुष्करं विनाभ्यासम् ।
एतेभ्यो न समर्थः, कश्चित् कर्तुं महत् कर्म ॥६२५॥
संयमानां समस्तानां मूलं जिह्वाविनिग्रहः ।
तथा च संशयो नात्र जननेन्द्रियसंयमः ॥६२६॥

व्यायामः

देहायावश्यकं यावद् वायुपानीयभोजनम् ।
व्यायामस्तावदेवास्ति विरोधोऽत्र न कस्यचित् ॥६२७॥
शारीरिकाणि कार्याणि यानि मानसिकानि च ।
व्यायामान्तर्गतान्येव सन्ति तान्यखिलान्यपि ॥६२८॥
व्यायामेन विनाऽशक्तं मस्तिष्कं जायते तथा ।
यथा कायो यथाशक्ति तस्माद् व्यायाममाचरेत् ॥६२९॥
मस्तिष्कस्य सुपुष्टस्य शरीरे शक्तिशालिनि ।
स्थितिः स्वास्थ्यं बुधैः प्रोक्तं देहपुष्टिर्न केवला ॥६३०॥
नियमानां वयं कुर्मः सहजानां विभञ्जनम् ।
यदि स्वास्थ्यक्षतिं तर्हि स्वीयां कुर्मो न संशयः ॥६३१॥
शारीरो मानसो वापि व्यायामो द्विविधोऽप्ययम् ।
यथाशक्ति विधातव्यः प्रत्यहं पुरुषैः समैः ॥६३२॥
स्वास्थ्यस्य कायिकस्यास्ति व्यायामो मूलमुत्तमम् ।
व्यायामो भ्रमणं सम्यग् वाटिकाऽरोपणं तथा ॥६३३॥
व्यायामाय भवेदिच्छा तावती प्रबलोत्कटा ।
कस्यामपि दशायां न स्यामोत्साहविवर्जिताः ॥६३४॥
यथाशक्ति विधातव्यो व्यायामो निखिलैर्जनैः ।
कुर्वन्तु भ्रमणं वृद्धास्तथा च गतयौवनाः ॥६३५॥
व्यायामरुचिसम्पन्नो युवको यो विजायते ।
ध्रुवं भवति स्वस्थः स सच्चरित्रविभूषितः ॥६३६॥

मद्यनिषेधः

लज्जास्पदं किमेतन्न नः कृते सन्तु शिक्षिताः ।
अस्माकं शिशवो मद्यविक्रयाधिगतैर्धनैः ॥६३७॥
तास्कर्यादपि मन्येऽहमपराधं महत्तरम् ।
सुरापानं मनुष्याणां जीवनस्य विनाशकम् ॥६३८॥
मत्वा रोगं सुरापानं दारुणं कष्टकारकम् ।
चिकित्सा तस्य कर्तव्या तच्चिकित्साधिकारिभिः ॥६३९॥

मदकारीणि वस्तूनि यानि तान्यखिलान्यपि ।
निषेद्धव्यानि सर्वेभ्यः सुरापानं न केवलम् ।।६४०।।
विदधाति द्वयोर्नाशं शरीरस्यात्मनस्तथा ।
मद्यपानमतो हेयं सर्वैः कल्याणकांक्षिभिः ।।६४१।।
मद्यपानं मनुष्याणां दुर्गुणेषु महत्तमः ।
उत्पादयत्ययं यस्मादेकाकी दुर्गुणान् बहून् ।।६४२।।
मद्यपानं मनुष्याणां यथा नाशकरं तथा ।
पेयं नान्यत् किमप्यस्ति सत्यमेतद् ब्रवीम्यहम् ।।६४३।।

शिक्षा

आत्मोन्नतेर्विधानार्थं यतः शिक्षाः समा अपि ।
सा शिक्षा नास्त्यतः शिक्षा यया सा न विधीयते ।।६४४।।
आर्थिक्याध्यात्मिकी मुक्तिः मुक्तिः सामाजिकी तथा ।
ययाधिगम्यते सैव शिक्षा शिक्षा मता मम ।।६४५।।
यतो हि साधनं ज्ञानं साध्यं चारित्र्यमुच्यते ।
चारित्र्यस्य विकासाय दातव्यं ज्ञानमीप्सितम् ।।६४६।।
न दद्यात् कायिकं दण्डं कदाचिदपि शिक्षकः ।
विद्यार्थिने दशायां च कस्यामपि दयापरः ।।६४७।।
शिक्षकस्तन्मयो भूत्वा शिक्षां यावद्ददाति न ।
तावत् स नोत्तमां शिक्षां छात्रेभ्यो दातुमर्हति ।।६४८।।
मस्तिष्कं मानवानां न विकासं शिक्षया विना ।
यात्यतो मानवेभ्योऽस्ति शिक्षावश्यकता ध्रुवम् ।।६४९।।
चतुर्गुणदशाब्दानामन्तेऽहं युवकानिदम् ।
स्वातन्त्र्यस्योपदेक्ष्यामि शिक्षार्थं यान्तु ते वहिः ।।६५०।।
अहं पुनः प्रवक्ष्यामि नाबोधा बालका बलात् ।
शिक्षणार्थं विदेशेषु प्रेषणीयास्तु पितृभिः ।।६५१।।
अप्रौढा बालका गत्वा विदेशं सुसमाकुलाः ।
भवन्त्येतदहो वच्मि स्वानुभूतमृतं महद् ।।६५२।।

शिक्षा महान् गुण: पुसां विद्यते नात्र संशयः ।
चरित्रमस्ति ससारे तस्या अपि महत्तरम् ।६५३।।

श्रद्धा

श्रद्धा धर्मस्य मूलेऽस्ति यत्र सा न विराजते ।
विहीने श्रद्धया धर्मे सत्यस्यावस्थितिर्नहि ।।६५४।।
श्रद्धाविश्वासरहितं यदि जातु भवेज्जगत् ।
क्षणेनैकेन तत्सर्वं लयं यायादसंशयम् ।।६५५।।
श्रद्धा यत्रास्ति नो तत्र स्वप्नेऽप्यस्ति पराजयः ।
श्रद्धालोर्भजते कर्माऽकर्माख्यां नात्र संशय. ।।६५६।।
साक्षात्कर्तुं प्रभुं यत्नं सततं श्रद्धया सह ।
यः करोति जनस्तस्य श्रद्धा नूनं विवर्धते ।।६५७।।
सर्वचिन्ताभरोन्मुक्ता ते भवन्ति नरोत्तमाः ।
मानसेषु सदा येषां श्रद्धालोको विराजते ।।६५८।।
आत्मविश्वास एवास्ति श्रद्धा स च मतौ मम ।
पृथगीश्वरविश्वासान्न किञ्चिद्धृदयस्थितात् ।।६५९।।
बुद्धिर्बुद्धिमतां यत्र न किञ्चित् कर्तुमर्हति ।
तत्र श्रद्धावतां श्रद्धा क्षणार्धेन करोति तत् ।।६६०।।
श्रद्धाया निकषं चैतत् शुभं वा यदि वाऽशुभम् ।
कर्तव्यानन्तरं यत् स्यात् स्वीकुर्यात् तद्धृदा नरः ।।६६१।।
श्रद्धा सत्यास्ति सा याल्पां नानुभूतिमपेक्षते ।
अपेक्षतेऽनुभूतिं या सा श्रद्धा नैव सा मतिः ।।६६२।।
अहं त्रिकालदर्शी न न देवोऽस्मि परन्त्वहम् ।
श्रद्धावानस्मि विश्वासं करोमि परमात्मनि ।।६६३।।
पंगु ज्ञानं विना श्रद्धां; श्रद्धावा नैव केवलम् ।
कर्तव्यविमुखो नैव जायते ना विपत्स्वपि ।।६६४।।
श्रद्धाऽभावे भवे पूर्तिः कामनानां न भाविनी ।
काठिन्येनैव महता भाविनी यदि भाविनी ।।६६५।।

सत्यम्

सत्यमस्तीश्वरो, लोके पूर्णसत्यस्य पालनम् ।
क्रियते यदि किं तर्हि विधातुं नैव शक्यते ।।६६६।।
मानवो यस्तु संसारे सत्यस्यान्वेषणे रतः ।
तस्मिन्नपेक्ष्यते नूनं नरे निर्भयतागुणः ।।६६७।।
अहिंसाया पुरो हिंसा यथा शान्ता विजायते ।
पुरः शुद्धस्य सत्यस्याऽसत्यं शान्तं तथा न किम् ।।६६८।।
विद्यते यस्तु संसारे पूर्णसत्यमयो नरः ।
तत्कृतेऽस्तित्वहीनास्ति निराशा क्षणदाचरी ।।६६९।।
अस्माकं जीवने सत्ता सत्यस्य यदि विद्यते ।
जनाः स्वयं भविष्यन्ति तर्हि तेन प्रभाविताः ।।६७०।।
लोके महत्तमा शक्तिर्मता लोकमतं मम ।
सत्येनाहिंसयैवेयं शक्तिरुत्पद्यते परम् ।।६७१।।
त्यक्त्वाऽहिंसामसंकोचमहं सत्यस्य रक्षणम् ।
करिष्यामि द्वयोर्मध्ये यद्येकग्रहणाग्रहः ।।६७२।।
यत्कार्यं मन्यते सत्यं सम्पादयतु तद्भवान् ।
पश्चात् सर्वं जगत् कार्यं तत् सत्यं स्वीकरिष्यति ।।६७३।।
गुप्तं न किञ्चित् सत्याय सत्ये सर्वं प्रतिष्ठितम् ।
मार्दवं प्रेम सत्येऽस्ति सत्यमेवेश्वरः स्मृतः ।।६७४।।
विश्वासो मामकीनोऽयं वर्धते प्रतिवासरम् ।
सत्यं विहाय नान्यस्य सृष्टौ सत्ताऽस्ति कस्यचित् ।।६७५।।
सत्यं यत्र न तत्रास्ति शुद्धं ज्ञानं न जात्वपि ।
सत्यस्य पालने तस्मात् सदा शान्तिरवाप्यते ।।६७६।।
सत्यं जानाति कायेन मनसा वचसा तथा ।
तदाचरति यो नित्यं स वेत्ति परमेश्वरम् ।।६७७।।
व्यवहारो न सत्यस्य व्यवहारेषु विद्यते ।
सर्वक्षेत्रेषु सर्वेषु तर्हि तन्निष्फलं मतम् ।।६७८।।

प्रेम्णा क्रोधानलोऽत्युग्रो यथा शान्तो विजायते ।
तथा मिथ्याघटाटोपो भिद्यते सत्यवायुना ॥६७९॥
न सत्ताप्राप्तये सत्ता शुद्ध्यर्थं तु विधीयते ।
सत्याग्रहस्तथा तस्या उपभोगाय साधवे ॥६८०॥
निखिलानां सुहृन्नारिः कस्यापि स्यात् सदाग्रही ।
सत्याग्रहस्य सर्वाद्यं पणमेतद्धि विद्यते ॥६८१॥
श्रान्तायां साधनाभावे मत्यां त्यक्तुं निजां तनुम् ।
अन्तिमो निश्चयः सत्याग्रहस्य नियमो मतः ॥६८२॥
सत्याग्रहद्रुमस्यास्ति मूलं रूढं सुनिश्चिलम् ।
मानवानां स्वभावेषु विश्वासो यो महादृढः ॥६८३॥
अधिकारस्य सत्तायाः प्राप्त्यै सत्याग्रहः कृतः ।
वेशे सत्याग्रहस्यास्ति केवलं स दुराग्रहः ॥६८४॥
खड्गोऽस्ति सर्वतोधारः सत्यं सत्याग्रहो मम ।
इच्छानुकूलमस्त्यस्य प्रयोगः सुकरः सदा ॥६८५॥
सोढ्वा कष्टानि सत्यस्याऽवनं सत्याग्रहः स्मृतः ।
कायेन मनसा वाचा न संपीड्य विरोधिनः ॥६८६॥
कृतस्य कर्मणो लोके शुभं वा यदि वाऽशुभम् ।
भवत्येव फलं स्वादु फलः सत्याग्रहः शुभः ॥६८७॥
निर्भयत्वानुसारं च सत्याग्रहिणि नम्रता ।
वर्धेत न भवेद् दृप्त उद्दण्डश्च न येन सः ॥६८८॥
सत्यस्याग्रहिणं नूनं दुर्विनीतत्वमपत्रपम् ।
विषं यथा पयः कुम्भं सदोषं कुरुते तथा ॥६८९॥
सत्याग्रहस्य सर्वस्मात् कठिनांशो निगद्यते ।
विनयापरनामा स विद्यते नात्र संशयः ॥६९०॥
सत्याग्रहः परा शक्तिः क्रोधं दुर्भावनां विना ।
परकष्टसहिष्णुत्वं परमावश्यक परम् ॥६९१॥
कृत्वासंख्यान् प्रयोगान् ये द्वेऽस्त्रे लब्धे मयावरे ।
सत्याग्रहस्तयोरेकोऽसहयोगस्तथापरः ॥६९२॥

विश्वासो मामकीनोऽस्ति दृढः काले न संसृतौ ।
सत्याग्रहो महाशक्तिर्निर्बलानां भविष्यति ॥६९३॥

स्वच्छता

महत्त्वपूर्णं सर्वेभ्यो विहाय परमेश्वरम् ।
वस्तुभ्यो विद्यते यत् तत् स्वच्छत्वमिति मे मतिः ॥६९४॥
उद्भवन्तु सदा शुद्धा विचारा एव मानसे ।
अशुद्धा ये न सामीप्यं तेऽधिगच्छन्तु तेऽशुभाः ॥६९५॥
स्वच्छं तथा पवित्रं च त्वं कुर्या भोजनं सदा ।
तदपि स्यान्मितं मित्र ! जीवनायैव केवलम् ॥६९६॥
केवलं नात्मनो देहं भोजनं सलिलं तथा ।
कुरु स्वच्छं समीपस्थं सकलं स्थानमेव च ॥६९७॥
स्वच्छतामवलोक्यैव मानसं संप्रसीदति ।
आत्मा प्रफुल्लितश्चैव विनायासं विजायते ॥६९८॥
यस्मिन् नरे न नैर्मल्यं विविधं संविराजते ।
तेन साकं नरः कोऽपि संगतिं न चिकीर्षति ॥६९९॥
स्वच्छतापूर्वकं कार्यं सम्पादयति यः स्वकम् ।
आकृष्टाः संविजायन्ते तं प्रति प्रायशो नराः ॥७००॥
संस्कृतस्य मनुष्यस्य रुचेः संपरिचायिका ।
स्वच्छता, शिक्षणं तस्याः प्राप्नुयुर्निखिला नराः ॥७०१॥
स्वच्छता विद्यते वस्तु जगतो महदद्भुतम् ।
संस्काराणां मनुष्येषु साऽधानं कुरुते तथा ॥७०२॥

★

'चौहान थोक, हरदोई, उत्तर-प्रदेश'-निवासिना विद्याभास्कर-श्रीशिवकुमारमिश्रसाहित्याचार्येण संस्कृत-हिन्दी-एम०ए०-उपाधिधारिणा संकलिता सरसपद्यैरनूदिता च गान्धिसूक्तिसप्तशती समाप्ता ।

भवतु प्रभातः

(श्री मधुर शास्त्री, नयी दिल्ली)

ज्वलतु प्रदीपोऽयम्,
करुणायाः ।

तमसोह सघन-सृष्टिः,
शुष्के न तु सा वृष्टिः,
नयति सहान्धोऽन्धम्,
दृष्टा न समा दृष्टिः ।
भवतु प्रभातोऽयम्-
जनतायाः ।

विस्मृत - सन्निजभाषः,
सम्वर्धित - संत्रासः,
अविनय - नयनतनोतिः,
इव दिन-स्वप्ने वासः,
भवतु विनाशोऽयम्
लघुतायाः ।

सत्प्राची - सुख - युक्तः,
रति-पश्चिम-मद युक्तः,
दुष्प्रकृति - समासक्तः,
नव - विकृति - मृषायुक्तः,
भवतु विकासोऽयम्,
गुरुतायाः ।

तत्स्मितम् !

(डा० दयानन्दो भार्गवः, जोधपुर-विश्वविद्यालयस्य
संस्कृतविभागाचार्याध्यक्षः)

आसीत्किञ्चित्सामान्यं
महत्त्वहीनं
लघुतायुतं
तत्तादृशं स्मितं
यन्न तुलया तोलयितुं शक्यं
न भाण्डागारे सङ्ग्रहीतुं शक्यं
सततं वितीर्यमाणं
निष्कारणं
निष्प्रयोजनं
निर्व्याजम्
आदौ स्मितं
मध्ये स्मितं
अन्ते स्मितं
मुक्ताफलाभं
अवश्यायबिन्दुतरलम्
उषःकिरणसरलम्;
न जाने जीवने किं गरलं
कंऽपि कदापाययत्
सहसा तत्स्मितं विलुप्तम् ।
तदा प्रभृति
आहोलिकातो दीपावलीपर्यन्तम्
आदीपावलीतो होलिकापर्यन्तम्
कालचक्रारूढोऽहम्
अधरादधरं
तत्स्मितं गवेषयितुं
पाषाणभूते नेत्रे
न निमीलयामि
नोन्मूलयामि ।
उपलब्धे षड्विधेऽपि हास्ये
केवलं तत्स्मितं न दृश्यते
सर्वविधं स्मितमस्ति—
स्वर्णजटितं स्मितं
कीर्त्तिघटितं स्मितं
मर्मभेदि स्मितं;
किन्तु
अविदितस्वरामणीयकम्
अतिक्रान्तहेतुवादं
गभीरवेदनायामपि
अकुण्ठितसञ्चरणं
तिरस्कृतमरणं
प्रतिनेत्रं सन्निहितचरणं
तन्मुग्धं स्मितं न लभ्यते ।
गिरिशिखरनिपातितोऽपि
वह्निज्वालाज्वालितोऽपि
यः प्रह्लादो
न ममार
स हिरण्यं दृष्ट्वा
करुणञ्चीचचकार ।

तस्माद्दिनादारभ्य
पलाशपुष्परञ्जितं
भूरिजलं
यत्र तत्र सर्वत्र
क्षिपामि
किन्तु वासांसि
शुष्काण्येवावतिष्ठन्ते
न मनस्तरलीभवति
न वपुरार्द्रम्
वारम्वारं मुखं
चित्रविचित्रं वर्णयामि
किन्तु पौनःपुन्येन तत्
विवर्णं जायते
यत्स्मितं
शरदिन्दुधवलं सदपि
मज्जीवने सप्तवर्णेन्द्रचापमघटयत्
तत्स्मितं स्वभावभूतं
अहेतुकमासीत्
यथा कमले परिमलः
चन्द्रे ज्योत्स्ना
सलिले च शैत्यं
किञ्चिन्निमित्तं नापेक्षन्ते।
न जाने कस्मिन्
षड्यन्त्रे
तत्स्मितं चूर्णतां गतम्।
मृत्तिकानिर्मितमङ्गलकलश इव
तत्स्मितं
छद्मशतपरिवृतेन
लोहनिर्मितघटेनेव
अनेन हसितेन
कथमुपमीयते ?
यद्धसितं
न केवलं मानव
मातरं प्रकृतिमपि
शोषयति
अश्वत्थवृक्षमुन्मूल्य
यूक्लिपटसतरुं
पोषयति।

देववाणी-परिषद्वार्ता

(१) परिषदः त्रयोदशतमः सङ्कल्पनादिवसः

२१.८.१९८८ ई० तारिकायां 'आर-६ वाणी-विहार, नयी दिल्ली-११००५९' इति स्थाने देववाणी-परिषदः त्रयोदशतमः संकल्पनादिवस-समारोहः समामन्यत। अस्मिन्नवसरे संस्कृते दृश्यश्रव्यकार्यक्रमाणां प्रस्तुतिर्जाता।

देववाणी-परिषत्प्रकाशितानां ग्रन्थानां प्रदर्शनी अप्यायोज्यत। समारोहस्य मुख्यातिथित्वं परिषदः संस्थापकाध्यक्षैराचार्यश्रीरमेशचन्द्रशुक्लैः सम्पादितम्।

परिषदो वर्तमानाध्यक्षैराचार्यश्रीनिवासरथमहाभागैः स्वसन्देशे परिषदो नित्यं प्रगतिराकांक्षिता।

परिषन्महासचिवेन डा०रमाकान्तशुक्लेन सूचना प्रदत्ता यत् परिषत्प्रकाशितं तद्रचितं काव्यं **'भाति मे भारतम्'** आधारीकृत्य दूरदर्शने एकः कार्यक्रमः प्रस्तावितोऽस्ति।

स्मरणीयं विद्यते यत् २१.८.१९७६ तारिकायां समितिपञ्जीकार-कार्यालये देववाणी-परिषद्, दिल्ली'—संस्थायाः नियमोपनियमावली प्रस्तुतासीत्। स एव दिवसः परिषदः प्रथमः संकल्पनादिवस आसीत्। ततश्च प्रतिवर्षम् अगस्तमासस्य एकविंश्यां तारिकायां परिषदः संकल्पनादिवसः सम्मान्यते।

(२) पण्डितराज-महोत्सवः

देववाणी-परिषदा २५—२७.१०.१९८८ तारिकासु **'प्रथमः पण्डितराज-महोत्सवः'** सम्मानयिष्यते। त्रिदिवसीयस्य महोत्सवस्यास्योद्घाटनम् शरत्पूर्णिमायां २५.१० १९८८ ई० तारिकायां 'आर-६, वाणी-विहारः, नयी दिल्ली' इति स्थाने आचार्यरमेशचन्द्रशुक्लमहाभागाः करिष्यन्ति।

२६.१०.१९८८ तारिकायां अलीगढ़मुस्लिम-विश्वविद्यालये संस्कृतविभाग-प्रवाचकैः डा०कृष्णकान्तशुक्लैः पण्डितराजजगन्नाथस्य काव्यलक्षणमवलम्ब्य व्याख्यानं प्रदास्यते। अस्मिन्नेव दिने पण्डितराजस्य अन्योक्तीः अवलम्ब्य एकं शोधपत्रं डा० रमाकान्तशुक्लेन प्रस्तोष्यते।

२६.१०.१९८८ ई० तारिकाया समापनगोष्ठ्यां पण्डितराज-प्रणीतानां पण्डितराजविषयिणीनां च रचनानां दृश्यश्रव्यप्रस्तुतिविषये विचारविमर्शो विधास्यते। अस्याः गोष्ठ्या आध्यक्ष्यं दूरदर्शने 'संस्कृतिकी' कार्यक्रमनिष्पादयित्री श्रीमती दुर्गावतीसिंहमहाभागा मुख्यातिथित्वं च आकाशवाण्या आद्य-संस्कृतसमाचारप्रवाचिका श्रीमती विजयश्रीमहाभागा विधास्यतः। विषय-प्रवर्तनं डा० रमा झा महाभागा करिष्यति।

संस्कृत-जगद्वार्ता

(१) १२—१४.८.१९८८ तारिकासु मथुरायां भागवतभवने विश्वविद्यालयानुदानायोगसाहाय्येन मथुरास्थ-बी०एस०ए०, कालेज-रसायनविज्ञान विभागेन डा० अवतार कृष्ण गुटू महाभागस्य निदेशकत्वे '**वैदिकविज्ञान**' मवलम्ब्यैका त्रिदिवसीया राष्ट्रीयसंगोष्ठी समायोजिता ।

(२) १६.८.१९८८ तारिकायां हरियाणा-साहित्य-अकादम्या कुरुक्षेत्र-विश्वविद्यालयस्य 'सीनेटहाल' सभागारे संस्कृतदिवससमारोहः समायोजितः । अस्मिन्नवसरे शोधपत्रवाचनं, संस्कृतकविगोष्ठी, स्व० पं० स्थाणुदत्तशास्त्रि स्मृतिसमारोहश्चानुष्ठीयन्त । अकादम्या निदेशकः डा० जयनारायणकौशिक-महाभागः संस्कृत-प्रोत्साहनार्थं निर्मितानां योजनानां परिचयमदात् । कवि-गोष्ठ्यां डा० रमाकान्त शुक्ल-श्रीरामेश्वरदत्तशास्त्रि-श्रीमदनलाल-डा० महावीर कौशिक-प्रभृतिभिः काव्यपाठः कृतः ।

( ) २७.८.१९८८ तारिकायां सायं लखनऊनगरे उत्तरप्रदेश-संस्कृत-अकादम्या एकमखिलभारतीयं संस्कृतकविसम्मेलनमायोजितम् यत्र डा० रेवा-प्रसादद्विवेदी, प्रो० श्रीनिवासरथः, डा० रमाकान्त शुक्लः, डा० भास्कराचार्य त्रिपाठी, डा० मनुदेवभट्टाचार्यः, पं० बटुकनाथ शास्त्री खिस्ते, डा० मनोरमा तिवारी इत्यादयः कवयः स्वीयाभी रचनाभी श्रोतॄन् रसमग्नाञ्चक्रुः ।

(४) २७.८.१९८८ तारिकायां लक्ष्मणपुरे केन्द्रीयसंस्कृतविद्यापीठेन समायोजितं संस्कृतदिवससमारोहम् उत्तरप्रदेशस्य मुख्यमन्त्री श्रीनारायणदत्त तिवारी समुदघाटयत् । उत्तर प्रदेशस्य राज्यमन्त्री श्रीगौरीशंकरः समुदाचार-भाषणं सेचनमन्त्री श्रीलोकपतित्रिपाठी च आध्यक्ष्यं कृतवन्तौ ।

अस्मिन्नवसरे प्रो० श्रीनिवासरथ-डा० रमाकान्त शुक्ल-डा० भास्कराचार्य त्रिपाठिनां काव्यपाठः, डा० जगदम्बाप्रसादसिन्हा-श्रीकृष्णसहाय माथुर-प्रभृतिविदुषां भाषणानि, विद्यापीठप्राचार्य डा० चक्रधरविजल्वानस्य विद्यापीठ-प्रगतिसूचकं स्वागतभाषणं चाभूवन् ।

(५) २८.८.१९८८ तारिकायां गोरखपुरे नागार्जुनबौद्धप्रतिष्ठानेन स्व-दशमवार्षिकसमारोहावसरे एकमखिलभारतीयं संस्कृतकविसम्मेलनमायोजितम् । प्रतिष्ठानेन २७—३०.८.१९८८ तारिकासु डा० करुणेश शुक्लस्य निदेशकत्वे 'पाण्डुलिपिसंरक्षण'मधिकृत्य एका विचारगोष्ठी अपि समायोजिता ।

(रमा शुक्ला)

अर्वाचीनसंस्कृतस्य ग्राहकशुल्कम्

(१५-१-१९८७ तः)

संस्थानां कृते वार्षिकं (भारते) रु० 40.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 300.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

व्यक्तीनां कृते वार्षिकं (भारते) रु० 25.00
वार्षिकं (विदेशेषु) यू० एस० डालराः 10
आजीवनं (भारते) रु० 250.00
आजीवनं (विदेशेषु) यू० एस० डालराः 100

डाकव्यय : [यदि पंजीकृत (रजिस्टर्ड) डाकद्वारा अर्वाचीन-संस्कृतस्य सर्वेऽप्यङ्काः प्रेष्येरन्]
भारते : रु० 20.00
विदेशेषु : यू० एस० डालराः 10

देववाणी-परिषदः सदस्यानां सभासदां च कृते पत्रं निःशुल्कं प्रेष्यते। किन्तु पंजीकृतडाकद्वारा पत्रप्रेषणार्थं तैरपि डाकव्ययो देयः स्यात्। ग्राहकाः ग्राहकशुल्कं **'अर्वाचीनसंस्कृतम्'** (Arvacheenasans-kritam/*Arvācīnasaṁskṛtam* इत्यंकितेन बैंकड्राफ्टेन धनादेशेन (M. O.) वा निम्नलिखिते संकेते प्रेषयितुं प्रार्थ्यन्ते

सम्पादकः
अर्वाचीनसंस्कृतम्
देववाणी-परिषद्, दिल्ली
आर-6 वाणी-विहारः, नयी दिल्ली-110059 (भारतम्)।

देववाणी-परिषद, दिल्ली'-कृते डा रमाकान्तशुक्लेन 'देववाणी प्रिंटर्स, उत्तम नगर, नयी दिल्ली-११००५९' इति मुद्रणालये मुद्रापयित्वा '६ वाणी-विहार, नयी दिल्ली-११००५९' तः प्रकाशितम्-अर्वाचीनसंस्कृतम् (१०/४)-प्रधानसम्पादकः डा० रमाकान्त शुक्लः। प्रकाशनतिथिः १५.१०.१९८८

देववाणी-परिषदा प्रकाशिताः केचन ग्रन्थाः

१.	भाति मौरीशसम् (डा० रमाकान्त शुक्लः)	रु० ६.००
२.	सारस्वतसमुन्मेषः (डा० विन्ध्येश्वरीप्रसाद मिश्रः)	रु० २०.००
३.	श्रीपादसप्ततिः (श्रीपादपराग-व्याख्या) (डा० स्वामिनाथन्)	रु० ४०.००
४.	कूहा (काव्यम्) (डा० उमाकान्त शुक्लः)	रु० २०.००
५.	सदाशयसमुच्चयः (पं० टी० वी० परमेश्वर अय्यरः)	रु० १५.००
६.	आभाणकमञ्जरी (" ")	रु० १५.००
७.	जय भारतभूमे ! (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ३०.००
८.	अर्वाचीनसंस्कृतसाहित्यपरिचयः (प्रथम खण्ड) (")	रु० ३०.००
९.	" " " (द्वितीय खण्डः) (")	रु० ४०.००
१०.	राधाकृष्णरसायनम् (श्री ओट्टूर उण्णि नम्बूदिरीपादः)	रु० ४०.००
११.	निकषा (उपन्यासः) (डा० केशवचन्द्र दाशः)	रु० २०.००
१२.	अभागभारतम् (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
१३.	भाति मे भारतम् (काव्यम्) (डा० रमाकान्त शुक्लः)	रु० ४०.००
१४.	संस्कृत साहित्य में राष्ट्रिय भावना (डा० हरिनारायण दीक्षित)	रु० १५०.००
१५.	साधारणीकरण : प्राच्य एवं प्रतीच्य चिन्तन (डा० सुलेखचन्द्र शर्मा)	रु० ५०.००
१६.	अभिशापम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० २०.००
१७.	रससिद्धान्त और नाटक (डा० सुन्दरलाल कथूरिया)	रु० ६०.००
१८.	साहित्यकौतुकम् (पं० टी० वी० परमेश्वर अय्यरः)	रु० ४०.००
१९.	पूर्णकुम्भः (ललितनिबन्धसंग्रहः) (पं० विष्णुकान्त शुक्लः)	रु० २०.००
२०.	स्फूर्तिसप्तशती (डा० शिवदत्तशर्मा चतुर्वेदी)	रु० ३०.००
२१.	रसदर्शनम् (डा० रमेशचन्द्र शुक्लः)	रु० ५०.००
२२.	श्रीबदरीशतरङ्गिणी (काव्यम्) (श्रीसुन्दरराजः)	रु० २०.००
२३.	सुरश्मिकाश्मीरम् (") (")	रु० २०.००
२४.	पुरश्चरणकमलम् (नाटकम्) (डा० रमाकान्त शुक्लः)	रु० १०.००
२५.	श्रीबदरीशसुप्रभातम् (डा० सी० आर० स्वामिनाथन्)	रु० १०.००
२६.	पण्डितराजीयम् (नाटकम्) डा० रमाकान्त शुक्लः)	रु० २०.००
२७.	नियतिचक्रम् (ध्वनिनाटकम्) (" ")	रु० २०.००
२८.	श्रीगरुडध्वजसपादशतकम् (डा० रामकिशोर मिश्रः)	रु० १२.००
२९.	लक्ष्मीशतकम्, (डा० वरदाचार्यकण्णन्)	रु० २०.००
३०.	अध्यात्मरामायण में अध्यात्म-चिन्तन (श्रीत्रिगुणानन्द शुक्ल)	रु० ४०.००

देववाणी-परिषद्, दिल्ली, ६ वाणी-विहारः, नयी दिल्ली-११००५९.